Entered
31.7.18

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:

A

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NO. 1417.

PROVINCIAL MUSEUM
LUCKNOW
REFERENCE LIBRARY

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚĀSTRA,

With the commentary called

SVOPAJNAVIVARANA.

BY

SRĪ HEMACHANDRĀCHĀRYA.

EDITED BY

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS V.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 31, Nandakumar Chowdhury 2nd Lane.

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1918.

LIST OF BOOKS FOR SALE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENT, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W.

*Complete copies of those works marked with an asterisk * cannot be supplied — some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	As.
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Advaita Brahma Siddhi (Text), Fasc. 1-4 @ /10/ each	2	8
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
Agni Purana (Text), Fasc. 1--14 @ /10/ each	8	12
*Aitareya Aranyaka of Rig-Veda (Text), 2--4 @ /10/ each	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya locana.	2	0
Amarakosha, Fasc. 1—2	4	0
*Anu Bhashyam, (Text), Fasc. 2-5 @ /10/ each	2	8
Anumana Didhiti Prasarini, Fasc. 1-3 @ /10/-	1	14
*Aphorisms of Sandilya (English), Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
Atharvana Upanishadas (Text), Fasc. 1--5 @ /10/ each	3	2
Atmatattvaviveka, Fasc. 1--2	1	4
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-13; Vol. II Fasc. 1-12 @ 1/ each	25	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each	1	14
Bardic and Historical Survey of Rajputana A Descriptive Catalogue of Bardic and Historical Manuscripts. Sec. I, Prose Chronicles, Part I, Jodhpur State	1	0
Do Do Sec. I, Prose Chronicles, Part II, Bikanir State	1	0
Do Do Sec. 2, Bardic Poetry, Part I, Bikanir State	1	0
Bardic and Historical Survey of Rajputana Vacanikā Rāthora Ratana Singhaji ri Mahesadāsota ri Kluriyā Joga ri Kata, Part I, Dingala Text ...	1	8
Bauddhastotrasangraha	2	0
Baudhāyana S'rauta Sūtra, Fasc. 1-3; Vol. II, Fasc 1-5; Vol. III, Fasc. 1 @ /10/ each	5	10
Bhamati (Text), Fasc. 1--8, @ /10/ each	5	0
Bhāsavritty	0	10
Bhāṭṭa Dipikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1-2, @ /10 each ...	5	0
Bodhicaryāvatāra of Çāntideva, Fasc. 1-7 @ /10/ each	4	6
Brahma Sutras (English), Fasc. 1, @ 1/-	1	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
*Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7; Vol II, Fasc. 1-5; Vol. III, Fasc. 1-7; Vol. V, Fasc. 1-5 @ /10/ each	14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	3	12
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Ditto Vol. IX. Fasc. 1-2	1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--18, Part II, Fasc. 1, @ /10/ each	11	14
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10; Vol. IV. Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. IV, Fasc. 7, @ 1/4/ each	1	4
Ditto Vol. IV, Fasc. 8-10 @ /10/	1	14
*Chandah Sutra (Text), Fasc. 1--3, @ /10/ each	1	14
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Crauta Sutra of Apastamba (Text), Fasc. 2--17, @ /10/ each	10	0
*Çrauta Sūtra of Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc 1-4; Vol. III, Fasc. 1-4; Vol 4, Fasc. 1 @ /10/ each	10	0
Çri Bhāshyam (Text), Fasc 1-3 @ /10/ each	1	14
Çri Cantinatha Charita, Fasc. 1-4	2	8

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानाद्भावार्हत इत्यर्थः, अनेन ज्ञानातिशय उक्तः ; तत्संख्यामाह—चतुर्विंशतिमपि अपिशब्दादन्यानपि किंविशिष्टान् लोकस्योद्योतकरान् लोक्यते प्रमाणेन दृश्यत इति लोकः, पञ्चास्तिकायात्मकस्तस्योद्योतकरणशीलान् केवलालोकदीपेन सर्वलोकप्रकाशकरणशीलान् इत्यर्थः, ननु केवलिन इत्यनेनैव गतार्थमेतल्लोकोद्योतकरणशीला एव हि केवलिनः । सत्यम् । विज्ञानाऽद्वैतनिरासेनोद्योतकराः, उद्योत्यस्य भेददर्शनार्थम्, लोकोद्योतकरत्वं च तत्स्तावकानामुपकाराय न चाऽनुपकारिणः कोऽपि स्तौति इत्युपकारकत्वप्रदर्शनायाह—धर्मतीर्थकरान् ; धर्म उक्तस्वरूपः तीर्यतेऽनेन तीर्थं धर्मप्रधानं तीर्थं धर्मतीर्थं धर्मग्रहणाद् द्रव्यतीर्थस्य नद्यादेः शाक्यादिसम्बन्धिनश्च अधर्मप्रधानस्य परिहारः, तत्करणशीला धर्मतीर्थकराः तान् सदेवमनुजाऽसुरायां पर्षदि सर्वभाषापरिणामिन्या वाचा धर्मतीर्थप्रवर्तकानित्यर्थः, अनेन पूजातिशयो वागतिशयश्चोक्तः । अपायापगमातिशयमाह—जिनान् रागद्वेषादिजेतृनित्यर्थः ।

यदुक्तं कीर्तयिष्यामीति तत्कीर्तनं कुर्वन्नाह—

उसभमजिअं च वंदे संभवमभिनंदणं च सुमइं च ।
पउमप्पहं सुपासं जिणं च चंदप्पहं वंदे ॥ २ ॥
सुविहिं च पुप्फदंतं सीअल सिज्जंस वासुपुज्जं च ।
विमलमणंतं च जिणं धम्मं संतिं च वंदामि ॥ ३ ॥
कुंथुं अरं च मल्लिं वन्दे मुणिसुव्वयं नमिजिणं च ।
वंदामि रिट्ठनेमिं पासं तह वद्धमाणं च ॥ ४ ॥

State Museum Library Lucknow 5119

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समुदायार्थः सुगमः। पदार्थस्तु विभज्यते, स च सामान्यतो विशेषतश्च। तत्र सामान्यतः ऋषति गच्छति परमपदमिति ऋषभः, "उद्दत्वादौ" ॥ ८ । १ । १३१ ॥ इत्युत्वे उसहो। वृषभ इत्यपि, वर्षति सिञ्चति देशनाजलेन दुःखाग्निना दग्धं जगत्, इत्यस्यान्वर्थः, "वृषभे वा वा" ॥ ८ । १ । १३३ ॥ इति वकारेण ऋत उत्वेऽस्यापि उसहो। विशेषतस्तु ऊर्वोर्वृषभो लाञ्छनमभूद्भगवतः, जनन्या च चतुर्दशानां स्वप्नानामादावृषभो दृष्टस्तेन ऋषभो वृषभो वा। १। परीषहादिभिर्न जित इति अजितः, तथा गर्भस्थे भगवति जननी द्यूते राज्ञा न जिता इत्यजितः। २। सम्भवन्ति प्रकर्षेण भवन्ति चतुस्त्रिंशदतिशयगुणा अस्मिन्निति सम्भवः, शं सुखं भवत्यस्मिन् स्तुते इति शम्भवो वा, तत्र "शषोः सः" ॥ ८।१।२६० ॥ इति सत्वे सम्भवः, तथा गर्भगतेऽप्यस्मिन् अभ्यधिकसस्यसम्भवात्सम्भवः। ३। अभिनन्द्यते देवेन्द्रादिभिरित्यभिनन्दनः, तथा गर्भात्प्रभृति एवाऽभीक्ष्णं शक्राद्यभिनन्दनात् अभिनन्दनः। ४। सु शोभना मतिरस्येति सुमतिः, तथा गर्भस्थे जनन्याः सुनिश्चिता मतिरभूदिति सुमतिः। ५। निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभा यस्याऽसौ पद्मप्रभः, तथा पद्मशयनदोहदो मातुर्देवतया पूरित इति, पद्मवर्णश्च भगवानिति पद्मप्रभः। ६। शोभनाः पार्श्वा अस्येति सुपार्श्वः, तथा गर्भस्थे भगवति जनन्यपि सुपार्श्वा जातेति सुपार्श्वः। ७। चन्द्रस्येव प्रभा ज्योत्स्ना सौम्यलेश्याविशेषोऽस्येति चन्द्रप्रभः, तथा देव्याश्चन्द्रपानदोहदोऽभूत्, चन्द्रसमवर्णश्च भगवानिति चन्द्रप्रभः। ८। शोभनो विधिः सर्वत्र कौशलमस्येति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुविधिः, तथा गर्भस्थे भगवति जनन्यप्येवमिति सुविधिः, पुष्पकलिकामनोहरदन्तत्वात् पुष्पदन्त इति द्वितीयं नाम । ९ । सकलसत्त्वसन्तापहरणाच्छीतलः, तथा गर्भस्थे भगवति पितुः पूर्वोत्पन्नोऽचिकित्स्यपित्तदाहो जननीकरस्पर्शादुपशान्त इति शीतलः । १० । सकलभुवनस्याऽपि प्रशस्यतमत्वेन श्रेयान्, श्रेयांसावंसावस्येति पृषोदरादित्वात् श्रेयांसो वा, तथा गर्भस्थेऽस्मिन् केनाप्यनाक्रान्तपूर्वा देवताधिष्ठितशय्या जनन्या आक्रान्तेति श्रेयो जातमिति श्रेयांसः ।११। वसवो देवविशेषाः, तेषां पूज्यो वसुपूज्यः, प्रज्ञादित्वादणि वासुपूज्यः, तथा गर्भस्थेऽस्मिन् वसु हिरण्यं तेन वासवो राजकुलं पूजितवानिति वासुपूज्यः, वसुपूज्यस्य राज्ञोऽयमिति वा "तस्येदम्" ॥ ६।३।६० ॥ इत्यणि वासुपूज्यः । १२ । विगतमलो विमलः, विमलानि वा ज्ञानादीन्यस्येति विमलः, तथा गर्भस्थे मातुर्मतिस्तनुश्च विमला जातेति विमलः । १३ । अनन्तकर्मांशान् जयति, अनन्तैर्वा ज्ञानादिभिर्जयति अनन्तजित्, तथा गर्भस्थे जनन्या अनन्तरत्नदाम दृष्टम्, जयति च त्रिभुवनेऽपीति अनन्तजित्, भीमो भीमसेन इति न्यायादनन्त इति । १४ । दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मः, तथा गर्भस्थे जननी दानादिधर्मपरा जातेति धर्मः । १५ । शान्तियोगात्, तदात्मकत्वात्, तत्कर्तृत्वाद्वा शान्तिरिति, तथा गर्भस्थे पूर्वोत्पन्नोऽशिवशान्तिरभूदिति शान्तिः । १६ । कुः पृथ्वी, तस्यां स्थितवानिति निरुक्तात् कुन्थुः, तथा गर्भस्थे जननी रत्नानां कुन्थुं राशिं दृष्टवतीति कुन्थुः । १७ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वो नाम महासत्त्वः कुले य उपजायते ।
तस्याऽभिवृद्धये वृद्धैरसावर उदाहृतः ॥ १ ॥

इति वचनादरः । तथा गर्भस्थे जनन्या स्वप्ने सर्वरत्नमयोऽरो दृष्ट इत्यरः । १८ । परीषहादिमल्लजयान्निरुक्तान्मल्लिः, तथा गर्भस्थे मातुः एकर्त्तौ सर्वर्तुसुरभिकुसुममाल्यशयनीयदोहदो देवतया पूरित इति मल्लिः । १९ । मन्यते जगतस्त्रिकालाऽवस्थामिति मुनिः "मनेरुदेतौ चास्य वा" (उणा-६१२) इति इप्रत्यये उपान्त्यस्योत्वम्, शोभनानि व्रतान्यस्येति सुव्रतः, मुनिश्चासौ सुव्रतश्च मुनिसुव्रतः, तथा गर्भस्थे जननी मुनिवत्सुव्रता जातेति मुनिसुव्रतः । २० । परीषहोपसर्गादिनामनात् "-नमेस्तु वा" (उणा-६१३) इति विकल्पेनोपान्त्यस्येकाराभावपक्षे नमिः, तथा गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः । २१ । धर्मचक्रस्य नेमिवन्नेमिः, तथा गर्भस्थे भगवति जनन्या रिष्टरत्नमयो महानेमिर्दृष्ट इति रिष्टनेमिः, अपश्चिमादि-शब्दवत् नञ्पूर्वत्वेऽरिष्टनेमिः । २२ । पश्यति सर्वभावानिति निरुक्तात् पार्श्वः, तथा गर्भस्थे जनन्या निशि शयनीयस्थया-ऽन्धकारे सर्पो दृष्ट इति गर्भानुभावोऽयमिति मत्वा पश्यतीति पार्श्वः, पार्श्वोऽस्य वैयावृत्यकरस्तस्य नाथः पार्श्वनाथः, भीमो भीमसेन इतिवत् पार्श्वः । २३ । उत्पत्तेरारभ्य ज्ञानादिभिर्वर्धत इति वर्धमानः, तथा भगवति गर्भस्थे ज्ञातकुलं धनधान्या-दिभिर्वर्धत इति वर्धमानः । २४ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेषाऽभिधानार्थसंग्राहिकाश्चेमाः श्रीभद्रबाहुस्वामिप्रणीता

गाथाः—

[1]ऊरूसु उसहलञ्छणमुसभं सुमिणम्मि तेण उसहजिणो ।
अक्खेसु जेण अजिआ जणणी अजिओ जिणो तम्हा ॥ १ ॥
अभिसम्भूआ सासत्ति सम्भवो तेण वुच्चइ भयवं ।
अभिनन्दइ अभिक्खं सक्को अभिनन्दणो तेण ॥ २ ॥
जणणी सव्वत्थ विणिच्छएसु सुमइत्ति तेण सुमइजिणो ।
पउमसयणम्मि जणणीइ डोहलो तेण पउमाभो ॥ ३ ॥
गब्भगए जं जणणी जाय सुपासा तओ सुपासजिणो ।
जणणीइ चंदपिअणम्मि डोहलो तेण चंदाभो ॥ ४ ॥
सव्वविहीसु अ कुसला गब्भगए जेण होइ सुविहिजिणो ।
पिउणो दाहोवसमो गब्भगए सीअलो तेणं ॥ ५ ॥

---

(१) ऊर्वोर्ऋषभलाञ्छनमृषभं स्वप्ने तेनर्षभजिनः ।
अक्षेषु येनाजिता जननी अजितो जिनस्तस्मात् ॥ १ ॥
अभिसंभूतानि सस्यानीति संभवस्तेनोच्यते भगवान् ।
अभिनन्दत्यभीक्ष्णं शक्रोऽभिनन्दनस्तेन ॥ २ ॥
जननी सर्वत्र विनिश्चयेषु सुमतिरिति तेन सुमतिजिनः ।
पद्मशयने जनन्या दोहदस्तेन पद्माभः ॥ ३ ॥
गर्भगते यज्जननी जाता सुपार्श्वा ततः सुपार्श्वजिनः ।
जनन्याश्चन्द्रपाने दोहदस्तेन चन्द्राभः ॥ ४ ॥
सर्वविधिषु च कुशला गर्भगते येन भवति सुविधिजिनः ।
पितुर्दाहोपशमो गर्भगते शीतलस्तेन ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]महरिहसिज्जारुहणम्मि डोहलो होइ तेण सिज्जंसो ।
पूएइ वासवो जं अभिक्खणं तेण वसुपुज्जो ॥ ६ ॥
विमलतणुबुद्धिजणणी गब्भगए तेण होइ विमलजिणो ।
रयणविचित्तमणंतं दामं सुमिणे तओऽणंतो ॥ ७ ॥
गब्भगए जं जणणी जाय सुधम्मत्ति तेण धम्मजिणो ।
जाओ असिवोवसमो गब्भगए तेण संतिजिणो ॥ ८ ॥
थुहं रयणविचित्तं कुंथुं सुमिणम्मि तेण कुंथुजिणो ।
सुमिणे अरं महरिहं पासइ जणणी अरो तम्हा ॥ ९ ॥
वरसुरहिमल्लसयणम्मि डोहलो तेण होइ मल्लिजिणो ।
जाया जणणी जं सुव्वयत्ति मुणिसुव्वओ तम्हा ॥ १० ॥
पणया पच्चंतनिवा दंसियमित्ते जिणम्मि तेण णमी ।
रिट्ठरयणं च नेमिं उप्पयमाणं तओ नेमी ॥ ११ ॥

---

(१) महार्हशय्यारोहणे दोहदो भवति तेन श्रेयांसः ।
पूजयति वासवो यमभिक्षणं तेन वासुपूज्यः ॥ ६ ॥
विमलतनुबुद्धिजननी गर्भगते तेन भवति विमलजिनः ।
रत्नविचित्रमनन्तं दाम स्वप्ने ततोऽनन्तः ॥ ७ ॥
गर्भगते यज्जननी जाता सुधर्मेति तेन धर्मजिनः ।
जातोऽशिवोपशमो गर्भगते तेन शान्तिजिनः ॥ ८ ॥
स्तूपं रत्नविचित्रं कुन्थुं स्वप्ने तेन कुन्थुजिनः ।
स्वप्नेऽरं महार्हं पश्यति जननी, अरस्तस्मात् ॥ ९ ॥
वरसुरभिमाल्यशयने दोहदस्तेन भवति मल्लिजिनः ।
जाता जननी यत् सुव्रतेति मुनिसुव्रतस्तस्मात् ॥ १० ॥
प्रणताः प्रत्यन्तनृपा दर्शितमात्रे जिने तेन नमिः ।
रिष्टरत्नं च नेमिमुत्पतन्तं ततो नेमिः ॥ ११ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[१]सप्पं सयणे जणणी जं पासइ तमसि तेण पासजिणो ।

वड्ढइ य नायकुलं ति अ तेण जिणो वद्धमाणु त्ति ॥ १२ ॥

इति कीर्तनं कृत्वा चेतःशुद्ध्यर्थं प्रणिधानमाह—

एवं मए अभिथुआ विहुअरयमला पहीणजरमरणा ।

चउवीसं पि जिणवरा तित्थयरा मे पसीअन्तु ॥ ५ ॥

एवमनन्तरोदितेन विधिना मयेत्यात्मनिर्देशः, अभिष्टुता आभिमुख्येन स्तुताः स्वनामभिः कीर्तिता इत्यर्थः । किंविशिष्टास्ते, विधूतरजोमलाः—रजश्च मलं च रजोमले, विधूते प्रकम्पिते अनेकार्थत्वादपनीते वा रजोमले यैस्ते विधूतरजोमलाः, बध्यमानं च कर्म रजः, पूर्वबद्धं तु मलम्, अथवा बद्धं रजो निकाचितं मलम्, अथवा ऐर्यापथं रजः, साम्परायिकं मलमिति । यतश्चैवंभूता अत एव प्रक्षीणजरामरणाः कारणाभावात् । चतुर्विंशतिरपि, अपिशब्दादन्येऽपि जिनवराः श्रुतादिजिनेभ्यः प्रकृष्टाः, ते च तीर्थकरा इति पूर्ववत्, मे मम, किं ? प्रसीदन्तु प्रसादपरा भवन्तु । ते च वीतरागत्वाद्यद्यपि स्तुताः तोषम्, निन्दिताश्च द्वेषं न यान्ति, तथाऽपि स्तोता स्तुतिफलम्, निन्दकश्च निन्दाफलमाप्नोत्येव, यथा चिन्तामणिमन्त्राद्याराधकः ; यदवोचाम वीतरागस्तवे—

अप्रसन्नात् कथं प्राप्यं फलमेतदसङ्गतम् ।

चिन्तामण्यादयः किं न फलन्त्यपि विचेतनाः ? ॥ १ ॥

---

(१) सर्पं शयने जननी यत् पश्यति तमसि तेन पार्श्वजिनः ।
वर्धते च ज्ञातकुलमिति च तेन जिनो वर्धमान इति ॥ १२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्युक्तमेव। अथ यदि न प्रसीदन्ति, तत्किं प्रसीदन्त्विति वृथा प्रलापेन ?। नैवम्। भक्त्यतिशयत एवमभिधानेऽपि न दोषः। यदाह—क्षीणक्लेशा एते नहि प्रसीदन्ति, न तत्स्तवोऽपि वृथा, तत्स्तवभावविशुद्धेः, प्रयोजनं कर्मविगम इति ॥ ५ ॥

तथा—

कित्तिअ वंदिअ महिआ जेए लोगस्स उत्तमा सिद्धा।
आरुग्गबोहिलाभं समाहिवरमुत्तमं दिंतु ॥ ६ ॥

कीर्त्तिताः स्वनामभिः प्रोक्ताः. वन्दितास्त्रिविधयोगेन सम्यक् स्तुताः, महिताः पुष्पादिभिः पूजिताः। मइआ इति पाठान्तरम्, तत्र मयका मया। के एते ?, इत्याह-ये एते लोकस्य प्राणिवर्गस्य कर्म-मलकलङ्काभावेनोत्तमाः प्रकृष्टाः, सिद्ध्यन्ति स्म सिद्धाः कृतकृत्या इत्यर्थः, अरोगस्य भाव आरोग्यं सिद्धत्वं तदर्थम्, बोधिलाभः अर्हत्प्रणीतधर्मप्राप्तिरारोग्यबोधिलाभः, स ह्यनिदानो मोक्षायैव भवति तम्, तदर्थं च समाधिवरं वरसमाधिं परमस्वास्थ्यरूपं भावसमाधिमित्यर्थः, असावपि तारतम्यभेदादनेकधैव, अत आह-उत्तमं सर्वोत्कृष्टं ददतु प्रयच्छन्तु, एतच्च भक्त्याच्यते।

यत उक्तम्—

[1]भासा असच्चमोसा नवरं भत्तीइ भासिआ एसा।
न हु खीणपिज्जदोसा दिंति समाहिं च बोहिं च ॥१॥ इति

---

(१) भाषा असत्यमृषा नवरं भक्त्या भाषितैषा।
न खलु क्षीणप्रेमदोषा ददति समाधिं च बोधिं च ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

चंदेसु निम्मलयरा आइच्चेसु अहिअं पयासयरा ।

सागरवरगम्भीरा सिद्धा सिद्धिं मम दिसन्तु ॥ ७ ॥

"पञ्चम्यास्तृतीया च" ॥ ८ । ३ । १३६ ॥ इति पञ्चम्यर्थे सप्तमी, अतश्चन्द्रेभ्योऽपि निर्मलतराः सकलकर्ममलापगमात्, पाठान्तरं वा चन्देहिं निम्मलयरा, एवमादित्येभ्योऽप्यधिकं प्रकाशकराः, केवलोद्द्योतेन लोकालोकप्रकाशकत्वात् ।

उक्तं च—

[1]चंदाइच्चगहाणं पहा पयासेइ परिमिअं खित्तं ।

केवलिअनाणलम्भो लोआलोअं पयासेइ ॥ १ ॥

सागरवरः स्वयम्भूरमणाख्यः समुद्रः, परीषहोपसर्गाद्यक्षोभ्यत्वात् तस्मादपि गम्भीराः, सिद्धाः कर्मविगमात् कृतकृत्याः, सिद्धिं परमपदप्राप्तिम्, मम दिशन्तु प्रयच्छन्तु । एवं चतुर्विंशतिस्तवमुक्त्वा सर्वलोक एवाऽर्हच्चैत्यानां वन्दनाद्यर्थं कायोत्सर्गकरणायेदं पठति, पठन्ति वा। सव्वलोए अरिहंतचेइआणं करेमि काउसग्गमित्यादि वोसिरामीति यावत् । व्याख्या पूर्ववत् । नवरम्, सर्वश्चासौ लोकश्च अधस्तिर्यगूर्ध्वभेदस्तस्मिंस्त्रैलोक्ये इत्यर्थः, अधोलोके हि चमरादिभवनेषु, तिर्यग्लोके द्वीपाचलज्योतिष्कविमानादिषु, ऊर्ध्वलोके सौधर्मादिषु सन्त्येवार्हच्चैत्यानि, ततश्च मौलचैत्यं समाधिकारणमिति मूलप्रतिमायाः प्राक् स्तुतिरुक्ता । इदानीं सर्वेऽर्हन्तस्तद्गुणा

---

(१) चन्द्रादित्यग्रहाणां प्रभा प्रकाशयति परिमितं क्षेत्रम् ।
केवलिकज्ञानलाभो लोकालोकं प्रकाशयति ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति सर्वलोकसंग्रहः, तदनुसारेण सर्वतीर्थंकरसाधारणी स्तुतिः। अन्यथा अन्यकायोत्सर्गे अन्या स्तुतिरिति न सम्यगतिप्रसङ्गादिति सर्वतीर्थकराणां स्तुतिरुक्ता। इदानीं येन ते भगवन्तस्तदभिहिताश्च भावाः स्फुटमुपलभ्यन्ते तत्प्रदीपस्थानीयं सम्यक् श्रुतमर्हति कीर्तनम्, तत्राऽपि तत्प्रणेतॄन् भगवतः प्रथमं स्तौति—

पुक्खरवरदीवड्ढे धायइखंडे अ जम्बुद्दीवे अ।
भरहेरवयविदेहे धम्माइगरे नमंसामि ॥ १ ॥

भरतं भरतक्षेत्रम्, ऐरवतमैरवतक्षेत्रम्, विदेहमिति भीमो भीमसेन इति न्यायाद् महाविदेहक्षेत्रम्, एवं समाहारद्वन्द्वः, तेषु भरतैरवतविदेहेषु धर्मस्य श्रुतधर्मस्यादिकरान् सूत्रतः प्रथमकरणशीलान्, नमस्यामि स्तुवे। क्व यानि भरतैरवतमहाविदेहक्षेत्राणि ?, इत्याह—पुष्कराणि पद्मानि, तैर्वरः पुष्करवरः स चासौ द्वीपश्च पुष्करवरद्वीपः तृतीयो द्वीपः, तस्यार्धं मानुषोत्तराचलादर्वाग्भागवर्ति, तत्र द्वे भरते, द्वे ऐरवते, द्वे महाविदेहे, तथा धातकीनां खण्डानि वनानि यस्मिन् स धातकीखण्डो द्वीपः तस्मिन्; द्वे भरते, द्वे ऐरवते, द्वे महाविदेहे। जम्ब्वा उपलक्षितः तत्प्रधानो वा द्वीपो जम्बूद्वीपः, अत्रैकं भरतमेकमैरवतमेकं च महाविदेहमित्येताः पञ्चदशकर्मभूमयः, शेषास्त्वकर्मभूमयः। यदाह—"भरतैरवतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः" (तत्त्वा-३।१६) महत्तरक्षेत्रप्राधान्याङ्गीकरणात्पश्चानुपूर्व्या निर्देशः। धर्मादिकरत्वं यथा भगवतां भवति तथा अपौरुषेयवादनिराकरणावसरे प्राग्निर्णीतम्। नन्वेवमपि कथं धर्मादिकरत्वं भगवताम्, 'तप्पुव्विआ अरहया'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति वचनात् वचनस्यानादित्वात् ? । नैवम्, बीजाङ्कुरवत्तदुपपत्तेः–बीजाद्धि अङ्कुरो भवति अङ्कुराच्च बीजमिति । एवं भगवतां पूर्वजन्मनि श्रुतधर्माभ्यासात्तीर्थंकरत्वम्, तीर्थकृतां च श्रुतधर्मादिकरत्वमदुष्टमेव । नचाऽयं नियमः श्रुतधर्मपूर्वकमेवार्हत्त्वमिति, मरुदेव्यादीनां श्रुतधर्मपूर्वकत्वाभावेऽपि केवलज्ञानश्रवणादित्यलं प्रसङ्गेन । एवं श्रुतधर्मादिकराणां स्तुतिरुक्ता । इदानीं श्रुतधर्मस्याह—

तमतिमिरपडलविद्धंसणस्स सुरगणनरिंदमहिअस्स ।

सीमाधरस्स वंदे पप्फोडिअमोहजालस्स ॥ २ ॥

तमोऽज्ञानम्, तदेव तिमिरम्, अथवा बद्धस्पृष्टनिधत्तं ज्ञानावरणीयं कर्म तमः ; निकाचितं तिमिरं, ततस्तमस्तिमिरस्य, तमस्तिमिरयोर्वा पटलं वृन्दम्, तद्विध्वंसयति विनाशयतीति नन्द्यादित्वादने तमस्तिमिरपटलविध्वंसनस्तस्य, अज्ञाननिरासेनैवाऽस्य प्रवृत्तेः । सुरगणैश्चतुर्विधाऽमरनिकायैर्नरेन्द्रैश्चक्रवर्त्यादिभिर्महितः पूजितस्तस्य । आगममहिमानं हि कुर्वन्त्येव सुरासुरादयः । सीमां मर्यादाम्, सीमायां वा धारयतीति सीमाधरस्तस्य, श्रुतधर्म इति विशेष्यम्, ततः कर्मणि द्वितीया, तस्याश्च "क्वचिद् द्वितीयादेः" ॥ ८ । ३ । १३४ ॥ इति प्राकृतसूत्रात् षष्ठी, अतस्तं वन्दे, तस्य वा यन्माहात्म्यं तद्वन्दे इति सम्बन्धे षष्ठी ; अथवा तस्य वन्दे वन्दनं करोमीति । प्रकर्षेण स्फोटितं विदारितम्, मोहजालं मिथ्यात्वादिरूपं येन स तथा तस्य । श्रुतधर्मे हि सति विवेकिनो मोहजालं मिथ्यात्वादिरूपं विलयमुपयात्येव ॥ इत्थं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रुतमभिवन्द्य तस्यैव गुणोपदर्शनद्वारेणाऽप्रमादगोचरतां प्रतिपादयन्नाह—

जाईजरामरणसोगपणासणस्स
कल्लाणपुक्खलविसालसुहावहस्स ।
को देवदाणवनरिंदगणच्चिअस्स
धम्मस्स सारमुवलब्भ करे पमायम् ? ॥ ३ ॥

कः सचेतनः, धर्मस्य श्रुतधर्मस्य, सारं सामर्थ्यम्, उपलभ्य विज्ञाय श्रुतधर्मोदितेऽनुष्ठाने प्रमादमनादरं कुर्यात्?, न कश्चित् कुर्यादित्यर्थः । किंविशिष्टस्य श्रुतधर्मस्य?, जातिर्जन्म, जरा विस्रसा, मरणं प्राणनाशः, शोको मानसो दुःखविशेषः, तान् प्रणाशयति अपनयति, जातिजरामरणशोकप्रणाशनः तस्य, श्रुतधर्मोक्तानुष्ठानाद्धि जात्यादयः प्रणश्यन्त्येव, अनेनास्यानर्थप्रतिघातित्वमुक्तम् । कल्यमारोग्यमणति शब्दयति इति कल्याणम्, पुष्कलं सम्पूर्णम्, न च तदल्पं किन्तु विशालं विस्तीर्णमेवम्भूतं सुखमावहति प्रापयतीति कल्याणपुष्कलविशालसुखावहः तस्य, तथाच श्रुतधर्मोक्तानुष्ठानादुक्तलक्षणमपवर्गसुखमवाप्यत एव, अनेन चाऽस्य विशिष्टार्थप्रापकत्वमाह । देवानां दानवानां नरेन्द्राणां च गणैरर्चितस्य पूजितस्य, सुरगणनरेन्द्रमहितस्य इति, अस्यैव निगमनं देवदानवेत्यादि । यतश्चैवमतः—

सिद्धे भो ! पयओ नमो जिणमए नंदी सया संयमे
देवंनागसुवण्णकिन्नरगणस्सब्भूअभावच्चिए ।
लोगो जत्थ पइट्ठिओ जगमिणं तेलुक्कमच्चासुरं
धम्मो वड्ढउ सासयं विजयओ धम्मुत्तरं वड्ढउ ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिद्ध: फलाव्यभिचारेण प्रतिष्ठित:, अथवा सिद्ध: सकलनयव्यापकत्वेन त्रिकोटिपरिशुद्धत्वेन च प्रख्यातस्तस्मिन्, भो इत्यतिशयिनामामन्त्रणम्. पश्यन्तु भवन्त:, प्रयतोऽहं यथाशक्त्येतावन्तं कालं प्रकर्षेण, यत: इत्थं परसाक्षिकं प्रयतो भूत्वा पुनर्नमस्करोति. नमो जिणमए नमो जिनमताय, प्राकृतत्वाच्चतुर्थ्या: सप्तमी। अस्मिंश्च सति नन्दि: समृद्धि:। सदा सर्वकालम्, संयमे चारित्रे भूयात्। उक्तं च—(¹)'पढमं नाणं तओ दया'। किं विशिष्टे संयमे ?, देवनागसुपर्णकिन्नरगणै: सद्भूतभावेनार्चिते—देवा विमानिन:, नागा धरणादय:. सुपर्णा गरुडा:, किन्नरा व्यन्तरविशेषा: उपलक्षणं शेषाणां, देवमित्यनुस्वार: छन्द:पूरणे, तथा च संयमवन्तोऽर्च्यन्त एव देवादिभि:। यत्र जिनमते, किं यत्र ?,लोकनं लोकी ज्ञानम्, प्रतिष्ठित: तद्वशीभूत:, तथा जगदिदं ज्ञेयतया प्रतिष्ठितमिति योग: ; केचिन्मनुष्यलोकमेव जगन्मन्यन्ते, अत आह—त्रैलोक्यमर्त्यासुरमाधाराधेयरूपम्। अयमित्थम्भूतो धर्म: श्रुतधर्मो वर्धतां वृद्धिमुपयातु, शाश्वतमिति क्रियाविशेषणं शाश्वतमप्रच्युत्या वर्धतामिति ; विजयत: परवादिविजयेन, धर्मोत्तरं चारित्रधर्मोत्तरं वर्धताम्, पुनर्वृद्ध्यभिधानं मोक्षार्थिना प्रत्यहं ज्ञानवृद्धि: कार्य्या इति प्रदर्शनार्थम्। तथाच तीर्थंकरनामकर्महेतून् प्रतिपादयतोक्तम्—'अपुव्वनाणगहणे' इति। प्रणिधानमेतन्मोक्षबीजकल्पं परमार्थतोऽनाशंसारूपमेवेति प्रणिधानं कृत्वा श्रुतस्यैव वन्दनाद्यर्थं कायो-

(१) प्रथमं ज्ञानं ततो दया।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्सर्गार्थं पठति पठन्ति वा। सुअस्स भगवओ करेमि काउसग्ग-मित्यादि वोसिरामीति यावदर्थः पूर्ववत्। नवरम्—श्रुतस्येति प्रवचनस्य सामायिकादेर्बिन्दुसारपर्यन्तस्य भगवतो यशोमाहात्म्यादियुक्तस्य, ततः कायोत्सर्गकरणं पूर्ववत्पारयित्वा श्रुतस्य स्तुतिं पठति। ततश्च अनुष्ठानपरम्पराफलभूतेभ्यः सिद्धेभ्यो नमस्कार-करणायेदं पठति पठन्ति वा—

सिद्धाणं बुद्धाणं पारगयाणं परम्परगयाणं।
लोअग्गमुवगयाणं नमो सया सव्वसिद्धाणं ॥ १ ॥

सिद्ध्यन्ति स्म सिद्धाः ये येन गुणेन निष्पन्नाः परिनिष्ठिताः सिद्धौदनवद् न पुनः साधनीया इत्यर्थः, तेभ्यो नम इति योगः। ते च सामान्यतः कर्मादिसिद्धा अपि भवन्ति,

यथोक्तम्—

[1]कम्मे सिप्पे य विज्जाअ मंते जोगे य आगमे।
अत्थ जत्ता अभिप्पाए तवे कम्मक्खए इअ ॥ १ ॥

तत्र कर्म आचार्योपदेशरहितं भारवहनकृषिवाणिज्यादि, तत्र सिद्धः, परिनिष्ठितः, सह्यगिरिसिद्धवत्। शिल्पं त्वाचार्योपदेशजं तत्र सिद्धः, कोकासवर्धकिवत्। विद्या जपहोमादिना फलदा, मन्त्रो जपादि-रहितः पाठमात्रसिद्धः; स्त्रीदेवताऽधिष्ठाना विद्या, पुरुषदेवताधि-

---

(१) कर्मणि शिल्पे च विद्यायां मन्त्रे योगे चागमे।
अर्थे यात्रायामभिप्राये तपसि कर्मक्षय इति ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्ठानस्तु मन्त्रः । तत्र विद्यासिद्ध आर्यखपुटवत्, मन्त्रसिद्धः स्तम्भाकर्षकवत् । योग औषधिसंयोगः, तत्र सिद्धो योगसिद्धः आर्यसमितवत्, आगमो द्वादशाङ्गं प्रवचनं तत्राऽसाधारणार्थावगमात्सिद्धः आगमसिद्धो गौतमवत्, अर्थो धनम्, स इतरासाधारणो यस्य सोऽर्थसिद्धो मम्मणवणिग्वत् । जले स्थले वा यस्याऽविघ्ना यात्रा स यात्रासिद्धस्तुण्डिकवत् । यमर्थमभिप्रैति तमर्थं तथैव यः साधयति सोऽभिप्रायसिद्धोऽभयकुमारवत् । यस्य सर्वोत्कृष्टं तपः स तपःसिद्धो दृढप्रहारिवत् । यः कर्मक्षयेण ज्ञानावरणीयाद्यष्टकर्मनिर्मूलनेन सिद्धः स कर्मक्षयसिद्धो मरुदेवीवत् । अतः कर्मादिसिद्धव्यपोहेन कर्मक्षयसिद्धपरिग्रहार्थमाह—बुद्धेभ्यः अज्ञाननिद्राप्रसुप्ते जगति अपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः, बुद्धत्वानन्तरं कर्मक्षयं कृत्वा सिद्धा इत्यर्थः, तेभ्यः । एते च संसारनिर्वाणोभयपरित्यागस्थितिमन्तः कैश्चिदिष्यन्ते—

न संसारे न निर्वाणे स्थितो भुवनभूतये ।
अचिन्त्यः सर्वलोकानां चिन्तारत्नाधिको महान् ॥ १ ॥

इति वचनात् । एतन्निरासार्थमाह—पारगतेभ्यः पारं पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा, गताः पारगताः तेभ्यः ; एते च यदृच्छावादिभिः कैश्चिद्दरिद्रराज्याप्तिवदक्रमसिद्धत्वेनाऽभिधीयन्ते, तद्दुरादासार्थमाह—परम्परगयाणं—परम्परया चतुर्दशगुणस्थानक्रमारोहरूपया, अथवा कथञ्चित् कर्मक्षयोपशमादिसामग्र्या सम्यग्दर्शनं तस्मात् सम्यग्ज्ञानं तस्मात् सम्यक्चारित्रमित्येवम्भूतया गता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुक्तिस्थानं प्राप्ताः परम्परागताः तेभ्यः । एते च केचिदनियतदेशा अभ्युपगम्यन्ते,

यत्र क्लेशक्षयस्तत्र विज्ञानमवतिष्ठते ।

बाधा च सर्वथाऽस्येह तदभावान्न जातुचित् ॥ १ ॥

इति वचनात्, एतन्निरासायाह लोकाग्रमुपगतेभ्यः लोकाग्रमीषत्प्राग्भाराख्यायाः पृथिव्या उपरिक्षेत्रं तदुप सामीप्येन तदपराभिन्नदेशतया निःशेषकर्मक्षयपूर्वकं गताः प्राप्ताः ।

उक्तं च—

[१] जत्थ य एगो सिद्धो तत्थ य अणंता भवक्खयविमुक्का ।

अन्नोन्नमणाबाहं चिट्ठंति सुही सुहं पत्ता ॥ १ ॥

तेभ्यः । ननु क्षीणकर्मणो जीवस्य कथं लोकाग्रं यावद्गतिः ? ।

उच्यते—पूर्वप्रयोगादियोगात् ।

यदाह—

पूर्वप्रयोगसिद्धेर्बन्धच्छेदादसङ्गभावाच्च ।

गतिपरिणामाच्च तथा सिद्धस्योर्ध्वं गतिः सिद्धा ॥ १ ॥

ननु सिद्धिक्षेत्रात्परतोऽधस्तिर्यग्वा कस्मान्न गच्छन्ति ?,

अत्राऽप्युक्तम्—

नाऽधो गौरवविगमादसङ्गभावाच्च गच्छति विमुक्तः ।

लोकान्तादपि न परं प्लवक इवोपग्रहाभावात् ॥ १ ॥

---

(१) यत्र चैकः सिद्धस्तत्र चानन्ता भवक्षयविमुक्ताः ।

अन्योन्यमनाबाधं तिष्ठन्ति सुखिनः सुखं प्राप्ताः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगप्रयोगयोश्चाभावात्तिर्यङ्न तस्य गतिरस्ति।
तस्मात्सिद्धस्योर्ध्वं ह्यालोकान्ताद्गतिर्भवति ॥ २ ॥ इति ॥

नमः सदा सर्वसिद्धेभ्यः—नमो नमोऽस्तु, सदा सर्वकालं, सर्वसिद्धेभ्यः—सर्वं साध्यं सिद्धं येषां ते सर्वसिद्धाः तेभ्यः, अथवा सर्वसिद्धेभ्यः तीर्थसिद्धादिभेदेभ्यः, यथोक्तम्—'[1]तित्थसिद्धा १ अतित्थसिद्धा २ तित्थयरसिद्धा ३ अतित्थयरसिद्धा ४ सयंबुद्धसिद्धा ५ पत्तेयबुद्धसिद्धा ६ बुद्धबोहिअसिद्धा ७ थीलिङ्गसिद्धा ८ पुरिसलिङ्गसिद्धा ९ नपुंसकलिङ्गसिद्धा १० सलिङ्गसिद्धा ११ अन्नलिङ्गसिद्धा १२ गिहिलिङ्गसिद्धा १३ एगसिद्धा १४ अणेगसिद्धा १५। तत्र तीर्थे चतुर्विधश्रमणसङ्घे उत्पन्ने सति ये सिद्धाः ते तीर्थसिद्धाः।१। अतीर्थे जिनान्तरे साधुव्यवच्छेदे सति जातिस्मरणादिनाऽवाप्तापवर्गमार्गाः सिद्धाः अतीर्थसिद्धाः, मरुदेवीप्रभृतयो वा, तदा तीर्थस्याऽनुत्पन्नत्वात्।२। तीर्थकरसिद्धाः तीर्थकरत्वमनुभूय सिद्धाः।३। अतीर्थकरसिद्धाः सामान्यकेवलित्वे सति सिद्धाः।४। स्वयं बुद्धाः सन्तो ये सिद्धाः ते स्वयंबुद्धसिद्धाः।५। प्रत्येकबुद्धाः सन्तो ये सिद्धाः ते प्रत्येकबुद्धसिद्धाः।६। स्वयम्बुद्धप्रत्येकबुद्धयोश्च बोध्युपधिश्रुतलिङ्गकृतो विशेषः—स्वयंबुद्धा हि बाह्यप्रत्ययमन्त-

---

(१) तीर्थसिद्धाः, अतीर्थसिद्धाः, तीर्थकरसिद्धाः, अतीर्थकरसिद्धाः, स्वयंबुद्धसिद्धाः, प्रत्येकबुद्धसिद्धाः बुद्धबोधितसिद्धाः, स्त्रीलिङ्गसिद्धाः, पुरुषलिङ्गसिद्धाः, नपुंसकलिङ्गसिद्धाः, स्वलिङ्गसिद्धाः, अन्यलिङ्गसिद्धाः, गृहिलिङ्गसिद्धाः, एकसिद्धाः, अनेकसिद्धाः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रेण बुध्यन्ते, प्रत्येकबुद्धास्तु बाह्यप्रत्ययेन वृषभादिना करकण्ड्वादिवत्, उपधिस्तु स्वयंबुद्धानां पात्रादिर्द्वादशधा, प्रत्येकबुद्धानां प्रावरणवर्जो नवविधः ; स्वयंबुद्धानां पूर्वाधीतश्रुतेऽनियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव ; लिङ्गप्रतिपत्तिस्तु स्वयंबुद्धानां गुरुसन्निधावपि भवति, प्रत्येकबुद्धानां तु देवता लिङ्गं प्रयच्छति ; बुद्धा आचार्या अवगततत्त्वाः तैर्बोधिताः सन्तो ये सिद्धाः ते बुद्धबोधितसिद्धाः ।७। एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः, केचित् पुंलिङ्गसिद्धाः, केचित् नपुंसकलिङ्गसिद्धाः। ननु तीर्थकरा अपि किं स्त्रीलिङ्गसिद्धा भवन्ति ?, उच्यते, भवन्त्येव—यदुक्तं सिद्धप्राभृते—'सव्वत्थोवा तित्थयरिसिद्धा, तित्थयरतित्थे नोतित्थयरसिद्धा असंखिज्जगुणा, तित्थयरितित्थे नोतित्थयरिसिद्धाओ असंखिज्जगुणाओ, तित्थयरितित्थे नोतित्थयरसिद्धा असंखिज्जगुणा इति। नपुंसकलिङ्गसिद्धास्तु तीर्थकरसिद्धा न भवन्त्येव, प्रत्येकबुद्धसिद्धास्तु पुंलिङ्गसिद्धा एव।८।९।१०। स्वलिङ्गेन रजोहरणादिना द्रव्यलिङ्गेन सिद्धाः स्वलिङ्गसिद्धाः ।११। अन्येषां परिव्राजकादीनां लिङ्गेन सिद्धा अन्यलिङ्गसिद्धाः। १२। गृहिलिङ्गसिद्धा मरुदेव्यादयः ।१३। एकैकस्मिन् समये एकाकिनः सिद्धाः एकसिद्धाः ।१४। एकस्मिन् समये अष्टोत्तरं शतं यावत् सिद्धा अनेकसिद्धाः ।१५। यत उक्तम्—

(१) सर्वस्तोकास्तीर्थकरीसिद्धास्तीर्थकरतीर्थे नोतीर्थकरसिद्धा असंख्येयगुणाः, तीर्थकरीतीर्थे नोतीर्थकरीसिद्धा असंख्येयगुणाः, तीर्थकरीतीर्थे नोतीर्थकरसिद्धा असंख्येयगुणाः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]बत्तीसा अडयाला सट्ठी बाहत्तरी य बोद्धव्वा ।
चुलसीई छन्नउई दुरहिअमट्ठोत्तरसयं च ॥ १ ॥

नन्वेते सिद्धभेदाः आद्ययोस्तीर्थसिद्धाऽतीर्थसिद्धयोरेवाऽन्तर्भवन्ति, तीर्थकरसिद्धादयो हि तीर्थसिद्धा वा स्युरतीर्थसिद्धा वेति । सत्यम्, सत्यप्यन्तर्भावे पूर्वभेदद्वयादेवोत्तरभेदाप्रतिपत्तेरज्ञातज्ञापनार्थं भेदाभिधानमदुष्टमिति । इत्थं सामान्येन सर्वसिद्धनमस्कारं कृत्वा आसन्नोपकारित्वाद्वर्तमानतीर्थाधिपतेः श्रीमन्महावीरवर्धमानस्वामिनः स्तुतिं करोति—

जो देवाण वि देवो जं देवा पंजली नमंसंति ।
तं देवदेवमहिअं सिरसा वन्दे महावीरं ॥ २ ॥

यो भगवान् महावीरो देवानामपि भवनवास्यादीनां पूज्यत्वाद् देवः, अत एवाह—यं देवाः प्राञ्जलयो विनयरचितकरसम्पुटाः सन्तो नमस्यन्ति प्रणमन्ति, तं भगवन्तं देवदेवैः शक्रादिभिर्महितं पूजितम्, वन्दे शिरसा उत्तमाङ्गेन आदरप्रदर्शनार्थं चैतत् । तं कं? महावीरम्, विशेषेण ईरयति कर्म गमयति याति वा शिवमिति वीरः, महांश्चासौ वीरश्च महावीरस्तम् । इत्थं स्तुतिं कृत्वा पुनः परोपकाराय आत्मभाववृद्धये च फलप्रदर्शनपरमिदं पठति—

इक्को वि नमुक्कारो जिणवरवसहस्स वद्धमाणस्स ।
संसारसागराओ तारेइ नरं व नारिं वा ॥ ३ ॥

---

(१) द्वात्रिंशदष्टचत्वारिंशत् षष्टिर्द्वासप्ततिश्च बोद्धव्याः ।
चतुरशीतिः षण्णवतिर्द्विरहितमष्टोत्तरशतं च ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकोऽप्यासतां बहवः, नमस्कारो द्रव्यभावसंकोचलक्षणः, जिनवरवृषभाय—जिनाः श्रुतावधिजिनादयः तेषां वराः केवलिनस्तेषां वृषभः तीर्थंकरनामकर्मोदयादुत्तमो जिनवरवृषभस्तस्मै। स च ऋषभादिरपि भवतीत्याह—वर्धमानाय यत्नात्कृतः सन्निति शेषः। किम्? संसरणं संसारस्तिर्यग्नरनारकाऽमरभवाऽनुभावलक्षणः स एव भवस्थितिकायस्थितिभ्यामनेकधावस्थानेनाऽलब्धपारत्वात्सागर इव संसारसागरः, तस्मात् तारयति पारं नयतीत्यर्थः। कमित्याह?—नरं वा नारीं वा-नरग्रहणं पुरुषोत्तमधर्मप्रतिपादनार्थम्, नारीग्रहणं तासामपि तद्भव एव संसारक्षयो भवतीति ज्ञापनार्थम्। यथोक्तं यापनीयतन्त्रे—

[1]नो खलु इत्थी अजीवो, न यावि अभव्वा, न यावि दंसणविरोहिणी, नो अमाणुस्सा नो अणायरियउप्पन्ना, नो असंखेज्जाउआ, नो अइकूरमई, नो अणुवसन्तमोहा, नो असुद्धाचारा, नो असुद्धबोंदी, नो ववसायवज्जिआ, नो अपुव्वकरणविरोहिणी, नो नवगुणट्ठाणरहिआ, नो अजोगा लद्धीए, नो अकल्लाणभायणं ति कहं न उत्तमधम्मस्स साहगा? इति।

---

(१) नो खलु स्त्री अजीवः, न चाप्यभव्या, न चापि दर्शनविरोधिनी, नो अमानुष्य', नो अनार्योत्पन्ना, नो असंख्येयायुष्का, नो अतिक्रूरमतिः, नो अनुपशान्तमोहा, नो अशुद्धाचारा, नो अशुद्धशरीरा, नो व्यवसायवर्जिता, नो अपूर्वकरणविरोधिनी, नो नवगुणस्थानरहिता, नो अयोग्या लब्धाः, नो अकल्याणभाजनमिति कथं नोत्तमधर्मस्य साधिका? इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयमत्र भावः, सति सम्यग्दर्शने परया भावनया क्रियमाण एकोऽपि नमस्कारस्तथाभूतस्याध्यवसायस्य हेतुर्भवति यथाभूतात् श्रेणिमवाप्य निस्तरति भवोदधिमिति। अतः कार्ये कारणोपचारादेवमुच्यते। न च चारित्रस्य वैफल्यम्, तथाभूताध्यवसायस्यैव चारित्ररूपत्वादिति। एतास्तिस्रः स्तुतयो गणधरकृतत्वाद् नियमेनोच्यन्ते, केचित्तु अन्ये अपि स्तुती पठन्ति—

यथा—

उज्जिंतसेलसिहरे दिक्खा नाणं निसीहिया जस्स

तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमंसामि ॥ ४ ॥

चत्तारि अट्ठ दस दो अ वंदिआ जिणवरा चउवीसं ।

परमट्ठनिट्ठिअट्ठा सिद्धा सिद्धिं मम दिसंतु ॥ ५ ॥

सुगमे। एवमेतत्पठित्वोपचितपुण्यसम्भार उचितेष्वौचित्येन प्रवृत्तिरिति ज्ञापनार्थं पठति पठन्ति वा वेयावच्चगराणं सन्तिगराणं सम्मदिट्ठिसमाहिगराणं करेमि काउस्सग्गं वैयावृत्त्यकराणां प्रवचनार्थं व्यापृतभावानां गोमुखयक्षाऽप्रतिचक्राप्रभृतीनां शान्तिकराणां सर्वलोकस्य सम्यग्दृष्टिविषये समाधिकराणाम्, एषां सम्बन्धिनां षष्ठ्याः सप्तम्यर्थत्वादेतद्विषयमेतान् वाश्रित्य करोमि कायोत्सर्गम्। अत्र वन्दनादिप्रत्ययमित्यादि न पठ्यते, अपि तु अन्यत्रोच्छ्वसितेनेत्यादि, तेषामविरतत्वात्, इत्थमेव तद्भाववृद्धेरुपकारदर्शनात्। एतद्व्याख्या च पूर्ववत्। नवरं स्तुतिर्वैयावृत्त्यकराणां पुनस्तेनैव विधिना उपविश्य पूर्ववत् प्रणिपातदण्डकं पठित्वा मुक्ताशुक्तिमुद्रया प्रणिधानं कुर्वन्ति।

5119

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा—

जय वीयराय ! जगगुरु ! होउ मम तुह पभावओ भयवं ! ।
भवनिव्वेओ मग्गाणुसारिआ इट्ठफलसिद्धी ॥ १ ॥
लोगविरुद्धच्चाओ गुरुजणपूआ परत्थकरणं च ।
सुहगुरुजोगो तव्वयणसेवणा आभवमखण्डा ॥ २ ॥

जय वीतराग ! जगद्गुरो ! इति भगवतस्त्रिलोकनाथस्य बुद्धां सन्निधानार्थमामन्त्रणम्, भवतु जायतां ममेत्यात्मनिर्देशः, तव प्रभावतः तव सामर्थ्येन, भगवन्निति पुनः सम्बोधनं भक्त्यतिशयख्यापनार्थम् । किं तदित्याह—भवनिर्वेदः संसारनिर्वेदः । न हि भवादनिर्विण्णो मोक्षाय यतते, अनिर्विण्णस्य तत्प्रतिबन्धान्मोक्षे यत्नोऽयत्न एव, निर्जीवक्रियातुल्यत्वात् । तथा मार्गाऽनुसारिता असद्ग्रहविजयेन तत्त्वानुसारिता, तथा इष्टफलसिद्धिरभिमतार्थनिष्पत्तिः ऐहलौकिकी, ययोपगृहीतस्य चित्तस्वास्थ्यं भवति तस्माच्चोपादेयप्रवृत्तिः । तथा लोकविरुद्धत्यागः सर्वजननिन्दादिलोकविरुद्धाऽनुष्ठानवर्जनम् ।

यदाह—

[१]सव्वस्स चेव निंदा विसेसओ तह य गुणसमिद्धाणं ।
उजुधम्मकरणहसणं रीढा जणपूयणिज्जाणं ॥ १ ॥
बहुजनविरुद्धसंगो देसाचारस्स लंघणं चेव ।
उव्वणभोउ अ तहा दाणाइवियडमन्नेओ ॥ २ ॥

---

(१) सर्वस्य चैव निन्दा विशेषतस्तथा च गुणसमृद्धानाम् ।
ऋजुधर्मकरणहसनं रीढा जनपूजनीयानाम् ॥ १ ॥
बहुजनविरुद्धसङ्गो देशाचारस्य लङ्घनं चैव ।
उल्बणभोगश्च तथा दानादिविकटमन्यस्मात् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]साहुवसणम्मि तो सो सइ सामत्थम्मि अपडियारो अ ।

एमाइयाइं इत्थं लोगविरुद्धाइं णेआइं ॥ ३ ॥

गुरुजनस्य पूजा उचितप्रतिपत्तिर्गुरुजनपूजा, गुरवश्च यद्यपि धर्माचार्या एवोच्यन्ते तथापीह मातापित्रादयोऽपि गृह्यन्ते ।

यदुक्तम्—

माता पिता कलाचार्य एतेषां ज्ञातयस्तथा ।

वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥ १ ॥

परार्थकरणं सत्त्वार्थकरणं जीवलोकसारं पौरुषचिह्नमेतत् । सत्येतावति लौकिके सौन्दर्ये लोकोत्तरधर्माधिकारी भवतीत्याह-शुभगुरुयोगो विशिष्टचारित्रयुक्ताचार्यसम्बन्धः, तथा तद्वचनसेवा सद्गुरुवचनसेवना, न जातुचिदयमहितमुपदिशति, आभवमासंसारमखण्डा सम्पूर्णा । इदं च प्रणिधानं न निदानरूपम्, प्रायेण निस्सङ्गाभिलाषरूपत्वात् । एतच्चाप्रमत्तसंयतादर्वाक् कर्तव्यम्, अप्रमत्तादीनां मोक्षेऽप्यनभिलाषात् । तदेवंविधशुभफलप्रणिधानपर्यन्तं चैत्यवन्दनम् ॥ १२४ ॥

इदानीमनन्तरकरणीयमाह —

ततो गुरूणामभ्यर्णे प्रतिपत्तिपुरःसरम् ।

विदधीत विशुद्धात्मा प्रत्याख्यानप्रकाशनम् ॥ १२५ ॥

---

(१) साधुव्यसने तु स सति सामर्थ्येऽप्रतिकारश्च ।

एवमादिकानि इत्थं लोकविरुद्धानि ज्ञेयानि ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततोऽनन्तरं गुरूणां धर्माचार्य्याणां देववन्दनार्थमागतानां स्नात्रादिदर्शनधर्मकथाद्यर्थं तत्रैव स्थितानामभ्यर्णे उचिते समीपे, उचितत्वं चार्धचतुर्थहस्तप्रमाणात् चैत्याद् बहिरवस्थानम्, प्रतिपत्तिर्व्याख्यास्यमाना वन्दनकादिरूपा वा, तत्पुरःसरं तत्पूर्वकं, विदधीत कुर्य्यात्, विशुद्धात्मा निर्मलचित्तो न तु दम्भादियुक्तः, प्रत्याख्यानस्य देवसमीपे कृतस्य प्रकाशनं गुरोः पुरतः प्रकटनम्; त्रिविधं हि प्रत्याख्यानविधानमात्मसाक्षिकं देवसाक्षिकं गुरुसाक्षिकं च ॥ १२५ ॥

प्रतिपत्तिपुरःसरमित्युक्तमिति गुरुप्रतिपत्तिं श्लोकद्वयेन दर्शयति—

अभ्युत्थानं तदालोकेऽभियानं च तदागमे ।
शिरस्यञ्जलिसंश्लेषः स्वयमासनढौकनम् ॥१२६॥
आसनाऽभिग्रहो भक्त्या वन्दना पर्य्युपासनम् ॥
तद्यानेऽनुगमश्चेति प्रतिपत्तिरियं गुरोः ॥ १२७ ॥

अभ्युत्थानं ससम्भ्रममासनत्यागः, तदालोके गुरूणामालोकने सति, अभियानमभिमुखं गमन तदागमे गुर्वागमे, शिरसि मस्तके गुरुदर्शनसमकालमञ्जलिसंश्लेषः करकोरककरणं नमो खमासमणाणंति वचनोच्चारपूर्वकं स्वयमित्यात्मना न तु परप्रेषणेन आसनढौकनमासनसन्निधापनम् ॥१२६॥ आसनाऽभिग्रहः आसन उपविष्टेषु गुरुषु स्वयमासितव्यमित्यभिग्रहः आसनाभिग्रहः, भक्त्या भक्तिपूर्वकं वन्दना पञ्चविंशत्यावश्यकविशुद्धं वन्दनं स्थानस्थितानां च गमनादिव्याकुलत्वाभावे पर्य्युपासनं सेवा, तेषां गुरूणां याने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गमनेऽनुगमनं पृष्ठतः कतिपयपदानुसरणमियं प्रतिपत्तिरुपचार-विनयरूपा गुरोर्धर्माचार्यस्य ॥ १२७ ॥

ततो गुरुपार्श्वे धर्मदेशनां श्रुत्वा—

ततः प्रतिनिवृत्तः सन् स्थानं गत्वा यथोचितम् ।
सुधीर्धर्माऽविरोधेन विदधीतार्थचिन्तनम् ॥ १२८ ॥

ततो देवगृहात् प्रतिनिवृत्तो व्यावृत्तः सन् यथोचितं स्थानं गत्वा यथोचितमिति यदा राजादिस्तदा धवलगृहं यद्यमात्यादिस्तदा करणम्; अथ वणिगादिस्तदा आपणमिति सुधीर्बुद्धिमान् विदधीत अर्थचिन्तनमर्थोपायचिन्तां धर्माविरोधेनेति धर्मस्य जिनधर्मस्य अविरोधेन अबाधया। अत्र चार्थचिन्तनमित्यनुवाद्यं तस्य स्वतःसिद्धत्वात्, धर्माविरोधेनेति विधेयमप्राप्तत्वात्। धर्माविरोधश्च राज्ञां दरिद्रेश्वरयोर्मान्यामान्ययोरुत्तमनीचयोर्माध्यस्थेन न्यायदर्शनात्, नियोगिनां च राजार्थप्रजार्थसाधनेन, वणिजां च कूटतुलाकूटमानादिपरिहारेण पञ्चदशकर्मादानपरिहारेण च बोद्धव्यः ॥ १२८ ॥

ततो माध्याह्निकीं पूजां कुर्यात् कृत्वा च भोजनम् ॥
तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥ १२९ ॥

ततस्तदनन्तरं माध्याह्निकीं मध्याह्नकालभाविनीं पूजां जिनसपर्यां कुर्यात् कृत्वा विधाय च भोजनमित्यनुवादः। माध्याह्निकीपूजाभोजनयोश्च न कालनियमः। तीव्रबुभुक्षोर्हि बुभुक्षा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालो भोजनकाल इति रूढेर्मध्याह्नादर्वागपि गृहीतप्रत्याख्यानं तीरयित्वा देवपूजापूर्वकं भोजनं कुर्वन्न दुष्यति। अत्र चाऽयं विधिः—

'जिनपूओचिअदाणं परियणसम्भालणा उचियकिच्चं।
ठाणुवएसो य तहा पच्चक्खाणस्स सम्भरणं ॥ १ ॥

तथा भोजनाऽनन्तरं सम्भवतो ग्रन्थिसहितादेः प्रत्याख्यानस्य करणं प्रमादपरिजिहीर्षोर्हि प्रत्याख्यानं विना न युक्तं क्षणमप्यासितुम्। शास्त्रार्थानां रहस्यान्यैदंपर्य्याणि विचारयेदिदमित्थं भवति नेति वा सम्प्रधारयेत्, कथं, सह साधं कैस्तद्विद्भिः तच्छास्त्रार्थरहस्यं विदन्ति ये तैः, गुरुमुखात् श्रुतान्यपि शास्त्रार्थरहस्यानि परिशीलनाविकलानि न चेतसि सुदृढप्रतिष्ठानि भवन्तीति कृत्वा ॥ १२९ ॥

ततश्च सन्ध्यासमये कृत्वा देवार्चनं पुनः।
कृतावश्यककर्मा च कुर्यात् स्वाध्यायमुत्तमम् ॥ १३० ॥

ततस्तदनन्तरं यो द्विर्भुङ्क्ते स विकालसमये अन्तर्मुहूर्तादर्वाग् भोजनं कृत्वा सन्ध्यासमये पुनस्तृतीयवारं देवार्चनं कृत्वा साधुसमीपं गत्वा भूमिकौचित्येन षड्विधावश्यकं सामायिक-चतुर्विंशतिस्तव वन्दनक-प्रतिक्रमण-कायोत्सर्ग-प्रत्याख्यानलक्षणं कुर्य्यात्; तत्र सामायिकमार्तरौद्रध्यानपरिहारेण धर्मध्यानपरि-

(१) जिनपूजोचितदानं परिजनसंभालनमुचितकृत्यम्।
स्थानोपदेशश्च तथा प्रत्याख्यानस्य संभरणम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणेन शत्रुमित्रतृणकाञ्चनादिषु समता, तच्च पूर्वमेवोक्तम्। चतुर्विंशतेस्तीर्थकराणां नामोत्कीर्तनपूर्वकं स्तवो गुणकीर्तनं तस्य च कायोत्सर्गे मनसाऽनुध्यानं शेषकालं व्यक्तवर्णपाठः। अयमपि पूर्वमुक्तः। वन्दनं वन्दनायोग्यानां धर्माचार्याणां पञ्चविंशत्यावश्यकविशुद्धं द्वात्रिंशद्दोषरहितं नमस्करणम्। तत्र पञ्चविंशतिरावश्यकानि यथा—

[1]दुओणयं अहाजायं कियकम्मं बारसावयं।
चउसिरं तिगुत्तं च दुपवेसं एगनिक्खमणं ॥ १ ॥ इति ।

द्वे अवनमने इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहियाए इत्यभिधाय गुरोश्छन्दानुज्ञापनाय प्रथममवनमनम्।१। यदा पुनः कृतावर्तो निष्क्रान्त इच्छामीत्यादिसूत्रमभिधाय पुनश्छन्दोऽनुज्ञापनायैव तदा द्वितीयम् २। तथा यथाजातं जातं जन्म तच्च द्वेधा प्रसवः प्रव्रज्याग्रहणं च। तत्र प्रसवकाले रचितकरसंपुटो जायते प्रव्रज्याकाले च गृहीतरजोहरणमुखवस्त्रिक इति यथाजातमस्य स यथाजातस्तथाभूत एव वन्दते इति वन्दनमपि यथाजातम्।३। तथा द्वादशावर्ताः कायचेष्टाविशेषा गुरुचरणन्यस्तहस्तशिरःस्थापनरूपा यस्मिंस्तद् द्वादशावर्तमिह च प्रथमप्रविष्टस्य अहो कायं इत्यादि सूत्रोच्चारणगर्भाः षडावर्ताः निष्क्रम्य पुनः प्रविष्टस्याऽपि त एव षडिति द्वादश।१५। चत्वारि शिरांसि यस्मिन् तच्चतुःशिरः

(१) द्व्यवनतं यथाजातं कृतकर्म द्वादशावर्तम्।
चतुःशिरः त्रिगुप्तं च द्विप्रवेशमेकनिष्क्रमणम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रथमप्रवेशे क्षामणाकाले शिष्याचार्ययोरवनमच्छिरोद्वयम्, निष्क्रम्य पुन: प्रवेशे तथैव च शिरोद्वयम्। १९। त्रिगुप्तं मनोवाक्काय-कर्मभिर्गुप्तम्। २२। तथा प्रथमोऽनुज्ञाप्य प्रवेशो द्वितीय: पुनर्निर्गत्य प्रवेश इति द्वौ प्रवेशौ यत्र तद् द्विप्रवेशमेकं निष्क्रमणमावश्यक्या निर्गच्छतो यत्र तदेकनिष्क्रमणम्। २५।

द्वात्रिंशद्दोषा यथा

[1]अणाढियं च थड्ढं च पविद्धं परिपिंडियं।
टोलगइ अंकुसं चेव तहा कच्छभरिंगिअं॥ १॥
मच्छोव्वत्तं मणसा य पउट्ठं तह य वेइयाबद्धं।
भयसा चेव भयंतं मित्ती गारवकारणा॥ २॥
तेणिअं पडणीअं चेव रुट्ठं तज्जियमेव य।
सढं च हीलिअं चेव तहा विपलिउंचिअं॥ ३॥
दिट्ठमदिट्ठं च तहा सिंगं च करमोअणं।
आलिद्धमनालिद्धं ऊणं उत्तरचूलिअं॥ ४॥

---

(१) अनादृतं च स्तब्धं च प्रविद्धं परिपिण्डितम्।
टोलगति अङ्कुशं च तथा कच्छपरिङ्गितम्॥ १॥
मत्स्योद्वृत्तं मनसा च प्रदुष्टं तथा च वेदिकाबद्धम्।
भयाद् चैव भजमानं मैत्री गौरवकारणम्॥ २॥
स्तैनिकं प्रत्यनीकं चैव रुष्टं तर्जितमेव च।
शठं च हीलितं चैव तथा विपरिकुञ्चितम्॥ ३॥
दृष्टमदृष्टं च तथा शृङ्गं च करमोचनम्।
आश्लिष्टमनाश्लिष्टमूनमुत्तरचूलितम्॥ ४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]मूअं च ढड्ढरं चेव चुडलिं च अपच्छिमं ।
बत्तीसदोसपरिसुद्धं किइकम्मं पउंजए ॥ ५ ॥

अनादृतं सम्भ्रमरहितं वन्दनम् ।१। स्तब्धं मदाष्टकवशीकृतस्य वन्दनम् ।२। प्रविद्धं वन्दनं ददत एव पलायनम् ।३। परिपिण्डितं प्रभूतानां युगपद्वन्दनम्, यद्वा कुक्षेरुपरि हस्तौ व्यवस्थाप्य परिपिण्डितकरचरणस्याऽव्यक्तसूत्रोच्चारणपुरःसरं वन्दनम् ।४। टोलगति तिड्डवदुत्प्लुत्योत्प्लुत्य विसंस्थुलं वन्दनम ।५। अङ्कुशमुपकरणे चोलपट्टकल्पादौ हस्ते वा अवज्ञया समाकृष्य अङ्कुशेन गजस्येवाचार्यस्योर्ध्वस्थितस्य शयितस्य प्रयोजनान्तरव्यग्रस्य वा वन्दनकार्थमासन उपवेशनम् । न हि पूज्याः कदाचिदप्याकर्षणमर्हन्ति, अविनयत्वादस्य, यद्वा रजोहरणमङ्कुशवत्करद्वयेन गृहीत्वा वन्दनम्, यदि वाऽङ्कुशाक्रान्तस्य हस्तिन इव शिरोनमनोन्नमने कुर्वाणस्य वन्दनम् ।६। कच्छपरिङ्गितमूर्ध्वस्थितस्य तित्तिसणयरा इत्यादिसूत्रमुच्चारयत उपविष्टस्य वा अहो कायं काय इत्यादिसूत्रमुच्चारयतोऽग्रतोऽभिमुखं पश्चादभिमुखं च रिङ्गतश्चलतो वन्दनम् ।७। मत्स्योद्वृत्तमुत्तिष्ठन्निविशमानो वा जलमध्ये मत्स्य इवोद्वर्तते उद्वेल्लते यत्र तत् । यद्वा एकं वन्दित्वा द्वितीयस्य साधोर्द्रुतं द्वितीयपार्श्वेन रेचकावर्तेन मत्स्यवत् परावृत्य वन्दनम् । ८ । मनसा प्रदुष्टं शिष्यस्तत्सम्बन्धी वा गुरुणा किञ्चित्परुषमभिहितो यदा भवति तदा मनसो दूषितत्वाद् मनसा प्रदुष्टं, यद्वा वन्द्यो हीनः केनचिद्गुणेन

(१) मूकं च ढड्ढरं चैव चुडलिश्चापश्चिमम् ।
द्वात्रिंशद्दोषपरिशुद्धं कृतिकर्म प्रयुञ्जीत ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततोऽहमेवंविधेनाऽपि वन्दनं दापयितुमारब्ध इति चिन्तयतो वन्दनम् ।९। वेदिकाबद्धं जानुनोरुपरि हस्तौ निवेश्य अधो वा पार्श्वयोर्वा उत्सङ्गे वा जानु करद्वयान्तः कृत्वा वा इति पञ्चभि-र्वेदिकाभिर्बद्धं युक्तं वन्दनम् ।१०। बिभ्यत् सङ्घात् कुलात् गच्छात् क्षेत्राद्वा निष्कासयिष्येऽहमिति भयाद् वन्दनम् ।११। भजमानं भजते मां सेवायां पतितो मम अग्रे वा मम भजनं करिष्यति ततोऽहमपि वन्दनसत्कं निहोरकं निवेशयामीति बुद्ध्या वन्दनम् ।१२। मैत्रीतो मम मित्रमाचार्य इति, आचार्येणेदानीं मैत्री भवत्विति वा वन्दनम् ।१३। गौरवाद्वन्दनकसामाचारीकुशलो-ऽहमिति गर्वादन्येऽप्यवगच्छन्तु मामिति यथावदावर्तादीना-राधयतो वन्दनम् ।१४। कारणाद् ज्ञानादिव्यतिरिक्ताद्वस्त्रादि-लाभहेतोर्वन्दनम्, यद्वा ज्ञानादिनिमित्तमपि लोकपूज्योऽन्येभ्यो वाऽधिकतरो भवामीत्यभिप्रायतो वन्दनम्, यद्वा वन्दनकमूल्य-वशीकृतो मम प्रार्थनाभङ्गं न करिष्यतीति बुद्ध्या वन्दनम् ।१५। स्तैनिकं मम लाघवं भविष्यतीति परेभ्य आत्मानं निगूहयतो वन्दनम्, अयमर्थः—एवं नाम शीघ्रं वन्दते यथा स्तैनवत् केनचिद् दृष्टः केनचिन्नेति ।१६। प्रत्यनीकमाहारादिकाले वन्दनम् ।१७। यदाह—

> [1]वक्खित्तपराहुत्ते पमत्ते मा कयावि वंदिज्जा ।
> आहारं च करिंते नीहारं वा जइ करेइ ॥ १ ॥

---

(१) व्याक्षिप्तपराभूतान् प्रमत्तान् मा कदापि वन्दिष्ठाः ।
आहारं च कुर्वतो नीहारं वा यदि करोति ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुष्टं क्रोधाध्मातस्य गुरोर्वन्दनमात्मना वा क्रुद्धेन वन्दनम् ।१८। तर्जितमवन्द्यमानो न कुप्यसि वन्द्यमानश्चाविशेषज्ञतया न प्रसीदसि इति निर्भर्त्सयतो यद्वा बहुजनमध्ये मां वन्दनं दापयंस्तिष्ठसि ज्ञास्यते मया तवैकाकिन इति धिया तर्जन्या शिरसा वा तर्जयतो वा वन्दनम् ।१९। शठं शाठ्येन विश्रम्भार्थं वन्दनं ग्लानादिव्यपदेशं वा कृत्वा न सम्यग्वन्दनम् ।२०। हीलितं हे गणिन् वाचक ! किं भवता वन्दितेनेत्यादिना अवजानतो वन्दनम् ।२१। विपरिकुंचितम्, अर्धवन्दित एव देशादिकथाकरणम् ।२२। दृष्टादृष्टं तमसि स्थितः केनचिदन्तरित एवमेवास्ते दृष्टस्तु वन्दत इति ।२३। शृङ्गं अहो कायं काय इत्याद्यावर्तानुच्चारयतो ललाटमध्यदेशमस्पृशतः शिरसो वामदक्षिणे शृङ्गे स्पृशतो वन्दनकरणम् ।२४। करः कर इव राजदेयभाग इव अर्हत्प्रणीतो वन्दनककरोऽवश्यदातव्य इति धिया वन्दनम् ।२५। मोचनं लौकिककराद्वयं मुक्ता न मुच्यामहे वन्दनकरादिति बुद्ध्या वन्दनम् ।२६। आश्लिष्टानाश्लिष्टमत्र चतुर्भङ्गी, सा च अहो कायं काय इत्याद्यावर्तकाले भवति रजोहरणस्य शिरसश्च कराभ्यामाश्लेषणं, रजोहरणस्य न शिरसः, शिरसो न रजोहरणस्य, न रजोहरणस्य नाऽपि शिरसः। अत्र प्रथमः शुद्धः शेषास्तु दुष्टाः। २७। न्यूनं व्यञ्जनाभिलापावश्यकैरसम्पूर्णम् ।२८। उत्तरचूलं वन्दनं दत्त्वा महता शब्देन मस्तकेन वन्दे इत्यभिधानम्। २९। मूकं आलापाननुच्चारयतो वन्दनम् ।३०। ढड्ढरं महता शब्देनोच्चारयतो वन्दनम्। ३१। चुडली उल्मुकं यथोल्मुकं गृह्णाति तथा रजोहरणं गृहीत्वा वन्दनं, यद्वा यत्र दीर्घहस्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रसार्य्य वन्दे इति भणतो वन्दनम्, अथवा हस्तं भ्रमयित्वा सर्वान् वन्दे इति वदतो वन्दनम्। ३२। वन्दनके च शिष्यस्य षडभिलापा भवन्ति, तद्यथा इच्छा अनुज्ञापना अव्याबाधं यात्रा यापना अपराधक्षामणा च,

यदाह —

[1]इच्छा य अणुन्नवणा अव्वाबाहं च जत्त जवणा य।
अवराहखामणा चिय छठाणा हुंति वन्दणए॥ १॥

गुरुवचनान्यपि षडेव यथा छन्देन अनुजानामि तथेति तुभ्यमपि वर्तते एवमहमपि क्षमयामीति।

यदाह—

[2]छंदेन अणुजाणामि तहत्ति तुब्भंपि वट्टइ एवं।
अहमवि खामेमि तुमे आलावा वंदणरिहस्स॥ १॥

एते च द्वये अपि यथास्थानं सूत्रव्याख्यायां दर्शयिष्यन्ते।

सूत्रं च—

इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहियाए अनुजाणह मे मिउग्गहं निसीहि अहो कायं कायसंफासं खमणिज्जो भे किलामो अप्पकिलंताणं बहुसुभेण भे दिवसो वइक्कंतो जत्ता भे जवणिज्ज च भे खामेमि खमासमणो देवसिअं वइक्कमं

(१) इच्छा चानुज्ञापना अव्याबाधं च यात्रा यापना च।
अपराधक्षामणा चैव षट् स्थानानि भवन्ति वन्दनके॥ १॥

(२) छन्देनानुजानामि तथेति तवाऽपि वर्तते एवम्।
अहमपि क्षमयामि तवालापाद् वन्दनार्हस्य॥ १॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवसिआए पडिक्कमामि खमासमणाणं देवसिआए आसायणाए तित्तीसन्नयराए जं किंचि मिच्छाए मणदुक्कडाए वयदुक्कडाए कायदुक्कडाए कोहाए माणाए मायाए लोहाए सव्वकालियाए सव्वमिच्छोवयाराए सव्वधम्माइक्कमणाए आसायणाए जो मे अइ-आरो कओ तस्स खमासमणो! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ।

व्याख्या—अत्र हि शिष्यो गुरुवन्दनेन वन्दितुकामः पूर्वं लघु-वन्दनपुरःसरं संदंशकौ प्रमृज्योपविष्ट एव मुखवस्त्रिकां पञ्चविंशति-कृत्वः प्रत्युपेक्षते, [1]तया च शरीरं पञ्चविंशतिकृत्व एव प्रमृज्य परेण विनयेन मनोवाक्कायसंशुद्धो गुरोः सकाशादात्मप्रमाणात् क्षेत्राद् बहिःस्थितोऽधिज्यचापवदवनतकायः करद्वयगृहीतरजोहरणादि-र्वन्दनायोद्यत एवमाह—इच्छामि अभिलषामि अनेन बलाभि-योगः परिहृतः, क्षमाश्रमण! 'क्षमूषि सहने' इत्यस्य षित्त्वादङि क्षमा सहनमित्यर्थः, श्राम्यति संसारविषये खिन्नो भवति तपस्य-तीति वा, नन्द्यादित्वात् कर्तरि अने श्रमणः, क्षमाप्रधानः श्रमणः क्षमाश्रमणः तस्य सम्बोधने प्राकृते खमासमणो! "डो दीर्घो वा" ॥ (सिद्धहेम०८।३।३८)॥ इति आमन्त्र्ये सेर्डोकारः, क्षमाग्रहणेन मार्दवार्जवादयो गुणाः सूचिताः। ततश्च क्षमादिगुणोपलक्षित-यतिप्रधान!। अनेन वन्दनार्हत्वं तस्यैव सूचितम्, किं कर्तुं वन्दितुं नमस्कर्तुं भवन्तमिति गम्यते, कया, यापनीयया नैषेधिक्या, अत्र नैषेधिक्येति विशेष्यं, यापनीययेति विशेषणम्,

(१) च तथा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'षिधू गत्याम्' इत्यस्य निपूर्वस्य घञि निषेधः प्राणातिपातादि-निवृत्तिः स प्रयोजनमस्या नैषेधिकी तनुः, तया कीदृश्या, यापनीयया 'यांक् प्रापणे' अस्य णिगन्तस्य प्वागमे यापयतीति यापनीया प्रवचनीयादित्वात् कर्तर्यनीयः तया, शक्तिसमन्वितया इत्यर्थः। अयं समुदायार्थः। हे श्रमणगुणयुक्त! अहं शक्तिसमन्वित-शरीरः प्रतिषिद्धपापक्रियश्च त्वां वन्दितुमिच्छामि। अत्र विश्रामः। अत्र चान्तरे गुरुर्यदि व्याक्षेपबाधायुक्तस्तदा भणति प्रतीक्षस्वेति। तच्च बाधादिकारणं यदि कथनयोग्य भवति तदा कथयति अन्यथा तु नेति चूर्णिकारमतम्, वृत्तिकारस्य तु मतं त्रिविधेनेति भणति मनसा वचसा कायेन प्रतिषिद्धोऽसीत्यर्थः। ततः शिष्यः संक्षेपवन्दनं करोति। व्याक्षेपादिरहितश्चेद्गुरुः तदा वन्दनमनुज्ञातुकामः छन्दे-नेति वदति छन्देनाऽभिप्रायेण ममाऽपि एतदभिप्रेतमित्यर्थः। ततो विनेयोऽवग्रहाद् बहिःस्थित एवैवमाह अनुजानीत अनुमन्यध्वं मे इति आत्मनिर्देशे, किं, मितश्चासाववग्रहश्च मितावग्रहः, इहा-चार्यस्य चतसृषु दिक्षु आत्मप्रमाणं क्षेत्रमवग्रहः, तस्मिन्नाचार्या-ऽनुज्ञां विना प्रवेष्टुं न कल्पते,

यदाह—

[1]आयप्पमाणमित्तो चउद्दिसं होइ अवग्गहो गुरुणो।
अणणुन्नायस्स सया न कप्पए तत्थ पविसेउं ॥ १ ॥

---

(१) आत्मप्रमाणमात्रश्चतुर्दिशं भवत्यवग्रहो गुरोः।
अननुज्ञातस्य सदा न कल्पते तत्र प्रवेष्टुम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततो गुरुर्भणति—अनुजानामि। ततः शिष्यो भुवं प्रमृज्य नैषेधिकीं कुर्वन् गुर्ववग्रहे प्रविशति। निसीहीति निषिद्धसर्वाशुभव्यापारः सन् प्रविशाम्यहमित्यर्थः। ततः संदंशप्रमार्जनपूर्वकमुपविशति। गुरुपादान्तिके च भूमौ निधाय रजोहरणं तन्मध्ये च गुरुचरणयुगलं संस्थाप्य मुखवस्त्रिकया वामकर्णादारभ्य वामहस्तेन दक्षिणकर्णं यावल्ललाटमविच्छिन्नं च वामं जानु त्रिः[1] प्रमृज्य मुखवस्त्रिकां वामजानूपरि स्थापयति। ततोऽकारोच्चारणसमकालं रजोहरणं कराभ्यां संस्पृश्य होकारोच्चारणसमकालं ललाटं स्पृशति। ततः काकारोच्चारणसमकालं रजोहरणं स्पृष्ट्वा यंकारोच्चारणसमकालं ललाटं स्पृशति। पुनश्च काकारोच्चारणसमकालं रजोहरणं स्पृष्ट्वा यकारोच्चारणसमकालं ललाटं स्पृशति। ततः संफासमिति वदन् शिरसा पाणिभ्यां च रजोहरणं स्पृशति। ततः शिरसि बद्धाञ्जलिः 'खमणिज्जो भे किलामो' इत्यारभ्य 'दिवसो वइक्कंतो' यावद् गुरुमुखे निविष्टदृष्टिः पठति। अधस्तात् कायोऽधःकायः पादलक्षणस्तं प्रति कायेन निजदेहेन हस्तललाटलक्षणेन संस्पर्श आमर्शस्तं 'करोमि' इति गम्यते। एतदपि ममानुजानीध्वमित्यनेन योगः। आचार्यमननुज्ञाप्य हि संस्पर्शो न कार्यः। ततो वक्ति—खमणिज्जो क्षमणीयः सोढव्यः,भे भवद्भिः, किलामो क्लमः संस्पर्शे सति देहग्लानिरूपः। तथा, अप्पकिलंताणं अल्पं स्तोकं क्लान्तं क्लमो

(१) च त्रिः प्रदक्षिणीकृत्य प्रमृज्य।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येषां तेऽल्पक्लान्तास्तेषामल्पवेदनानामित्यर्थः, बहुसुभेण बहु च तच्छुभं च बहुशुभं तेन बहुसुखेनेत्यर्थः, भे भवताम्, दिवसो वइ-क्कंतो दिवसो व्यतिक्रान्तः। अत्र दिवसग्रहणं रात्रिपक्षादीनामुपलक्षणं द्रष्टव्यम्। एवं योजितकरसंपुटं गुरोः प्रतिवचनमीक्षमाणं शिष्यं प्रत्याह गुरुः—'तह त्ति' तथेति प्रतिश्रवणे, अत्र तथाकारः यथा भवान् ब्रवीति तथेत्यर्थः। एवं तावदाचार्यशरीर-वार्ता पृष्टा। अथ तपो नियमविषयां वार्तां पृच्छन्नाह—जत्ता भे, 'ज' इत्यनुदात्तस्वरेणोच्चारयन् रजोहरणं कराभ्यां स्पृष्ट्वा रजोहरण-ललाटयोरन्तराले 'त्ता' इति स्वरितेन स्वरेणोच्चार्य, उदात्तस्वरेण 'भे' इत्युच्चारयन् गुरुमुखनिविष्टदृष्टिर्ललाटं स्पृशति, यात्रा संयम-तपोनियमादिलक्षणा क्षायिकक्षायोपशमिकौपशमिकभावलक्षणा वा भे भवताम् 'उत्सर्पति' इति गम्यते। अत्रान्तरे गुरोः प्रति-वचनम् 'तुब्भं पि वट्टइ' मम तावदुत्सर्पति, भवतोऽप्युत्सर्पति।

अधुना नियन्त्रणीयपदार्थविषयां वार्तां पृच्छन् पुनरप्याह विनेयः—जवणिज्जं च भे, 'ज' इत्यनुदात्तस्वरेण रजोहरणं स्पृष्ट्वा 'व' इति स्वरितस्वरेण रजोहरणललाटयोरन्तराले उच्चार्य णिशब्द-मुदात्तस्वरेणोच्चारयन् कराभ्यां ललाटं स्पृशति, न पुनः प्रतिवचनं प्रतीक्षते, अर्धसमाप्तत्वात् प्रश्नस्य; ततो 'ज्जं' इत्यनुदात्तस्वरेणो-च्चार्य कराभ्यां रजोहरणं स्पृशन् पुनरेव रजोहरणललाटान्तराले 'च' इति स्वरितस्वरेणोच्चार्य 'भे' इत्युदात्तस्वरेणोच्चारयन् कराभ्यां ललाटं स्पृष्ट्वा प्रतिवचनं शुश्रूषमाणस्तथैवास्ते; जवणिज्जं च यापनीयमिन्द्रियनोइन्द्रियोपशमादिना प्रकारेणाबाधितं च भे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवतां 'शरीरम्' इति गम्यम्। एवं परया भक्त्या पृच्छता विनेयेन विनयः कृतो भवति। अत्रान्तरे गुरुराह—एवं आम यापनीयं च मे इत्यर्थः। इदानीमपराधक्षामणां कुर्वन् रजोहरणोपरिन्यस्तहस्तमस्तको विनेय इदमाह—'खामेमि खमासमणो! देवसियं वइक्कमं' क्षमयामि क्षमाश्रमण! दिवसे भवो दैवसिकस्तं व्यतिक्रममवश्यकरणीययोगविराधनारूपमपराधम्। अत्रान्तरे च गुरुर्वदति—'अहमवि खामेमि' अहमपि क्षमयामि दैवसिकं त्वं व्यतिक्रमं प्रमादोद्भवम्। ततो विनेयः प्रणमन् क्षमयित्वा 'आवसिआए' इत्यादि 'जो मे अइआरो कओ' इत्यन्तं स्वकीयातिचारनिवेदनपरमालोचनार्हप्रायश्चित्तसूचकं सूत्रं 'तस्स खमासमणो पडिक्कमामि' इत्यादिकं च प्रतिक्रमणार्हप्रायश्चित्ताभिधायकं पुनरकरणेनाभ्युत्थित आत्मानं शोधयिष्यामीति बुद्ध्याऽवग्रहाद् निःसृत्य पठति,—अवश्यं कर्तव्येषु चरणकरणेषु भवा क्रिया आवश्यकी तया आसेवनाद्वारेण हेतुभूतया यदसाध्वनुष्ठितं तस्मात् प्रतिक्रमामि निवर्ते; इत्थं सामान्येनाभिधाय विशेषेणाभिधत्ते—क्षमाश्रमणानां संबन्धिन्या दैवसिक्या ज्ञानाद्यायस्य शातना खण्डना आशातना तया, किंविशिष्टया, त्रयस्त्रिंशदन्यतरया त्रयस्त्रिंशत्संख्यानामाशातनानामन्यतरया कयाचित्, उपलक्षणत्वाद् द्वाभ्यां तिसृभिरपि, यतो दिवसमध्ये सर्वा अपि संभवन्ति; ताश्च वक्ष्यन्ते; यत् किञ्चित् कदालम्बनमाश्रित्य मिथ्यया मिथ्यायुक्तेन कृतयेत्यर्थः; मिथ्याभावोऽत्रास्तीत्यभ्रादित्वादकारे मिथ्या, एवं क्रोधयेत्यादावपि; मनसा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुष्कृता मनोदुष्कृता तया प्रद्वेषनिमित्तयेत्यर्थः ; वाग्दुष्कृतया असभ्यपरुषादिवचननिमित्तया, कायदुष्कृतया आसन-गमन-स्थानादिनिमित्तया, क्रोधया क्रोधयुक्तया, मानया मानयुक्तया, मायया मायायुक्तया, लोभया लोभयुक्तया ; अयं भावः—क्रोधाद्यनुगतेन या काचिद् विनयभ्रंशादिलक्षणाऽऽशातना कृता तयेति। एवं दैवसिक्याशातनोक्ता। अधुना पक्ष-चतुर्मास-संवत्सरकालकृता इहभवान्यभवगतातीतानागतकालकृता च या आशातना तस्याः संग्रहार्थमाह—'सव्वकालियाए' सर्वकालेषु भवा सार्वकालिकी तया। अनागतकाले कथमाशातनासंभवः ? इति चेत्। उच्यते,—'श्वोऽस्य गुरोरिदमिदं वानिष्टं कर्तास्मि' इति चिन्तया। इत्थं भवान्तरेऽपि तद्वधादिनिदानकरणेन संभवत्येव। सर्व एव मिथ्योपचारा मातृस्थानगर्भाक्रियाविशेषा यस्यां सा सर्वमिथ्योपचारा तया। सर्वे धर्मा अष्टौ प्रवचनमातरः सामान्येन करणीयव्यापारा वा तेषामतिक्रमणं लङ्घनं विराधनं यस्यां सा सर्वधर्मातिक्रमणा। एवंभूतयाऽऽशातनया यो मयातिचारोऽपराधः कृतो विहितस्तस्यातिचारस्य हे क्षमाश्रमण ! युष्मत्साक्षिकं प्रतिक्रमामि अपुनःकरणेन निवर्ते ; तथा, दुष्टकर्मकारिणं निन्दाम्यात्मानं भवोद्विग्नेन प्रशान्तेन चेतसा ; तथा, गर्हे आत्मानं दुष्टकर्मकारिणं युष्मत्साक्षिकम् ; व्युत्सृजाम्यात्मानं दुष्टकर्मकारिणं तदनुमतित्यागेन। एवं तत्रस्थ एवार्धावनतकायः पुनरेवं भणति—'इच्छामि खमासमणो' इत्यारभ्य यावद् 'वोसिरामि' इति ; परमयं विशेषः—अवग्रहाद् बहिर्निष्क्रमणरहित

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवश्यकीविरहितं दण्डकसूत्रं पठति। वन्दनकविधिविशेष-संवादिकाश्चेमा गाथाः—

[1]आयारस्स उ मूलं विणओ सो गुणवओ अ पडिवत्ती।
सा अ विहिवंदणाओ विही इमो बारसावत्तो॥ १॥
होउमहाजाओ बहिं संडासं पमज्ज उक्कुट्टुअट्ठाणो।
पडिलेहियमुहपत्तीपमज्जिओवरिमदेहद्धो॥ २॥
उट्ठेउं परिसंठिअकुप्परट्ठिअपट्टगोनमिअकाओ।
जुत्तिपिहिअपच्छद्धो पवयणकुच्छा जह न होई॥ ३॥
वामंगुलिमुहपोत्तीकरजुअलतलत्थजुत्तरयहरणो।
अवणिय जहोत्तदोसं गुरुसंमुहं भणइ पयडमिणं॥ ४॥
इच्छामि खमासमणो इच्चाई जा निसीहियाए त्ति।
छंदेणं ति सुणेउं गुरुवयणं उग्गहं जाए॥ ५॥

---

(१) आचारस्य तु मूलं विनयः स गुणवतश्च प्रतिपत्तिः।
सा च विधिवन्दनाद् विधिरयं द्वादशावर्तः॥१॥
भूत्वा यथाजातो बहिः संदंशं प्रमृज्योत्कुटुकस्थानः।
प्रतिलिखितमुखवस्त्रिकाप्रमार्जितोपरिमदेहार्धः॥२॥
उत्थाय प्रतिसंस्थितकूर्परस्थितपट्टकावनतकायः।
युक्तिपिहितपश्चार्धः प्रवचनकुत्सा यथा न भवति॥३॥
वामाङ्गुलिमुखवस्त्रिकाकरयुगलतलस्थयुक्तरजोहरणः।
अपनीय यथोक्तदोषं गुरुसंमुखं भणति प्रकटमिदम्॥४॥
इच्छामि क्षमाश्रमण! इत्यादि यावद् नैषेधिक्येति।
छन्देनेति श्रुत्वा गुरुवचनमवग्रहं याति॥५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]अणुजाणह मे मिउग्गहमणुजाणामि त्ति भासिए गुरुणा ।
उग्गहखेत्तं पविसइ पमज्ज संडासए निसिए ॥ ६ ॥
वामद्दसं रयहरणं पमज्ज भूमीए संठवेऊण ।
सीसफुसणेण होही कज्जं ति तओ पढममेव ॥ ७ ॥
वामकरगहिअपोत्ती एगद्देसेण वामकन्नाओ ।
आरंभिऊण णिडालं पमज्ज जा दाहिणो कन्नो ॥ ८ ॥
अव्वुच्छिन्नं वामयजाणुं नसिऊण तत्थ मुहपोत्तिं ।
रयहरणमज्झदेसम्मि ठावए पुज्जपायजुगं ॥ ९ ॥
सुपसारिअबाहुजुओ ऊरुजुअलंतरं अफुसमाणो ।
जमलट्ठिअग्गपाणी अकारमुच्चारयं फुसइ ॥ १० ॥
अब्भंतरपरिअट्टिअकरयलमुवणीअ सीसफुसणंतं ।
तो करजुअलं निज्जा होकारोच्चारसमकालं ॥ ११ ॥

---

(१) अनुजानीध्वं मे मितावग्रहमनुजानामीति भाषिते गुरुणा ।
अवग्रहक्षेत्रं प्रविशति प्रमृज्य संदंशं निषीदेत् ॥६॥
वामदशं रजोहरणं प्रमृज्य भूमौ संस्थाप्य ।
शिरःस्पर्शनेन भविष्यति कार्यमिति ततः प्रथममेव ॥७॥
वामकरगृहीतमुखवस्त्रिक एकदेशेन वामकर्णात् ।
आरभ्य ललाटं प्रमृज्य यावद् दक्षिणः कर्णः ॥८॥
अव्युच्छिन्नं वामकजानु न्यस्य तत्र मुखवस्त्रिकाम् ।
रजोहरणमध्यदेशे स्थापयेत् पूज्यपादयुगम् ॥९॥
सुप्रसारितबाहुयुग ऊरुयुगलान्तरमस्पृशन् ।
यमलस्थिताग्रपाणिरकारमुच्चारयन् स्पृशति ॥१०॥
अभ्यन्तरपरिवर्त्तितकरतलमुपनीय शिरःस्पर्शनान्तम् ।
ततः करयुगलं नयेद् होकारोच्चारसमकालम् ॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]पुण हेट्ठा मुहकरयल काकारसमं ठविज्ज रयहरणं ।
यंसद्देणं समयं पुणो वि सीसं तहच्चेश्र ॥ १२ ॥
काकारसमुच्चारणसमयं रयहरणमालुहिऊण ।
य त्ति य सद्देण समं पुणो वि सीसं तहच्चेश्र ॥ १३ ॥
संफासं ति भणंतो सीसेणं पणमिऊण रयहरणे ।
उन्नामिश्रमुद्धंजलि अव्वाबाहं तश्रो पुच्छे ॥ १४ ॥
खमणिज्जो भे किलामो अप्पकिलंताणं बहुसुभेणं भे ।
दिण पक्खो वरिसो वा वइक्कंतो इय तश्रो तुसिणी ॥ १५ ॥
गुरुणा तह त्ति भणिए जत्ता जवणा य पुच्छियव्वा य ।
परिसंठिएण इणमो सराण जोएण कायव्वं ॥ १६ ॥
तत्थ य परिभासेमो मंदमइविणिश्रगाहणट्ठाए ।
नीउच्चमज्झमाश्रो सरजुत्तीश्रो ठवेयव्वा ॥ १७ ॥

---

(१) पुनरधस्तात् मुखकरतलं काकारसमं स्थापयेत् रजोहरणम् ।
यंशब्देन समकं पुनरपि शिरस्तथैव ॥१२॥
काकारसमुच्चारणसमकं रजोहरणमाश्लिष्य ।
य इति च शब्देन समं पुनरपि शिरस्तथैव ॥१३॥
संफासं इति भणन् शिरसा प्रणम्य रजोहरणे ।
उन्नामितमूर्धाञ्जलिरव्याबाधां ततः पृच्छेत् ॥१४॥
क्षमणीयो भवद्भिः क्लमोऽल्पक्लान्तानां बहुशुभेन भवताम् ।
दिनं पक्षो वर्षं वा व्यतिक्रान्तमिति ततस्तूष्णीकः ॥१५॥
गुरुणा तथेति भणिते यात्रा यापना च प्रष्टव्या च ।
परिसंस्थितेनेदं स्वराणां योगेन कर्तव्यम् ॥१६॥
तत्र च परिभाषामहे मन्दमतिविनेयग्राहणार्थम् ।
नीचोच्चमध्यमाः स्वरयुक्तयः स्थापयितव्याः ॥१७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]नीओ तत्थणुदत्तो रयहरणे उच्चओ उदत्तो उ ।
सीसे निदंसणोओ तदंतरालम्मि सरिओ य ॥ १८ ॥
अणुदत्तो अ जकारो त्ता सरिओ होइ भे उदत्तसरो ।
पुणरवि जवणिसद्दा अनुदत्ताई मुणेअव्वा ॥ १९ ॥
ज्जं अणुदत्तो अ पुणो च सरिओ भे उदत्तसरणामो ।
एवं रयहरणाइसु तिसु ठाणेसुं सरा णेया ॥ २० ॥
पढमं आवत्ततिगं वण्णदुगेणं तु रइयमणुकमसो ।
बीयावत्ताण तिगं तिहि तिहिं वण्णेहि निप्फन्नं ॥ २१ ॥
रयहरणम्मि जकारं त्ताकारं करजुएण मज्झम्मि ।
भेकारं सीसम्मि अ काउं गुरुणो वयं सुणसु ॥ २२ ॥
तुब्भं पि वट्टइ त्ति य गुरुणा भणिअम्मि सेसआवत्ता ।
दुण्हि वि काउं तुसिणी जा गुरुणा भणिअमेवं ति ॥२३॥

---

(१) नीचस्तत्रानुदात्तो रजोहरणे उच्चक उदात्तस्तु ।
शीर्षे निदर्शनीयस्तदन्तराले स्वरितश्च ॥१८॥
अनुदात्तश्च जकारः त्ता स्वरितो भवति भे उदात्तस्वरः ।
पुनरपि जवणिशब्दा अनुदात्तादयो ज्ञातव्याः ॥१९॥
ज्जं अनुदात्तश्च पुनश्च स्वरितो भे उदात्तस्वरनामः ।
एवं रजोहरणादिषु त्रिषु स्थानेषु स्वरा ज्ञेयाः ॥२०॥
प्रथममावर्तत्रिकं वर्णद्विकेन तु रचितमनुक्रमशः ।
द्वितीयावर्तानां त्रिकं त्रिभिस्त्रिभिर्वर्णैर्निष्पन्नम् ॥२१॥
रजोहरणे जकारं त्ताकारं करयुगेण मध्ये ।
भेकारं शिरसि च कृत्वा गुरोर्वचः शृणु ॥२२॥
तवापि वर्तत इति च गुरुणा भणिते शेषावर्तौ ।
द्वावपि कृत्वा तूष्णीको यावद् गुरुणा भणितमेवमिति ॥२३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]अह सीसो रयहरणे कयंजली भणइ सविणयं सिरसा ।
खामेमि खमासमणो ! देवसिआइवइक्कमणं ॥२४॥
अहमवि खामेमि तुमे गुरुणाऽणुण्णाए खामणे सीसो ।
निक्खमइ उग्गहाओ आवसियाए भणिऊण ॥२५॥
ओणयदेहो अवराहखामणं सव्वसुच्चरिऊण ।
निंदियगरहिअवोसट्टसव्वदोसो पडिक्कंतो ॥२६॥
खामित्ता विणएणं तिगुत्तो तेण पुणरवि तहेअ ।
उग्गहजायणपविसणदुओणयं दो पवेसं च ॥२७॥
पढमे छच्चावत्ता बीयपवेसम्मि हुंति छच्चेव ।
ते अ अहो इच्चाई असंकरेणं पउत्तव्वा ॥२८॥
पढमपवेसे सिरनामणं दुहा बीअए अ तह चेव ।
तेणेअ वउसिरंतं भणियमिणं एगनिक्खमणं ॥२९॥

---

(१) अथ शिष्यो रजोहरणे कृताञ्जलिर्भणति सविनयं शिरसा ।
क्षमयामि क्षमाश्रमण ! दैवसिकादिव्यतिक्रमणम् ॥२४॥
अहमपि क्षमयामि त्वां गुरुणाऽनुज्ञाते क्षमणे शिष्यः ।
निष्क्रामत्यवग्रहादावश्यक्या भणित्वा ॥२५॥
अवनतदेहोऽपराधक्षमणं सर्वंमुच्चार्य ।
निन्दितगर्हितव्युत्सृष्टसर्वदोषः प्रतिक्रान्तः ॥२६॥
क्षमयित्वा विनयेन त्रिगुप्तस्तेन पुनरपि तथैव ।
अवग्रहयाचनप्रवेशनद्विकावनतं द्वयोः प्रवेशं च ॥२७॥
प्रथमे षडावर्ता द्वितीयप्रवेशे भवन्ति षडेव ।
ते च अहो इत्यादयोऽसंकरेण प्रयोक्तव्याः ॥२८॥
प्रथमप्रवेशे शिरोनामनं द्विधा द्वितीयके च तथैव ।
तेनैव व्युत्सृजास्यन्तं भणितमिदमेकनिष्क्रमणम् ॥२९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]एवमहाजाएगं तिगुत्तिसहिश्रं च हुंति चत्तारि ।
सेसेसुं खित्तेसुं पणवीसावस्सया हुंति ॥३०॥

'तित्तीसन्नयराए' इत्युक्तमिति, त्रयस्त्रिंशदाशातना विविच्यन्ते—गुरोः पुरतो गमनं शिष्यस्य निष्कारणं विनयभङ्गहेतुत्वादाशातना, मार्गदर्शनादिकारणे तु न दोषः, गुरोः पार्श्वाभ्यामपि गमनम्, पृष्ठतोऽप्यासन्नगमनम्, निःश्वासक्षुतश्लेष्मपातादिदोषप्रसङ्गात् ; ततश्च यावता भूभागेन गच्छत आशातना न भवति तावता गन्तव्यम् ।१।२।३। एवं पुरतः, पार्श्वतः, पृष्ठतश्च स्थानम् । ४।५।६। तथा, पुरतः पार्श्वतः पृष्ठतो वा निषदनम् । ७।८।९ । आचार्येण सहोच्चारभूमिं गतस्याचार्यात् प्रथममेवाचमनम् ।१०। गुरोरालापनीयस्य कस्यचिच्छिष्येण प्रथममालपनम् ।११। शिष्यस्याचार्येण सह बहिर्गतस्य पुनर्निवृत्तस्याचार्यात् प्रथममेव गमनागमनालोचनम् । १२ । भिक्षामानीय शिष्येण गुरोः पूर्वं शैक्षस्य कस्यचित् पुरत आलोच्य पश्चाद् गुरोरालोचनम् । १३ । भिक्षामानीय प्रथमं शैक्षस्य कस्यचिदुपदर्श्य गुरोर्दर्शनम् । १४ । भिक्षामानीय गुरुमनापृच्छ्य शैक्षाणां यथारुचि प्रभूतभैक्ष्यदानम् ।१५। भिक्षामानीय शैक्षं कञ्चन निमन्त्र्य पश्चाद् गुरोरुपनिमन्त्रणम् । १६ । शिष्येण भिक्षामानीयाचार्याय यत् किञ्चिद् दत्त्वा स्निग्धमधुरमनोज्ञाहारशाकादीनां वर्णगन्धरसस्पर्शवतां

---

(१) एवं यथाजातैकं त्रिगुप्तिसहितं च भवन्ति चत्वारि ।
शेषेषु क्षेत्रेषु पञ्चविंशतिरावश्यका भवन्ति ॥३०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्रव्याणां स्वयमुपभोगः ।१७। रात्रौ 'आर्याः ! कः स्वपिति जागर्ति वा ?' इति गुरोः पृच्छतोऽपि जाग्रताऽपि शिष्येणाप्रतिश्रवणम् । १८ । शेषकालेऽपि गुरौ व्याहरति यत्र तत्र स्थितेन शयितेन वा शिष्येण प्रतिवचनदानम् । १९ । आहूतेनासनं शयनं वा त्यक्त्वा संनिहितीभूय 'मस्तकेन वन्दे' इति वदता गुरुवचनं श्रोतव्यम्, तदकुर्वत आशातना । २० । गुरुणा आहूतस्य शिष्यस्य किमिति वचनम्, भणितव्यं च मस्तकेन वन्दे इति । २१ । गुरुं प्रति शिष्यस्य त्वंकारः । २२ । गुरुणा ग्लानादिवैयावृत्त्यादिहेतोः 'इदं कुरु' इत्यादिष्टः 'त्वमेव किं न कुरुषे' इति 'त्वमलसः' इत्युक्ते 'त्वमप्यलसः' इति च शिष्यस्य तज्जातवचनम् । २३ । गुरोः पुरतो बहोः कर्कशस्योच्चैःस्वरस्य च शिष्येण वदनम् । २४ । गुरौ कथां कथयति 'एवमेतत्' इत्यन्तराले शिष्यस्य वचनम् । २५ । गुरौ धर्मकथां कथयति 'न स्मरसि त्वमेतमर्थम्, नायमर्थः संभवति' इति शिष्यस्य वचनम् । २६ । गुरौ धर्मं कथयति सौमनस्य-रहितस्य गुरूक्तमननुमोदमानस्य 'साधूक्तं भवद्भिः' इत्यप्रशंसतः शिष्यस्योपहतमनस्त्वम् । २७ । गुरौ धर्मं कथयति 'इयं भिक्षा-वेला सूत्रपौरुषीवेला, भोजनवेला' इत्यादिना शिष्येण पर्षद्भेद-नम् । २८ । गुरौ धर्मकथां कथयति 'अहं कथयिष्यामि' इति शिष्येण कथाच्छेदनम् । २९ । तथा, आचार्येण धर्मकथायां कृतायामनुत्थितायामेव पर्षदि स्वस्य पाटवादिज्ञापनाय शिष्येण सविशेषं धर्मकथनम् । ३० । गुरोः पुरत उच्चासने समासने वा शिष्यस्योपवेशनम् ।३१। गुरोः शय्यासंस्तारकादिकस्य पादेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घट्टनम्, अननुज्ञाप्य हस्तेन वा स्पर्शनम्, घट्टयित्वा स्पृष्ट्वा वाऽक्षा-मणम्; यदाह,—

[1]संघट्टइत्ता कायेण तहा उवहिणामवि।
खमिह अवराहं मे वइज्ज न पुण त्ति अ ॥१॥ ३२।

गुरोः शय्यासंस्तारकादौ स्थानं निषदनं शयनं चेति।३३।

एतदर्थसंवादिन्यो गाथाः—

[2]पुरओ पक्खासन्ने गमणं ठाणं निसीअणं ति नव।
सेहे पुव्वं आइमइ आलवइ तह य आलोए ॥१॥
असणाइअमालोइअ पडिदंसइ देई उवनिमतेइ।
सेहस्स तहाहारइ लुद्धो निद्धाइ गुरुपुरओ ॥२॥
राओ गुरुस्स वयओ तुसिणी सुणिरो वि सेसकाले वि।
तत्थ गओ वा पडिसुणिइ बेइ किंति व तुमं ति गुरुं ॥३॥

---

(१) संघट्य कायेन तथोपधीनामपि।
क्षमस्वापराधं मे वदेद् न पुनरिति च ॥१॥

(२) परतः पक्षासन्ने गमनं स्थानं निषदनमिति नव।
शैक्षे पूर्वमाचमति आलपति तथा चालोचयति ॥१॥
अशनादिकमालोच्य प्रतिदर्शयति ददात्युपनिमन्त्रयति।
शैक्षस्य तथाहरति लुब्धः स्निग्धादि गुरुपुरतः ॥२॥
रात्रौ गुरोर्वदतस्तूष्णीं श्रोताऽपि शेषकालेऽपि।
तत्र गतो वा प्रतिशृणोति ब्रवीति किमिति वा त्वमपि गुरुम् ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]तज्जाएणं पडिहणइ वेइ बहु तह कहंतरे वयइ ।
एवमिमं ति न सरसि नो सुमणे भिंदइ परिसं ॥४॥
छिंदइ कहं तहाणुट्ठियाइ परिसाइ कहइ सविसेसं ।
गुरुपुरओ विनिसीयइ ठाइ समुच्चासणे सेहो ॥५॥
संघट्टइ पाएणं सेज्जासंथारयं गुरुस्स तहा ।
तत्थेव ठाइ निसियइ सुअइ अवसेहोत्ति तेत्तीसं ॥६॥

इह यद्यपि यतिरेव वन्दनककर्तोक्तो न श्रावकः, तथापि यतिः कर्तुर्भणनात् श्रावकोऽपि कर्त्ता विज्ञेयः, प्रायेण यतिक्रियानुसारेणैव श्रावकक्रियाप्रवृत्तेः ; श्रूयते च कृष्णवासुदेवेनाष्टादशानां यतिसहस्राणां द्वादशावर्तवन्दनमदायि, इत्याशातना अपि यत्यनुसारेण यथासंभवं श्रावकस्य वाच्याः । एवं वन्दनकं दत्त्वाऽवग्रहमध्यस्थित एव विनेयोऽतिचारालोचनं कर्तुकामः किञ्चिदवनतकायो गुरुं प्रतीदमाह—'इच्छाकारेण संदिसह देवसियं आलोएमि' इति । इच्छाकारेणा निजेच्छया, संदिशत आज्ञां ददत, दैवसिकं दिवसभवम् 'अतीचारम्' इति गम्यम् ; एवं रात्रिकपाक्षिकादिकमपि द्रष्टव्यम्, आलोचयामि मर्यादया सामस्त्येन वा प्रकाशयामि । इह च दैवसिकादीनामयं कालनियमः—यथा

---

(१) तज्जातेन प्रतिहन्ति ब्रवीति बहु तथा कथान्तरे वदति ।
एवमिदमिति न स्मरसि नो सौमनस्यं भिनत्ति परिषदम् ॥४॥
छिनत्ति कथां तथानुत्थितायां परिषदि कथयति सविशेषम् ।
गुरुपुरतो विनिषीदति तिष्ठति समोच्चासने शैक्षः ॥५॥
संघट्टयति पादेन शय्यासंस्तारकं गुरोस्तथा ।
तत्रैव तिष्ठति निषीदति शेतेऽपशैक्ष इति त्रयस्त्रिंशत् ॥६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दैवसिकं मध्याह्नादारभ्य निशीथं यावद् भवति, रात्रिकं निशीथादारभ्य मध्याह्नं यावद् भवति, पाक्षिकचातुर्मासिकसांवत्सरिकाणि पक्षाद्यन्ते भवन्ति। अत्रान्तरे 'आलोअह' इति गुरुवचनमाकर्ण्य एतदेव शिष्यः समर्थयन्नाह—'इच्छं आलोएमि' इच्छाम्यभ्युपगच्छामि गुरुवचः, आलोचयामि पूर्वमभ्युपगतमर्थं क्रियया प्रकाशयामीति। इत्थं प्रस्तावनामभिधायालोचनामेव साक्षात्कारेणाह—'जो मे दैवसिओ अइआरो कओ काइओ वाइओ माणसिओ उस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अणिच्छियव्वो असावगपाउग्गो नाणे दंसणे चरित्ताचरित्ते सुए सामाइए तिण्हं गुत्तीणं चउण्हं कसायाणं पंचण्हमणुव्वयाणं तिण्हं गुणव्वयाणं चउण्हं सिक्खावयाणं बारसविहस्स सावगधम्मस्स जं खंडिअं जं विराहिअं तस्स मिच्छामि दुक्कडं'।

व्याख्या—यो मया दिवसे भवो दैवसिकोऽतिचारोऽतिक्रमः कृतो निर्वर्तितः, स पुनरतिचार उपाधिभेदेनानेकधा भवति, अत एवाह—'काइओ' कायः प्रयोजनं प्रयोजकोऽस्यातिचारस्येति कायिकः, एवं वाइओ वाक् प्रयोजनमस्य वाचिकः, एवं मनः प्रयोजनमस्येति मानसिकः, उस्सुत्तो सूत्रादुत्क्रान्त उत्सूत्रः सूत्रमतिक्रम्य कृत इत्यर्थः, उम्मग्गो मार्गः क्षायोपशमिको भावस्तमतिक्रान्त उन्मार्गः क्षायोपशमिकभावत्यागेनौदयिकभावसंक्रमः कृत इत्यर्थः, अकप्पो कल्पो न्यायो विधिराचारश्चरणकरणव्यापार इति यावत्, न कल्पोऽकल्पोऽतद्रूप इत्यर्थः, करणीयः सामान्येन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्त्तव्यः, न करणीयोऽकरणीयः, हेतुहेतुमद्भावश्चात्र यत एवोत्सूत्रो ऽत एवोन्मार्गं इत्यादि, उक्तस्तावत् कायिको वाचिकश्च । अधुना मानसिकमाह—दुज्झाओ दुष्टो ध्यातो दुर्ध्यात एकाग्रचित्ततयाऽऽर्तरौद्रलक्षणः, दुव्विचिंतिओ दुष्टो विचिन्तितो दुर्विचिन्तितः, अशुभ एव चलचित्ततया[1] 'जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं' इति वचनात्, यत एवेत्थंभूतस्तत एव अणायारो आचरणीयः श्रावकाणामाचारः, न आचारोऽनाचारः, यत एवानाचरणीयोऽत एव अणिच्छियव्वो अनेष्टव्यः मनागपि मनसापि न एष्टव्य आस्तां तावत् कर्तव्यः, यत एवेत्थंभूतोऽत एव असावगपाउग्गो अश्रावकप्रायोग्यः—अभ्युपेतसम्यक्त्वः प्रतिपन्नाणुव्रतश्च प्रतिदिवसं यतिभ्यः सकाशात् साधूनामगारिणां च सामाचारीं शृणोतीति श्रावकस्तस्य प्रायोग्य उचितः श्रावकप्रायोग्यः, न तथा, श्रावकानुचित इत्यर्थः । अयं चातिचारः क्व विषये भवतीत्याह—'णाणे दंसणे चरित्ताचरित्ते' इति, ज्ञानविषये, दर्शनविषये, स्थूलसावद्ययोगनिवृत्तिभावाच्चारित्रं च सूक्ष्मसावद्ययोगनिवृत्त्यभावादचारित्रं च चारित्राचारित्रं तस्मिन् देशविरतिविषये इत्यर्थः । अधुना भेदेन व्याचष्टे—सुए श्रुतविषये, श्रुतग्रहणं मत्यादिज्ञानोपलक्षणम्, तत्र विपरीतप्ररूपणा, अकालस्वाध्यायश्चातिचारः, सामाइए सामायिकविषये, सामायिकग्रहणात् सम्यक्त्वसामायिकदेशविरतिसामायिकयोर्ग्रहणम् । तत्र सम्यक्त्वसामायिकातिचारः शङ्कादिः । देशविरतिसामायिकातिचारं तु भेदेनाह—तिण्हं

---

(१) यत्तु स्थिरमध्यवसानं तद् ध्यानं यच्चलं तच्चित्तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुप्तीणं तिसृणां गुप्तीनां 'यत् खण्डितम्' इत्यादिना सर्वत्र योगः, मनोवाक्कायगोपनात्मिकास्तिस्रो गुप्तयो व्याख्याताः, तासां चाश्रद्धानविपरीतप्ररूपणाभ्यां खण्डना विराधना च, चतुर्णां क्रोध-मानमायालोभलक्षणानां कषायाणां प्रतिषिद्धानां करणेनाश्रद्धान-विपरीतप्ररूपणाभ्यां च ; पञ्चानामणुव्रतानां त्रयाणां गुणव्रतानां चतुर्णां शिक्षाव्रतानामुक्तस्वरूपाणाम्, अणुव्रतादिमीलनेन द्वादशविधस्य श्रावकधर्मस्य यत् खण्डितं देशतो भग्नम्, यद्व विराधितं सुतरां भग्नं न पुनरेकान्ततोऽभावमापादितम्, तस्स मिच्छा मि दुक्कडं तस्य दैवसिकाद्यतिचारस्य ज्ञानादिगोचरस्य, तथा गुप्तीनां, कषायाणां द्वादशविधश्रावकधर्मस्य च यत् खण्डनं विराधनं चातिचाररूपं तस्य मिथ्येति प्रतिक्रमामि दुष्कृतमेतद-कर्तव्यमिदं ममेत्यर्थः।

अत्रान्तरे विनेयः पुनरप्यर्धावनतकायः प्रवर्धमानसंवेगो मायामदविप्रमुक्त आत्मनः सर्वातिचारविशुद्ध्यर्थं सूत्रमिदं पठति— 'सव्वस्स वि देवसिय दुच्चिंतिय दुब्भासिय दुच्चिट्ठिय इच्छाकारेण संदिसह।' सर्वाण्यपि लुप्तषष्ठीकानि पदानि। ततोऽयमर्थः— सर्वस्यापि दैवसिकस्याणुव्रतादिविषये प्रतिषिद्धाचरणादिना जात-स्यातिचारस्येति गम्यते ; पुनः कीदृशस्य, दुश्चिन्तितस्य दुष्टमार्त-रौद्रध्यानतया चिन्तितं यत्र स तथा तस्य दुश्चिन्तितोद्भवस्येत्यर्थः ; अनेन मानसमतीचारमाह ; दुष्टं सावद्यवाग्रूपं भाषितं यत्र तत् तथा तस्य दुर्भाषितोत्पन्नस्येत्यर्थः, अनेन वाचिकं सूचयति ; दुष्टं प्रतिषिद्धं धावनवल्गनादिकायक्रियारूपं चेष्टितं यत्र तत् तथा तस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुश्चेष्टितोद्भवस्येत्यर्थः, अनेन कायिकमाह ; अस्यातिचारस्य किमित्याह—इच्छाकारेण संदिसहेति, आत्मीयेच्छया मम प्रतिक्रमणाज्ञां प्रयच्छत, इत्युक्त्वा तूष्णीको गुरुमुखं प्रेक्षमाण आस्ते। ततो गुरुराह—'पडिक्कमह' प्रतिक्रामत। ततः शिष्यः प्राह—'इच्छं' इच्छाम्येतद् भगवद्वचः, तस्स तस्य दैवसिकातिचारस्य मिच्छा मि दुक्कडं आत्मीयं दुष्कृतं मिथ्येति जुगुप्स इत्यर्थः। तथा, द्वितीयच्छन्दनकावग्रहान्तःस्थित एव विनेयोऽर्धावनतकायः स्वापराधक्षामणां चिकीर्षुर्गुरुं प्रतीदमाह—'इच्छाकारेण संदिसह' इति, इच्छाकारेण स्वकीयाभिलाषेण न पुनर्बलाभियोगादिना, संदिशत आज्ञां प्रयच्छत यूयम्। आज्ञादानस्यैव विषयमुपदर्शयन्निदमाह-'अब्भुट्ठिओ अम्हि अब्भिंतरदेवसिअं खामेमि' अभ्युत्थितोऽस्मि प्रारब्धोऽस्मि अहम्, अनेनाभिलाषमात्रस्य व्यपोहेन क्षमणाक्रियायाः प्रारम्भमाह—'अब्भिंतरदेवसिअं' इति दिवसाभ्यन्तरसंभवम् 'अतीचारम्' इति गम्यते, क्षमयामि मर्षयामि, इत्येका वाचना। अन्ये त्वेवं पठन्ति—'इच्छामि खमासमणो अब्भुट्ठिओ अम्हि अब्भिंतरदेवसिअं खामेउं' इति, इच्छामि अभिलषामि 'क्षमयितुम्' इति योगः, हे क्षमाश्रमण! न केवलमिच्छामि, किन्तु 'अब्भुट्ठिओ अम्हि' इत्यादि पूर्ववदेव। एवं स्वाभिप्रायं प्रकाश्य तूष्णीमास्ते यावद् गुरुराह—'खामेह' इति क्षमयस्वेत्यर्थः। ततः स गुरुवचनं बहु मन्यमान आह—'इच्छं खामेमि' इति, इच्छं इच्छामि भगवदाज्ञाम्, खामेमि क्षमयामि च स्वापराधम्। अनेन क्षमणक्रियायाः प्रारम्भमाह। ततो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विधिवत् पञ्चभिरङ्गैः स्पृष्टधरणीतलो मुखवस्त्रिकया स्थगितवदनदेश इदमाह—'जं किंचि अपत्तियं परपत्तिअं भत्ते पाणे विणए वेयावच्चे आलावे संलावे उच्चासणे समासणे अंतरभासाए उवरिभासाए जं किंचि मज्झ विणयपरिहीणं सुहुमं वा बायरं वा तुब्भे जाणह अहं न याणामि तस्स मिच्छा मि दुक्कडं।

व्याख्या—जं किंचि यत् किञ्चित् सामान्यतो निरवशेषं वा, अपत्तियं आर्षत्वादप्रीतिकमप्रीतिमात्रम्, परपत्तिअं प्रकृष्टमप्रीतिकं परप्रत्ययं वा परहेतुकम्, उपलक्षणत्वादस्यात्मप्रत्ययं चेति द्रष्टव्यम्, युष्मद्विषये मम जातं युष्माभिर्वा मम जनितमिति वाक्यशेषः, 'तस्स मिच्छा मि' इत्युत्तरेण संबन्धः। तथा, भत्ते भक्ते भोजनविषये, पाणे पानविषये, विणए विनयेऽभ्युत्थानादिरूपे, वेआवच्चे वैयापृत्ये वैयावृत्त्ये वा औषधपथ्यादिनाऽवष्टम्भरूपे, आलावे आलापे सकृज्जल्परूपे, संलावे संलापे मिथःकथारूपे, उच्चासणे गुरोरासनादुच्चैरासने, समासणे गुर्वासनेन तुल्ये आसने, अंतरभासाए अन्तर्भाषायां गुरोर्भाषमाणस्य विचालभाषणरूपायाम्, उवरिभासाए उपरिभाषायां गुरोर्भाषणानन्तरमेव विशेषभाषणरूपायाम्; एषु भक्तादिषु जं किंचि यत् किञ्चित् समस्तं सामान्यतो वा, मज्झ मम, विणयपरिहीणं विनयपरिहीनं शिक्षावियुक्तं 'संजातम्' इति शेषः। विनयपरिहीनस्यैव द्वैविध्यमाह—'सुहुमं वा बायरं वा' सूक्ष्ममल्पप्रायश्चित्तविशोध्यम्, बादरं बृहत्प्रायश्चित्तविशोध्यम्; वाशब्दो द्वयोरपि मिथ्यादुष्कृतविषयत्वतुल्यतोद्भावनार्थौ, तुब्भे जानहेति यूयं जानीथ, सकलभाववेदक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वात्, अहं न याणामि अहं पुनर्न जानामि, मूढत्वात्; तथा 'यूयं न जानीथ प्रच्छन्नकृतत्वादिना, अहं जानामि, स्वयं कृतत्वात्; तथा, यूयं न जानीथ, परेण कृतत्वादिना, अहं न जानामि, विस्मरणादिना; तथा. यूयमपि जानीथ. अहमपि जानामि, द्वयोः प्रत्यक्षत्वात्' एतदपि द्रष्टव्यम्; तस्स तस्य षष्ठी-सप्तम्योरभेदात् तस्मिन्नप्रीतिकविषये विनयपरिहीणविषये च मिच्छा मि दुक्कडं मिथ्या मे दुष्कृतमिति स्वदुश्चरितानुपात्तसूचकं स्वदोषप्रतिपत्तिसूचकं वा प्रतिक्रमणमिति पारिभाषिकं वाक्यं प्रयच्छामीति शेषः; अथवा, तस्येति विभक्तिपरिणामात् तदप्रीतिकं विनयपरिहीनं च मिथ्या मोक्षसाधनविपर्ययभूतं वर्तते मे मम; तथा, दुष्कृतं पापमिति स्वदोषप्रतिपत्तिरूपमपराधक्षमणमिति। वन्दनपूर्वके चालोचनक्षमणे भवत इति कृत्वा वन्दनकानन्तरं ते व्याख्याते, अन्यथा प्रतिक्रमणे तयोरवसरः; वन्दनकस्य च फलं कर्मनिर्जरा, यदाहुः—

[1]'वंदणएणं भंते! जीवे किं अज्जिणइ?। गोअमा! अट्ठ कम्मपयडीओ[2] निविडबंधणबद्धाओ सिढिलबंधणबद्धाओ करेइ, चिरकालठिइआओ अप्पकालठिइआओ करेइ, तिव्वाणुभावाओ मंदाणुभावाओ करेइ, बहुपएसग्गाओ अप्पपएसग्गाओ करेइ, अणाइअं च णं अणवदग्गं संसारकंतारं नो परिअट्टइ। तथा,—

(१) वन्दनकेन भगवन्! जीवः किमर्जयति?। गौतम! अष्ट कर्मप्रकृतीर्निबिडबन्धनबद्धाः शिथिलबन्धनबद्धाः करोति, चिरकालस्थितिका अल्पकालस्थितिकाः करोति, तीव्रानुभावा मन्दानुभावाः करोति, बहुप्रदेशिका अल्पप्रदेशिकाः करोति, अनादिकं चानन्तं संसारकान्तारं नो पर्यटति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]वंदणएणं भंते! जीवे किं अज्जिणइ?। गोअमा! वंदणएणं नीयागोत्तकम्मं खवेइ उच्चागोत्तं निबंधइ, सोहग्गं च णं अप्पडिहयं आणाफलं निव्वत्तेइ।

तथा,—

[2]विणओवयारमाणस्स भंजणा पूअणा गुरुजणस्स।
तित्थयराण य आणा सुअधम्माराहणा किरिआ ॥१॥

अथ प्रतिक्रमणं—प्रतीत्युपसर्गः प्रतीपे प्रातिकूल्ये वा; क्रमू पादविक्षेपे, अस्य प्रतिपूर्वस्य भावानडन्तस्य प्रतीपं क्रमणं प्रतिक्रमणम्; अयमर्थः—शुभयोगेभ्योऽशुभयोगान्तरं क्रान्तस्य शुभेष्वेव क्रमणात् प्रतीपं क्रमणम्; यदाह,—

स्वस्थानाद् यत् परस्थानं प्रमादस्य वशाद् गतः।
तत्रैव क्रमणं भूयः प्रतिक्रमणमुच्यते ॥१॥

प्रतिकूलं वा गमनं प्रतिक्रमणम्; यदाह,—

क्षायोपशमिकाद् भावादौदयिकवशं गतः।
तत्रापि च स एवार्थः प्रतिकूलगमात् स्मृतः ॥१॥

प्रति प्रतिक्रमणं वा प्रतिक्रमणम्; उक्तं च,—

प्रति प्रतिप्रवर्तनं वा शुभेषु योगेषु मोक्षफलदेषु।
निःशल्यस्य यतेर्यत् तद् विज्ञेयं प्रतिक्रमणम् ॥१॥

---

(१) वन्दनकेन भगवन्! जीवः किमर्जयति?। गौतम! वन्दनकेन नीचगोत्रकर्म क्षपयति, उच्चगोत्रं निबध्नाति, सौभाग्यं चाप्रतिहतमाज्ञाफलं निर्वर्तयति।

(२) विनयोपचारमानस्य भजना पूजना गुरुजनस्य।
तीर्थंकराणां चाज्ञा श्रुतधर्माराधना क्रिया ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तच्चातीतानागतवर्तमानकालत्रयविषयम् । नन्वतीतविषयमेव प्रतिक्रमणम्, यत उक्तम्,—"[1]अईयं पडिक्कमामि, पडुप्पन्नं संवरेमि, अणागयं पच्चक्खामि" इति, तत् कथं त्रिकालविषयता ?। उच्यते --अत्र प्रतिक्रमणशब्दोऽशुभयोगनिवृत्तिमात्रार्थः,

[2]मिच्छत्तपडिक्कमणं तहेय असंजमे पडिक्कमणं ।
कसायाण पडिक्कमणं जोगाण य अप्पसत्थाणं ॥१॥

ततश्च निन्दाद्वारेणाशुभयोगनिवृत्तिरूपमतीतविषयं प्रतिक्रमणम्, प्रत्युत्पन्नविषयमपि संवरद्वारेण[1] अनागतमपि प्रत्याख्यानद्वारेणेति न कश्चिद् दोषः। तच्च दैवसिकादिभेदात् पञ्चधा—दिवसस्यान्ते दैवसिकम्, रात्रेरन्ते रात्रिकम्, पक्षस्यान्ते पाक्षिकम्, चतुर्णां मासानामन्ते चातुर्मासिकम्, संवत्सरस्यान्ते सांवत्सरिकम्। पुनर्द्वेधा—ध्रुवम्, अध्रुवं च। ध्रुवं भरतैरावतेषु प्रथमचरमतीर्थंकरतीर्थेषु, अपराधो भवतु वा मा वा, उभयकालं प्रतिक्रमणम्। अध्रुवं मध्यमतीर्थकरतीर्थेषु विदेहेषु च कारणजाते प्रतिक्रमणम्; यदाह,—

[3]सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमयाण जिणाणं कारणजाए पडिक्कमणं ॥ १ ॥

प्रतिक्रमणविधिश्चैताभ्यो गाथाभ्योऽवसेयः,—

---

(१) अतीतं प्रतिक्रमामि प्रत्युत्पन्नं संवृणोमि, अनागतं प्रत्याख्यामि ।

(२) मिथ्यात्वप्रतिक्रमणं तथैवासंयमे प्रतिक्रमणम् ।
कषायाणां प्रतिक्रमणं योगानां चाप्रशस्तानाम् ॥ १ ॥

(३) सप्रतिक्रमणो धर्मः प्रथमस्य च पश्चिमस्य च जिनस्य ।
मध्यमकानां जिनानां कारणे जाते प्रतिक्रमणम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]पञ्चविहायारविसुद्धिहेउमिह साहू सावगो वावि ।
पडिक्कमणं सह गुरुणा गुरुविरहे कुणइ इक्को वि ॥ १ ॥
वंदित्तु चेइआइं दाउं चउराइए खमासमणे ।
भूनिहिअसिरो सयलाइयारमिच्छोक्कडं देइ ॥ २ ॥
सामाइअपुव्वमिच्छा मि ठाइउं काउस्सग्गमिच्चाइं ।
सुत्तं भणिअ पलंबिअभुयकुप्परधरियपहिरणओ ॥ ३ ॥
घोडगमाईदोसेहिं विरहिअं तो करेइ उस्सग्गं ।
नाहिअहोजाणुड्ढं चउरंगुलठविअकडिपट्टो ॥ ४ ॥
तत्थ य धरेइ हिअए जहक्कमं दिणकए अईआरे ।
पारेत्तु नमुक्कारेण पढइ चउवीसथ्थयदंडं ॥ ५ ॥
संडासगे पमज्जिय उवविसिय अलग्गविअयबाहुजुओ ।
मुहणंतगं च कायं च पेहए पंचवीसइहा ॥ ६ ॥

---

(१) पञ्चविधाचारविशुद्धिहेतोरिह साधुः श्रावको वापि ।
प्रतिक्रमणं सह गुरुणा गुरुविरहे करोत्येकोऽपि ॥ १ ॥
वन्दित्वा चैत्यानि दत्त्वा चतुरादिकान् क्षमाश्रमणान् ।
भूर्निहितशिराः सकलातिचारमिथ्यादुष्कृतं दद्यात् ॥ २ ॥
सामायिकपूर्वमिच्छा मे स्थापयितुं कायोत्सर्गमित्यादि ।
सूत्रं भणित्वा प्रलम्बितभुजकूर्परपरिधानः ॥ ३ ॥
घोटकादिदोषैर्विरहितं ततः करोति उत्सर्गम् ।
नाभ्यधोजानूर्ध्वंचतुरङ्गुलस्थापितकटीपट्टः ॥ ४ ॥
तत्र च धारयति हृदये यथाक्रमं दिनकृतानतिचारान् ।
पारयित्वा नमस्कारेण पठति चतुर्विंशतिस्तवदण्डम् ॥ ५ ॥
संदंशं प्रमृज्योपविश्यालग्नविततबाहुयुगः ।
मुखानन्तकं च कायं च प्रेक्षते पञ्चविंशतिधा ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]उट्ठियट्ठिओ सविणयं विहिणा गुरुणो करेइ किइकम्मं ।
बत्तीसदोसरहिअं पणवीसावस्सगविसुद्धं ॥ ७ ॥
अह सम्ममवणअंगो करजुअविहिधरिअपुत्तिरयहरणो ।
परिचिंतिअ अइआरे जहक्कमं गुरुपुरो वियडे ॥ ८ ॥
अह उवविसित्तु सुत्तं सामाइयमाइयं पढिय पयओ ।
अब्भुट्ठियओ म्हि इच्चाइ पढइ दुह उट्ठिओ विहिणा ॥ ९ ॥
दाऊण वंदणं तो पणगाइसु जइसु खामए तिन्नि ।
किइकम्मं करे आअरिअमाइगाहातिगं पढइ ॥ १० ॥
इय सामाइयउस्सग्गसुत्तमुच्चरिय काउस्सगठिओ ।
चिंतइ उज्जोयदुगं चरित्तअइयारसुद्धिकए ॥ ११ ॥
विहिणा पारिय सम्मत्तसुद्धिहेउं च पढइ उज्जोअं ।
तह सव्वलोअअरहंतचेइयाराहणोसग्गं ॥ १२ ॥

---

(१) उत्थितस्थितः सविनयं विधिना गुरोः करोति कृतिकर्म ।
द्वात्रिंशद्दोषरहितं पञ्चविंशत्यावश्यकविशुद्धम् ॥ ७ ॥
अथ सम्यगवनताङ्गः करयुगविधिधृतवस्त्रिकारजोहरणः ।
परिचिन्तयत्यतिचारान् यथाक्रमं गुरुपुरो विस्तृतान् ॥ ८ ॥
अथोपविश्य सूत्रं सामायिकादिकं पठित्वा प्रयतः ।
अभ्युत्थितोऽस्मीत्यादि पठति द्विधोत्थितो विधिना ॥ ९ ॥
दत्त्वा वन्दनं ततः पञ्चकादिषु यतिषु क्षमयेत् त्रिः ।
कृतिकर्म कुर्यादाचार्यादिगाथात्रिकं पठति ॥ १० ॥
इति सामायिकोत्सर्गसूत्रमुच्चार्य कायोत्सर्गस्थितः ।
चिन्तयत्युद्द्योतद्विकं चारित्रातिचारशुद्धिकृते ॥ ११ ॥
विधिना पारयित्वा सम्यक्त्वशुद्धिहेतोश्च पठेदुद्द्योतम् ।
तथा सर्वलोकार्हच्चैत्याराधनोत्सर्गम् ॥ १२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]काउं उज्जोगगरं चिंतिय पारेइ सुद्धसम्मत्तो ।
पुक्खरवरदीवड्ढं कड्ढइ सुअसोहणनिमित्तं ॥ १३ ॥
पुण पणवीसोस्सासं उस्सग्गं कुणइ पारए विहिणा ।
तो सयलकुसलकिरियाफलाण सिद्धाण पढइ थयं ॥ १४ ॥
[2]अह सुअसमिद्धिहेउं सुअदेवीए करेइ उस्सग्गं ।
चिंतेइ नमोक्कारं सुणइ वदेइ व्व तीइ थुइं ॥ १५ ॥
एवं खेत्तसुरीए उस्सग्गं कुणइ सुणइ देइ थुइं ।
पढिऊण पंचमंगलमुववसिइ पमज्ज संडासे ॥ १६ ॥
पुव्वविहिणेव पेहिय पुत्तिं दाऊण वंदणं गुरुणो ।
इच्छामो अणुसट्ठिं ति भणिय जाणूहिंतो ठाइ ॥ १७ ॥
गुरुथुइगहणे थुइ तिन्नि वद्धमाणक्खरस्सरो पढइ ।
सक्कत्थवं थवं पढिअ कुणइ पच्छित्तउस्सग्गं ॥ १८ ॥

---

(१) कृत्वोद्द्योतकरं चिन्तयित्वा पारयति शुद्धसम्यक्त्वः ।
पुष्करवरद्वीपार्धं पठति श्रुतशोधननिमित्तम् ॥ १३ ॥
पुनः पञ्चविंशत्युच्छ्वासमुत्सर्गं करोति पारयति विधिना ।
ततः सकलकुशलक्रियाफलानां सिद्धानां पठेत् स्तवम् ॥ १४ ॥
(२) अथ श्रुतसमृद्धिहेतोः श्रुतदेव्याः कुर्यादुत्सर्गम् ।
चिन्तयेद् नमस्कारं शृणुयाद् वदेद् वा तस्याः स्तुतिम् ॥ १५ ॥
एवं क्षेत्रसुर्या उत्सर्गं कुर्यात् शृणुयाद् दद्यात् स्तुतिम् ।
पठित्वा पञ्चमङ्गलमुपविशेत् प्रमृज्य संदंशम् ॥ १६ ॥
पूर्वविधिनैव प्रेक्ष्य वस्त्रिकां दत्त्वा वन्दनं गुरोः ।
इच्छामोऽनुशास्तिमिति भणित्वा जानुभ्यां तिष्ठेत् ॥ १७ ॥
गुरुस्तुतिग्रहणे स्तुतीस्तिस्रो वर्धमानाक्षरस्वरः पठेत् ।
शक्रस्तवं स्तवं पठित्वा कुर्यात् प्रायश्चित्तोत्सर्गम् ॥ १८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]एवं ता देवसिअं राइयमवि एवमेव नवरि तहिं ।
पढमं दाउं मिच्छा मि दुक्कडं पढइ सक्कत्थयं ॥ १९ ॥
उट्ठिय करेइ विहिणा उस्सग्गं चिंतए अ उज्जोअं ।
बीयं दंसणसुद्धीए चिंतए तत्थ इममेव ॥ २० ॥
तइए निसाअइआरं जहक्कमं चिंतिऊण पारेइ ।
सिद्धत्थयं पढित्ता पमज्ज संडासमुवविसइ ॥ २१ ॥
पुव्वं व पुत्तिपेहणवंदणमालोयसुत्तपढणं च ।
वंदणखामणवंदणगाहातिगपढणमुस्सग्गो ॥ २२ ॥
तत्थ य चिंतइ संजमजोगाण न होइ जेण मे हाणी ।
तं पडिवज्जामि तवं छम्मासं ता न काउमलं ॥ २३ ॥
एगाइगुणतीसूणयं पि न सहो न पंचमासमवि ।
एवं चउ ति दुमासं न समत्थो एगमासं पि ॥ २४ ॥

---

(१) एवं तावद् दैवसिकं रात्रिकमप्येवमेव नवरं तत्र ।
प्रथमं दत्त्वा मिथ्या मे दुष्कृतं पठेत् शक्रस्तवम् ॥ १९ ॥
उत्थाय कुर्याद् विधिनोत्सर्गं चिन्तयेच्चोद्द्योतम् ।
द्वितीयं दर्शनशुद्धौ चिन्तयेत् तत्रेदमेव ॥ २० ॥
तृतीये निशातीचारं यथाक्रमं चिन्तयित्वा पारयेत् ।
सिद्धस्तवं पठित्वा प्रमृज्य संदंशमुपविशेत् ॥ २१ ॥
पूर्वमिव वस्त्रिकाप्रेक्षणं वन्दनमालोचसूत्रपठनं च ।
वन्दनक्षमणावन्दनगाथात्रिकपठनमुत्सर्गः ॥ २२ ॥
तत्र च चिन्तयेत् संयमयोगानां न भवति येन मे हानिः ।
तत् प्रतिपद्ये तपः षड् मासांस्तावद् न कर्तुमलम् ॥ २३ ॥
एकाद्येकोनत्रिंशदूनकमपि न सहो न पञ्च मासानपि ।
एवं चतुरस्त्रीन् द्वौ मासौ न समर्थ एकमासमपि ॥ २४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]जा तं पि तेरसूणं चउतीसइमाइअं दुहाणीए ।
जाव चउत्थं तो आयंबिलाइ जा पोरिसि नमो वा ॥ २५ ॥
जं सक्कं तं हियए धरेत्तु पारेत्तु पेहए पोत्तिं ।
दाउं वंदणमसढो तं चिय पच्चक्खए विहिणा ॥ २६ ॥
इच्छामो अणुसट्ठिं ति भणिय उवविसिअ पढइ तिन्नि थुई ।
मिउसद्देणं सक्कत्थयाइ तो चेइए वंदे ॥ २७ ॥
अह पक्खियं चउद्दसिदिणम्मि पुव्वं व तत्थ देवसिअं ।
सुत्तंतं पडिक्कमिउं तो सम्ममिमं कमं कुणइ ॥ २८ ॥
मुहपोत्ति वंदणयं संबुद्धाखामणं तहालोए ।
वंदण पत्तेयक्खामणं च वंदणयमह सुत्तं ॥ २९ ॥
सुत्तं अब्भुट्ठाणं उस्सग्गो पुत्ति वंदणं तह य ।
पज्जंतियखामणं तह चउरो थोभवंदणया ॥ ३० ॥

---

(१) जातमपि त्रयोदशोनं चतुस्त्रिंशदादिकं द्विहान्या ।
यावच्चतुर्थं तत आचाम्लादि यावत् पौरुषीं नमो वा ॥ २५ ॥
यत् शक्यं तद् हृदये धारयित्वा पारयेत् प्रेक्षेत वस्त्रिकाम् ।
दत्त्वा वन्दनमशठस्तदेव प्रत्याख्यायाद् विधिना ॥ २६ ॥
इच्छामोऽनुशास्तिमिति भणित्वोपविश्य पठेत् तिस्रः स्तुतीः ।
मृदुशब्देन शक्रस्तवादि ततश्चैत्यानि वन्देत ॥ २७ ॥
अथ पाक्षिकं चतुर्दशीदिने पूर्वमिव तत्र दैवसिकम् ।
सूत्रान्तं प्रतिक्रम्य ततः सम्यगिमं क्रमं कुर्यात् ॥ २८ ॥
मुखवस्त्रिका वन्दनकं संबुद्धक्षमणा तथालोचः ।
वन्दनं प्रत्येकं क्षमणा च वन्दनकमथ सूत्रम् ॥ २९ ॥
सूत्रमभ्युत्थानमुत्सर्गो वस्त्रिका वन्दनं तथा च ।
पार्यन्तिकक्षमणा तथा चत्वारि स्तोभवन्दनकानि ॥ ३० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]पुव्वविहिणेव सव्वं देवसियं वंदणाइ तो कुणइ ।
सेज्जसुरीउस्सग्गे भेओ संतिथयपढणे अ ॥ ३१ ॥
एवं चिय चउमासे वरिसे अ जहक्कमं विही णेओ ।
पक्खचउमास वरिसेसु नवरि नामम्मि नाणत्तं ॥ ३२ ॥
तह उस्सग्गोज्जोआ बारस वीसा समंगलिग चत्ता ।
संबुद्धखामणं ति पण सत्त साहूण जहसंखं ॥ ३३ ॥

प्रतिक्रमणसूत्रविवरणं तु ग्रन्थविस्तरभयाद् नोक्तम् ॥

अथ कायोत्सर्गः। कायस्य शरीरस्य स्थानमौनध्यानक्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः क्रियान्तराध्यासमधिकृत्य य उत्सर्गस्त्यागो 'नमो अरहंताणं' इति वचनात् प्राक्. स कायोत्सर्गः। स च द्विविधः, चेष्टायामभिभवे च। चेष्टायां गमनागमनादावीर्यापथिकादिप्रतिक्रमणभावी, अभिभवे उपसर्गजयार्थम्; यदाहुः—

[2]सो उस्सग्गो दुविहो चेट्ठाए अभिभवे अ नायव्वो ।
भिक्खायरिया पढमो उसग्गभिउंजणे बीओ ॥ १ ॥

---

(१) पूर्वविधिनैव सर्वं दैवसिकं वन्दनादि ततः कुर्यात् ।
शय्यासुर्युत्सर्गे भेदः शान्तिस्तवपठने च ॥ ३१ ॥
एवमेव चतुर्मासे वर्षे च यथाक्रमं विधिर्ज्ञेयः ।
पक्षचतुर्मासवर्षेषु, नवरं नाम्नि नानात्वम् ॥ ३२ ॥
तथोत्सर्गउद्द्योता द्वादश विंशतिः समङ्गलिकाश्चत्वारिंशत् ।
संबुद्धक्षमणास्त्रिस्रः पञ्च सप्त साधूनां यथासंख्यम् ॥ ३३ ॥

(२) स उत्सर्गो द्विविधश्चेष्टायामभिभवे च ज्ञातव्यः ।
भिक्षेर्यायां प्रथम उत्सर्गाभियोजने द्वितीयः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र चेष्टाकायोत्सर्गोऽष्ट-पञ्चविंशति-सप्तविंशति-त्रिशती-पञ्च-शती-अष्टोत्तर-सहस्रोच्छ्वासान् यावद् भवति, अभिभवकायोत्सर्गस्तु मुहूर्तादारभ्य संवत्सरं यावद् बाहुबलेरिव भवति । स च कायोत्सर्ग उच्छ्रित निषण्ण-शयितभेदेन त्रेधा । एकैकश्चतुर्धा—उच्छ्रितो-च्छ्रितो द्रव्यत उच्छ्रित ऊर्ध्वस्थानं भावत उच्छ्रितो धर्मध्यान-शुक्लध्याने इति प्रथमः । तथा, द्रव्यत उच्छ्रित ऊर्ध्वस्थानं भावतोऽनुच्छ्रितः कृष्णादिलेश्यापरिणाम इति द्वितीयः । द्रव्यतो नोच्छ्रितो नोर्ध्वस्थानं भावत उच्छ्रितो धर्मध्यान-शुक्लध्याने इति तृतीयः । न द्रव्यतो नापि भावत उच्छ्रित इति चतुर्थः । एवं निषण्ण-शयितयोरपि चतुर्भङ्गी वाच्या ।

दोषरहितश्च कायोत्सर्गः कार्यः । दोषाश्चैकविंशतिः;—आकुञ्चितैकपादस्य घोटकस्येव स्थानं घोटकदोषः ।१। खरवात-प्रकम्पितायाः लतायाः इव कम्पनं लतादोषः ।२। स्तम्भमवष्टभ्य स्थानं स्तम्भदोषः ।३। कुड्यमवष्टभ्य स्थानं कुड्यदोषः ।४। माले शिरोऽवष्टभ्य स्थानं मालदोषः ।५। हस्तौ गुह्यदेशे स्थापयित्वा शबर्या इव स्थानं शबरीदोषः ।६। शिरोऽवनम्य कुलवध्वा इव स्थानं वधूदोषः ।७। निगडितस्येव विस्तृतपादस्य मिलितपादस्य वा स्थानं निगडदोषः ।८। नाभेरुपर्याजानु चोलपट्टकं निबध्य स्थानं लम्बोत्तरदोषः ।९। दंशादिवारणार्थमज्ञानाद् वा स्तने चोलपट्टकं निबध्य स्थानं स्तनदोषः ; 'धात्रीवद् बालार्थं स्तना-वुन्नमय्य स्थानं वा' इत्येके ।१०। पार्ष्णी मीलयित्वाऽग्रचरणौ विस्तार्य, अङ्गुष्ठौ वा मीलयित्वा पार्ष्णी विस्तार्य स्थानं शकटो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ङ्गिकादोषः ।११। व्रतिनीवत् पटेन शरीरमाच्छाद्य स्थानं संयतीदोषः ।१२। खलीनमिव रजोहरणं पुरस्कृत्य स्थानं खलीन-दोषः ; अन्ये खलीनार्तहयवदूर्ध्वाधःशिरःकम्पनं खलीनदोषमाहुः ।१२। वायसस्येवेतस्ततो नयनगोलकभ्रमणं दिगविचक्षणं वा वायसदोषः ।१४। षट्पदिकाभयेन कपित्थवच्चोलपट्टं संवृत्य मुष्टौ गृहीत्वा स्थानं कपित्थदोषः ; 'एवमेव मुष्टिं बद्ध्वा स्थानम्' इत्यन्ये ।१५। भूताविष्टस्येव शीर्षं कम्पयतः स्थानं शीर्षोत्कम्पित-दोषः ।१६। मूकस्येवाव्यक्तशब्दं कुर्वतः स्थानं मूकदोषः ।१७। आलापकगणनार्थमङ्गुलीश्चालयतः स्थानमङ्गुलिदोषः ।१८। व्यापा-रान्तरनिरूपणार्थं भ्रूसंज्ञामिवमेव वा भ्रूनृत्तं कुर्वतः स्थानं भ्रूदोषः ।१९। निष्पद्यमानवारुण्या इव बुडबुडारावेण स्थानं वारुणीदोषः ; 'वारुणीमत्तस्येव घूर्णमानस्य स्थानं वारुणीदोषः' इत्यन्ये ।२०। अनुप्रेक्षमाणस्येवौष्ठपुटे चलयतः स्थानमनुप्रेक्षा-दोषः ।२१।

१ यदाहुः ;—

[1]घोडग लया य खंभे कुड्डे माले य सवरि वहु णियले ।
लंबोत्तर थण उद्धी संजइ खलिणे य वायस कविट्ठे ॥१॥
सीसोकंपिअ मूइ अंगुली भमुहा य वारुणी पेहा । इति ।

एके त्वन्यानपि कायोत्सर्गदोषानाहुः, यथा—

(१) घोटको लता च स्तम्भः कुड्यं मालं च शबरी वधूर्निगडः ।
लम्बोत्तरं स्तन उर्द्धिः संयती खलीनं च वायसः कपित्थः ॥१॥
शीर्षोत्कम्पितं मूकोऽङ्गुलिर्भ्रूश्च वारुणी प्रेक्षा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निष्ठीवनं वपुःस्पर्शः प्रपञ्चबहुला स्थितिः ।
सूत्रोदितविधेर्न्यूनं वयोऽपेक्षाविवर्जनम् ॥१॥
कालापेक्षाव्यतिक्रान्तिर्व्याक्षेपासक्तचित्तता ।
लोभाकुलितचित्तत्वं पापकार्योद्यमः परः ॥२॥
कृत्याकृत्यविमूढत्वं पट्टिकाद्युपरि स्थितिः । इति ।

कायोत्सर्गस्यापि फलं निर्जरैव ; यदाहुः—

'[1]काउस्सग्गे जह संठिअस्स भज्जंति अंगुवंगाइं ।
इय भिंदंति सुविहिया अट्ठविहं कम्मसंघायं ॥१॥

कायोत्सर्गसूत्रार्थः प्राग् व्याख्यात एव ॥

अथ प्रत्याख्यानम्—प्रति प्रवृत्तिप्रतिकूलतया आ मर्यादया ख्यानं प्रकथनं प्रत्याख्यानम् । तच्च द्वेधा—मूलगुणरूपमुत्तरगुणरूपं च । मूलगुणा यतीनां महाव्रतानि, श्रावकाणामणुव्रतानि ; उत्तरगुणास्तु यतीनां पिण्डविशुद्ध्यादयः, श्रावकाणां तु गुणव्रतशिक्षाव्रतानि । मूलगुणानां तु प्रत्याख्यानत्वं हिंसादिनिवृत्तिरूपत्वात्, उत्तरगुणानां तु पिण्डविशुद्ध्यादीनां दिग्व्रतादीनां च प्रतिपक्षनिवृत्तिरूपत्वात् । तत्र स्वयं कृतप्रत्याख्यानः काले विनयपूर्वकं सम्यगुपयुक्तो गुरुवचनमनुच्चरन् स्वयं जानन् ज्ञस्यैव गुरोः पार्श्वे प्रत्याख्यानं करोति । ज्ञत्वे चतुर्भङ्गी । द्वयोर्ज्ञत्वे प्रथमो भङ्गः शुद्धः ।१। गुरोर्ज्ञत्वे शिष्यस्याज्ञत्वे द्वितीयः । तत्र तत्कालं शिष्यं संक्षेपतः प्रबोध्य यदा गुरुः प्रत्याख्यानं कारयति

(१) कायोत्सर्गे यथा संस्थितस्य भज्यन्तेऽङ्गोपाङ्गानि ।
एवं भिन्दन्ति सुविहिता अष्टविधं कर्मसंघातम् ॥१॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदाऽयमपि शुद्धः, अन्यथा त्वशुद्धः ।२। गुरोरज्ञत्वे शिष्यस्य ज्ञत्वे तृतीयः। अयमपि तथाविधगुरोरप्राप्तौ गुरुबहुमानाद् गुरोः पितृ-पितृव्य-मातुल-ज्येष्ठभ्रात्रादिकं साक्षिणं कुर्वतस्तृतीयः शुद्धः, अन्यथा त्वशुद्धः ।३। द्वयोरज्ञत्वे चतुर्थः, असावशुद्ध एव ।४।

उत्तरगुणप्रत्याख्यानं प्रतिदिनोपयोगि द्विविधम्—संकेतप्रत्याख्यानमद्धाप्रत्याख्यानं च। तत्र संकेतप्रत्याख्यानं श्रावकः पौरुष्यादिप्रत्याख्यानं कृत्वा क्षेत्रादौ गतो गृहे वा तिष्ठन् 'भोजनप्राप्तेः प्राक् प्रत्याख्यानरहितो मा भूवम्' इत्यङ्गुष्ठादिकं संकेतं करोति—'यावदङ्गुष्ठं मुष्टिं ग्रन्थिं वा न मुञ्चामि, गृहं वा न प्रविशामि, स्वेदबिन्दवो वा यावद् न शुष्यन्ति, एतावन्तो वोच्छ्वासा यावद् न भवन्ति, जलार्द्रमञ्चिकायां यावदेते बिन्दवो न शुष्यन्ति, दीपो वा यावद् न निर्वाति तावद् न भुञ्जे' इति ; यदाहुः—

[1]अंगुट्ठमुट्ठिगंठीघरसेऊसासथिवुगजोइक्खे ।
एअं संकेय भणियं धीरेहिं अणंतनाणीहिं ॥१॥
नवकार पोरिसीए पुरिमड्ढेक्कासणेगठाणे य ।
आयंबिल भत्तट्ठे चरमे अ अभिग्गहे विगई ॥२॥

---

(१) अङ्गुष्ठमुष्टिग्रन्थिगृहस्वेदोच्छ्वासस्तिबुकज्योतिष्कान् ।
एतत् सङ्केतं भणितं धीरैरनन्तज्ञानिभिः ॥१॥
नमस्कारः पौरुषी पूर्वार्धं एकाशनमेकस्थानं च ।
आचामाम्लमभक्तार्थश्चरमोऽभिग्रहो विकृतिः ॥२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अद्धा कालस्तद्विषयं प्रत्याख्यानमद्धाप्रत्याख्यानम्। तच्च नमस्कारसहितं, पौरुषी, दिनपूर्वार्धः, एकाशनम्, एकस्थानकम्, आचामाम्लम्, उपवासः, चरमम्, अभिग्रहः, विकृतिनिषेधश्चेति दशविधम्; यदाहुः—

नन्वेकाशनादिप्रत्याख्यानं कथमद्धाप्रत्याख्यानम्; न हि तत्र कालनियमोऽस्ति? सत्यम्, अद्धाप्रत्याख्यानपूर्वाण्येकाशनादीनि प्रायेण क्रियन्त इत्यद्धाप्रत्याख्यानत्वेनोच्यन्ते। प्रत्याख्यानं चापवादरूपाकारसहितं कर्तव्यम्, अन्यथा तु भङ्गः स्यात्, स च दोषाय; यदाहुः—

[1]वयभंगे गुरुदोसो थेवस्स वि पालणा गुणकरी ओ।
गुरुलाघवं च णेयं धम्मम्मि अओ अ आगारा ॥१॥

ते च नमस्कारसहितादिषु यावन्तो भवन्ति तावन्त उपदर्श्यन्ते। तत्र नमस्कारसहिते मुहूर्तमात्रकाले नमस्कारोच्चारणावसाने प्रत्याख्याने द्वावाकारौ भवतः। आक्रियते विधीयते प्रत्याख्यानभङ्गपरिहारार्थमित्याकारः प्रत्याख्यानापवादः। ननु कालस्यानुक्तत्वात् संकेतप्रत्याख्यानमेवेदम्। नैवम्, सहितशब्देन मुहूर्तस्य विशेषणात्। अथ मुहूर्तशब्दो न श्रूयते, तत् कथं तस्य विशेष्यत्वम्?। उच्यते—अद्धाप्रत्याख्यानमध्येऽस्य पाठात्, पौरुषीप्रत्याख्यानस्य वक्ष्यमाणत्वादवश्यं तदर्वाग् मुहूर्त एवावशिष्यते। अथ मुहूर्तद्वयादिकमपि कुतो न लभ्यते?। उच्यते—अल्पाकार-

(१) व्रतभङ्गे गुरुदोषः स्तोकस्यापि पालना गुणकरी तु।
गुरुलाघवं च ज्ञेयं धर्मेऽतश्चाकाराः ॥१॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वादस्य। पौरुष्यां हि षडाकाराः, तदस्मिन् प्रत्याख्याने आकारद्वयवति स्वल्प एव कालोऽवशिष्यते। स च नमस्कारेण सहितः, पूर्णेऽपि काले नमस्कारपाठमन्तरेण प्रत्याख्यानस्यापूर्यमाणत्वात्; सत्यपि नमस्कारपाठे मुहूर्ताभ्यन्तरे प्रत्याख्यानभङ्गात्। तत् सिद्धमेतत्—मुहूर्तमानकालं नमस्कारसहितं प्रत्याख्यानमिति। अथ प्रथम एव मुहूर्त इति कुतो लभ्यते?। सूत्रप्रामाण्यात्, पौरुषीवत्। सूत्रं चेदम्:—

उग्गए सूरे नमोक्कारसहिअं पच्चक्खाइ चउव्विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं वोसिरइ।

व्याख्या—उद्गते सूरे सूर्योद्गमादारभ्येत्यर्थः, नमस्कारेण परमेष्ठिस्तवेन सहितं युक्तं नमस्कारसहितं प्रत्याख्याति, "सर्वे धातवः करोत्यर्थेन व्याप्ताः" इतिन्यायात् नमस्कारेण सहितं प्रत्याख्यानं करोति। इदं गुरोरनुवादभङ्ग्या वचनम्। शिष्यस्तु 'प्रत्याख्यामि' इत्येतदाह। एवं 'व्युत्सृजति' इत्यत्रापि वाच्यम्। कथम्?। चतुर्विधमिति, न पुनरेकविधादिकम्, आहारमभ्यवहार्यं 'व्युत्सृजति' इत्युत्तरेण योगः। इदं चतुर्विधाहारस्यैव भवतीति संप्रदायः, रात्रिभोजनव्रततीरणप्रायत्वादस्य। अशनमित्याद्याहारचातुर्विध्यकीर्तनम्। अशनादय आहाराः पूर्वं व्याख्याताः। अत्र नियमभङ्गभयादाकारावाह—अन्नत्थणाभोगेणं सहसागारेणं, अत्र पञ्चम्यर्थे तृतीया, अन्यत्रानाभोगात्, सहसाकाराच्च; एतौ वर्जयित्वेत्यर्थः। तत्रानाभोगोऽत्यन्तविस्मृतिः। सहसाकारोऽतिप्रवृत्तयोगानिवर्तनम्। व्युत्सृजति परिहरति॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ पौरुषीप्रत्याख्यानम्—

पोरिसिं पच्चक्खाइ उग्गए सूरे चउव्विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नेणं कालेणं दिसामोहेणं साहुवयणेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ ॥

पुरुषः प्रमाणमस्याः पौरुषी छाया तद्युक्तः कालोऽपि पौरुषी प्रहर इत्यर्थः, तां प्रत्याख्याति पौरुषीप्रत्याख्यानं करोतीत्यर्थः। कथम्?। चतुर्विधमशन पान-खाद्य-स्वाद्यलक्षणं 'व्युत्सृजति' इत्युत्तरेण योगः। अत्र षडाकाराः। प्रथमौ द्वौ पूर्ववत्। अन्यत्र प्रच्छन्नकालात्, दिग्मोहात्, साधुवचनात्, सर्वसमाधि-प्रत्ययाकाराच्च। प्रच्छन्नता च कालस्य, यदा मेघेन रजसा गिरिणा वान्तरितत्वात् सूरो न दृश्यते, तत्र पौरुषीं पूर्णां ज्ञात्वा भुञ्जानस्यापूर्णायामपि तस्यां न भङ्गः; ज्ञात्वा त्वर्धभुक्तेनापि तथैव स्थातव्यं यावत् पौरुषी पूर्णा भवति, पूर्णायां ततः परं भोक्तव्यम्; न पूर्णेति ज्ञाते तु भुञ्जानस्य भङ्ग एव। दिग्मोहस्तु यदा पूर्वामपि पश्चिमेति जानाति तदाऽपूर्णायामपि पौरुष्यां मोहाद् भुञ्जानस्य न भङ्गः, मोहविगमे तु पूर्ववदर्धभुक्तेनापि स्थातव्यम्; निरपेक्षतया भुञ्जानस्य भङ्ग एवेति। साधुवचनं 'उद्घाटा पौरुषी' इत्यादिकं विभ्रमकारणम्, तत् श्रुत्वा भुञ्जा-नस्य न भङ्गः, भुञ्जानेन तु ज्ञाते, अन्येन वा कथिते पूर्ववत् तथैव स्थातव्यम्। तथा, कृतपौरुषीप्रत्याख्यानस्य समुत्पन्नतीव्रशूलादि-दुःखतया संजातयोरार्त-रौद्रध्यानयोः सर्वथा निरासः सर्वसमाधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तस्य प्रत्ययः कारणं स एवाकारः प्रत्याख्यानापवादः सर्वसमाधि-प्रत्ययाकारः---समाधिनिमित्तमौषधपथ्यादिप्रवृत्तावपूर्णायामपि पौरु[1]ष्यां भुङ्क्ते तदा न भङ्ग इत्यर्थः। वैद्यादिर्वा कृतपौरुषी-प्रत्याख्यानोऽन्यस्यातुरस्य समाधिनिमित्तं यदाऽपूर्णायामपि पौरुष्यां भुङ्क्ते तदा न भङ्गः, अर्धभुक्ते त्वातुरस्य समाधौ मरणे वोत्पन्ने ज्ञाते सति यथैव भोजनस्य त्यागः॥

सार्धपौरुषीप्रत्याख्यानं पौरुषीप्रत्याख्यान एवान्तर्भूतम्॥

अथ पूर्वार्धप्रत्याख्यानम्—

सूरे उग्गए पुरिमड्ढं पच्चक्खाइ चउव्विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं महत्तरागारेणं सव्वसमाहिवत्तिया-गारेणं वोसिरइ॥

पूर्वं च तदर्धं च पूर्वार्धं दिनस्याद्यं प्रहरद्वयं पूर्वार्धं प्रत्या-ख्याति पूर्वार्धप्रत्याख्यानं करोति। षडाकाराः पूर्ववत्। 'महत्त-रागारेणं' इति, महत्तरं प्रत्याख्यानानुपालनलभ्यनिर्जरापेक्षया बृहत्तरनिर्जरालाभहेतुभूतं पुरुषान्तरासाध्यं ग्लानचैत्यसंघादि-प्रयोजनं तदेवाकारः प्रत्याख्यानापवादो महत्तराकारस्तस्मात् 'अन्यत्र' इति योगः। यच्चात्रैव महत्तराकारस्याभिधानं न नमस्कारसहितादौ, तत्र कालस्याल्पत्वं महत्त्वं च कारण-माचक्षते।

---

(१) ड ष्यां न।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथैकाशनप्रत्याख्यानम्। तत्राष्टावाकाराः, यत् सूत्रम्:—

एक्कासणगं पच्चक्खाइ चउव्विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं सागारिआगारेणं आउंटणपसारणेणं गुरुअब्भुट्ठाणेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ॥

एकं सकृदशनं भोजनम्, एकं वासनं पुताचलनतो यत्र तदेकाशनमेकासनं च; प्राकृते द्वयोरपि 'एगासणं' इति रूपम्, तत् प्रत्याख्याति—एकाशनप्रत्याख्यानं करोतीत्यर्थः। अत्राद्यावन्त्यौ च द्वावाकारौ पूर्ववत्। सागारिआगारेणं सह अगारेण वर्तत इति सागारः स एव सागारिको गृहस्थः स एवाकारः प्रत्याख्यानापवादः सागारिकाकारस्तस्मादन्यत्र। गृहस्थसमक्षं हि साधूनां भोक्तुं न कल्पते, प्रवचनोपघातसंभवात्; अत एवोक्तम्;—

[1]छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं।
आहारे नीहारे दुगुंछियपिंडगहणे अ॥ १॥

ततश्च भुञ्जानस्य यदा सागारिकः समायाति, स यदि चलस्तदा क्षणं प्रतीक्षते, अथ स्थिरस्तदा स्वाध्यायादिव्याघातो मा भूदिति ततः स्थानादन्यत्रोपविश्य भुञ्जानस्यापि न भङ्गः। गृहस्थस्य तु येन दृष्टं भोजनं न जीर्यति स सागारिकः। आउंटणपसारणेणं—आउंटणं आकुञ्चनं जङ्घादेः संकोचनं प्रसारणं च तस्यैवाकुञ्चितस्य ऋजूकरणम्, आकुञ्चने प्रसारणे चासहिष्णुतया

(१) षट्कायदयावानपि संयतो दुर्लभं करोति बोधिम्।
आहारे नीहारे जुगुप्सितपिण्डग्रहणे च॥ १॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्रियमाणे किञ्चिदासनं चलति ततोऽन्यत्र प्रत्याख्यानम्। गुरु-अब्भुट्ठाणेणं गुरोरभ्युत्थानार्हस्याचार्यस्य प्राघुणकस्य वाऽभ्युत्थानं प्रतीत्यासनत्यजनं गुर्वभ्युत्थानं ततोऽन्यत्र। अभ्युत्थानं चावश्य-कर्त्तव्यत्वाद् भुञ्जानेनापि कर्तव्यमिति न तत्र प्रत्याख्यानभङ्गः। पारिट्ठावणिआगारेणं परिष्ठापनं सर्वथा त्यजनं प्रयोजनमस्य पारिष्ठापनिकमन्नं तदेवाकारः पारिष्ठापनिकाकारः, ततोऽन्यत्र। तत्र हि त्यज्यमाने बहुदोषसंभवात्, आग्रीयमाणे चागमिक-न्यायेन गुणसंभवाच्च[२] गुर्वाज्ञया पुनर्भुञ्जानस्य न भङ्गः। वोसिरइ इति, अनेकासनमशनाद्याहारं च परिहरति॥

अथैकस्थानकम्। तत्र सप्ताकाराः। अत्र सूत्रम्—एकट्ठाणं पच्चक्खाइ इत्याद्येकाशनवत्। आकुञ्चनप्रसारणाकारवर्जमेकम-द्वितीयं स्थानमङ्गविन्यासरूपं यत्र तदेकस्थानं प्रत्याख्यानम्। यद् यथा भोजनकालेऽङ्गोपाङ्गं स्थापितम्, तस्मिंस्तथास्थित एव भोक्तव्यम्। मुखस्य पाणिश्चाशक्यपरिहारत्वाच्चलनं न प्रतिषिद्धम्। आकुञ्चनप्रसारणाकारवर्जनं चैकाशनतो भेदज्ञापनार्थम्, अन्यथै-कासनमेव स्यात्॥

अथाचामाम्लम्। तत्राष्टावाकाराः। अत्र सूत्रम्;—

आयंबिलं पच्चक्खाइ अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं

---

(१) च- न वर्जनम्।

(२) च- ज्ञ तस्य गु-।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उक्खित्तविवेगेणं गिहत्थसंसट्ठेणं पारिट्ठावणिआगारेणं महत्त-रागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ।

आचामोऽवस्रावणम्, अम्लं चतुर्थो रसः, एते च प्रायेण व्यञ्जने यत्र भोजने ओदन-कुल्माष-सक्तुप्रभृतिके तदाचामाम्लं समयभाषयोच्यते, तत् प्रत्याख्याति—आचामाम्लप्रत्याख्यानं करोतीत्यर्थः। आद्यावन्त्याश्च त्रय आकाराः पूर्ववत्। लेवालेवेणं लेपो भोजनभाजनस्य विकृत्या तीमनादिना वाऽऽचामाम्लप्रत्या-ख्यातुरकल्पनीयेन लिप्तता, अलेपो विकृत्यादिना लिप्तपूर्वस्य भोजनभाजनस्यैव हस्तादिना संलेखनतोऽलिप्तता, लेपश्चालेपश्च लेपालेपं तस्मादन्यत्र—भाजने विकृत्याद्यवयवसद्भावेऽपि न भङ्ग इत्यर्थः। उक्खित्तविवेगेणं शुष्कौदनादिभक्ते पतितपूर्वस्याचामा-म्लप्रत्याख्यानवतामयोग्यस्याद्रवविकृत्यादिद्रव्यस्योत्क्षिप्तस्योद्‌धृतस्य विवेको निःशेषतया त्याग उत्क्षिप्तविवेक उत्क्षिप्तत्याग इत्यर्थः, तस्मादन्यत्र—भोक्तव्यद्रव्यस्याभोक्तव्यद्रव्यस्पर्शेनापि न भङ्ग इति भावः। यत्तूत्क्षेप्तुं न शक्यं तस्य भोजने भङ्गः। गिहत्थसंसट्ठेणं गृहस्थस्य भक्तदायकस्य संबन्धि करोटिकादिभाजनं विकृत्यादि-द्रव्येणोपलिप्तं गृहस्थसंसृष्टं, ततोऽन्यत्र। विकृत्यादिसंसृष्टभाजनेन हि दीयमानभक्तमकल्पद्रव्यावयवमिश्रं भवति, न च तद् भुञ्जान-स्यापि भङ्गः, यद्यकल्प्यद्रव्यरसो बहु न ज्ञायते। वोसिरइ इति—अनाचामाम्लं चतुर्विधाहारं च व्युत्सृजति॥

अथाभक्तार्थप्रत्याख्यानम्। तत्र पञ्चाकाराः, यत् सूत्रम्;—

सूरे उग्गए अब्भत्तट्ठं पच्चक्खाइ चउव्विहं पि आहारं असणं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ ।

सूरे उग्गते सूर्योद्गमादारभ्य, अनेन च भोजनानन्तरं प्रत्याख्यानस्य निषेध इत्याह भक्तेन भोजनेनार्थः प्रयोजनं भक्तार्थः, न भक्तार्थोऽभक्तार्थः, अथवा न विद्यते भक्तार्थोऽस्मिन् प्रत्याख्यानविशेषे सोऽभक्तार्थ उपवास इत्यर्थः । आकाराः पूर्ववत् । नवरं पारिष्ठापनिकाकारे विशेषः । यदि त्रिविधाहारस्य प्रत्याख्याति तदा पारिष्ठापनिकं कल्पते, यदि तु चतुर्विधाहारस्य प्रत्याख्याति पानकं च नास्ति तदा न कल्पते, पानके तूद्धरिते कल्पते । वोसिरइ इति भक्तार्थमशनादि च व्युत्सृजति ॥

अथ पानकम् । तत्र पौरुषीपूर्वार्धैकाशनैकस्थानाचामाम्लाभक्तार्थप्रत्याख्यानेषूत्सर्गतश्चतुर्विधाहारस्य प्रत्याख्यानं न्याय्यम् । यदि तु त्रिविधाहारस्य प्रत्याख्यानं करोति तदा पानकमाश्रित्य षडाकारा भवन्ति, यत् सूत्रम् ;—

पाणस्स लेवाडेण वा अलेवाडेण वा अच्छेण वा बहुलेण वा ससित्थेण वा असित्थेण वा वोसिरइ ।

इह 'अन्यत्र' इत्यस्यानुवृत्तेस्तृतीयायाः पञ्चम्यर्थत्वात् लेवाडेण वेति कृतलेपाद् वा पिच्छलत्वेन भाजनादीनामुपलेपकारकात् खर्जूरादिपानकादन्यत्र तद् वर्जयित्वेत्यर्थः । त्रिविधाहारं 'व्युत्सृजति' इति योगः । वाशब्दोऽलेपकृतपानकापेक्षयाऽवर्जनीयत्वाविशेषद्योतनार्थः, अलेपकारिणेव लेपकारिणाप्युपवासादेर्न भङ्ग इति भावः । एवमलेपकृताद् वाऽपिच्छलात् ; अच्छाद् वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्मलादुष्णोदकादेः ; बहुलाद् वा गडुलात् तिलतन्दुलधावनादेः, ससिक्थाद् वा भक्तपुलाकोपेतादवस्रावणादेः, असिक्थाद् वा सिक्थवर्जितात् पानकाहारात् ॥

अथ चरमम्। चरमोऽन्तिमो भागः। स च दिवसस्य भवस्य चेति द्विधा। तद्विषयं प्रत्याख्यानमपि चरमम्। इह च भवचरमं यावज्जीवम्। तत्र द्विविधेऽपि चत्वार आकारा भवन्ति ; यत्सूत्रम् ;—

दिवसचरिमं भवचरिमं वा पच्चक्खाइ चउव्विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं मह-त्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ।

ननु दिवसचरिमप्रत्याख्यानं निष्फलम्, एकाशनादिप्रत्या-ख्यानेनैव गतार्थत्वात्। नैवम्, एकाशनादिकं ह्यष्टाद्याकार-मेतच्च चतुराकारम्, अत आकाराणां संक्षेपकरणात् सफलमेव। अत एवैकाशनादिकं दैवसिकमेव भवति, रात्रिभोजनस्य त्रिविधं त्रिविधेन यावज्जीवं प्रत्याख्यातत्वात्। गृहस्थापेक्षया पुनरिद-मादित्योद्गमान्तम्, दिवसस्याहोरात्रपर्यायतयापि दर्शनात्। तत्र येषां रात्रिभोजननियमोऽस्ति, तेषामपीदं सार्थकम्, अनुवादक-त्वेन स्मारकत्वात्। भवचरमं तु द्व्याकारमपि भवति। यदा जानाति महत्तरसर्वसमाधिप्रत्ययरूपाभ्यामाकाराभ्यां न प्रयो-जनम्, तदाऽनाभोगसहसाकाराकारौ भवतः, अङ्गुल्यादेरना-भोगेन सहसाकारेण वा मुखे प्रक्षेपसंभवात्। अत एवेदमना-कारमप्युच्यते, आकारद्वयस्यापरिहार्यत्वात् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथाभिग्रहप्रत्याख्यानम् । तच्च दण्डप्रमार्जनादिनियमरूपम् । तत्र चत्वार आकारा भवन्ति, यथा, अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ । यदा त्वप्रावरणाभिग्रहं गृह्णाति तदा 'चोलपट्टगागारेणं' इति पञ्चम आकारो भवति, चोलपट्टकाकारादन्यत्रेत्यर्थः ॥

अथ विकृतिप्रत्याख्यानम् । तत्र नव, अष्टौ वाऽऽकाराः ; यत् सूत्रम्—

विगईओ पच्चक्खाइ अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पडुच्चमक्खिएणं पारिट्ठावणि-आगारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ ।

मनसो विकृतिहेतुत्वाद् विकृतयः, ताश्च दश, यदाहुः ;—

'[1]खीरं दहि नवणीअं घयं तहा तिल्लमेव गुड मज्जं ।

महु मंसं चेव तहा ओगाहिमगं च विगईओ ॥ १ ॥

तत्र पञ्च क्षीराणि, गोमहिष्यजोष्ट्रैलकासंबन्धभेदात् । दधि-नवनीत-घृतानि तु चतुर्भेदानि, उष्ट्रीणां तदभावात् । तैलानि चत्वारि, तिलातसीलट्टासर्षपसंबन्धभेदात् । शेषतैलानि तु न विकृतयः, लेपकृतानि तु भवन्ति । गुड इक्षुरसक्काथः । स द्विधा, पिण्डो द्रवश्च । मद्यं द्वेधा काष्ठ पिष्टोद्भवत्वात् । मधु त्रेधा,— माक्षिकम्, कौत्तिकं भ्रामरं च । मांसं त्रिविधम्, जल-स्थल-खचरजन्तूद्भवत्वात् ; अथवा मांसं त्रिविधम्, चर्म-रुधिर-मांस-

---

(१) क्षीरं दधि नवनीतं घृतं तथा तैलमेव गुडो मद्यम् ।
मधु मांसं चैव तथाऽवगाहिमकं च विकृतयः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भेदात्। अवगाहेन स्नेहबोलनेन निर्वृत्तमवगाहिमं पक्वान्नम् "भावादिमः" (सिद्धहेम-६।४ २१।) इतीमः, यत् तापिकायां घृतादिपूर्णायां चलाचलं खाद्यकादि पच्यते, तस्यामेव तापिकायां तेनैव घृतेन द्वितीयं तृतीयं च खाद्यकादि विकृतिः, ततः परं पक्वान्नानि योगवाहिनां निर्विकृतिप्रत्याख्यानेऽपि कल्पन्ते। अथैकेनैव पूपकेन तापिका पूर्यते तदा द्वितीयं पक्वान्नं निर्विकृतिप्रत्याख्यानेऽपि कल्पते, लेपकृतं तु भवति। इत्येषा वृद्धसामाचारी। एतासु च दशसु विकृतिषु मद्यमांसमधुनवनीतलक्षणाश्चतस्रो विकृतयोऽभक्ष्याः। शेषास्तु षड् भक्ष्याः। तत्र भक्ष्यासु विकृतिष्वेकादिविकृतिप्रत्याख्यानं षड्विकृतिप्रत्याख्यानं च निर्विकृतिकसंज्ञं विकृतिप्रत्याख्यानेन संगृहीतम्। आकाराः पूर्ववत्। नवरम्, गिहत्थसंसट्ठेणं इति गृहस्थेन स्वप्रयोजनाय दुग्धसंसृष्ट ओदनो दुग्धं च तमतिक्रम्योत्कर्षतश्चत्वार्यङ्गुलानि यावदुपरि वर्तते तदा तद् दुग्धमविकृतिः, पञ्चमाङ्गुलारम्भे विकृतिरेव। अनेन न्यायेनान्यासामपि विकृतीनां गृहस्थासंसृष्टत्वमागमादवसेयम्। उक्खित्तविवेगेणं इति, उत्क्षिप्तविवेक आचामाम्लवदुद्धर्तुं शक्यासु विकृतिषु द्रष्टव्यः, द्रवविकृतिषु नास्ति। पडुच्च मक्खिएणं इति, —प्रतीत्य सर्वथा रूक्षमण्डकादिकमपेक्ष्य म्रक्षितं स्नेहितमीषत्सौकुमार्योत्पादनाय म्रक्षणकृतविशिष्टस्वादुतायाश्चाभावाद् म्रक्षितमिव यद् वर्तते तत् प्रतीत्य म्रक्षितं म्रक्षिताभासमित्यर्थः। इह चायं विधिः—यद्यङ्गुल्या तैलादि गृहीत्वा मण्डकादि म्रक्षितं तदा कल्पते निर्विकृतिकस्य, धारया तु न कल्पते। व्युत्सृजति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विकृतिं त्यजतीत्यर्थः । इह च यासु विकृतिषूत्क्षिप्तविवेकः संभवति तासु नवाकाराः, अन्यासु तु द्रवरूपास्वष्टौ ।

एतदर्थसंवादिन्यो गाथाः---

[1]दो चेव नमुक्कारे आगारा छच्च पोरिसीए उ ।
सत्तेव य पुरिमड्ढे एक्कासणगम्मि अट्ठेव ॥ १ ॥
सत्तेगट्ठाणस्स उ अट्ठेव य अंबिलम्मि आगारा ।
पंचेव अब्भत्तट्ठे छप्पाणे चरिम चत्तारि ॥ २ ॥
पंच चउरो अभिग्गहे निव्विए अट्ठ नव य आगारा ।
अप्पाउरणे पंच उ हवंति सेसेसु चत्तारि ॥ ३ ॥

ननु निर्विकृतिक एवाकाराभिधानाद् विकृतिपरिमाणप्रत्याख्याने कुत आकारा अवगम्यन्ते ? । उच्यते—निर्विकृतिकग्रहणे विकृतिपरिमाणस्यापि संग्रहो भवति, त एव चाकारा भवन्ति ; यथा—एकासनस्य पौरुष्याः पूर्वार्धस्यैव च सूत्रेऽभिधानेऽपि द्व्यासनकस्य सार्धपौरुष्या अपार्धस्य च प्रत्याख्यानमदुष्टम्, अप्रमादवृद्धेः संभवात् । आकारा अप्येकासनादिसंबन्धिन एवान्येष्वपि न्याय्याः, आसनादिशब्दसाम्यात् चतुर्विधाहारपाठेऽपि

---

(१) द्वावेव नमस्कारे आकारौ षट् च पौरुष्यां तु ।
सप्तैव च पूर्वार्धे एकाशनेऽष्टैव ॥ १ ॥
सप्तैकस्थानस्य त्वष्टैव चाचामाम्ले आकाराः ।
पञ्चैवाभक्तार्थे षट् पानके चरमे चत्वारः ॥ २ ॥
पञ्च चतुरोऽभिग्रहे निर्विकृतिकेऽष्ट नव चाकाराः ।
अप्रावरणे पञ्च तु भवन्ति शेषेषु चत्वारः ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विविधत्रिविधाहारप्रत्याख्यानवत्। ननु द्व्यासनादीनि अभिग्रहप्रत्याख्यानानि, ततस्तेषु चत्वार एवाकाराः प्राप्नुवन्ति। न, एकासनादिभिस्तुल्ययोगक्षेमत्वात्। अन्ये तु मन्यन्ते,—एवं हि प्रत्याख्याने संख्या विशीर्येत। तत एकासनादीन्येव प्रत्याख्यानानि, तदशक्तस्तु यावत्सहिष्णुस्तावत् पौरुष्यादिकं प्रत्याख्याति, तदुपरि ग्रन्थिसहितादिकमिति। प्रत्याख्यानं च स्पर्शनादिगुणोपेतं सुप्रत्याख्यानं भवति;

यदाहुः—

[1]फासिअं पालियं चेव सोहिअं तीरिअं तहा।
किट्टियमाराहियं चेव एरिसयम्मि पयइअव्वं ॥ १ ॥

तत्र स्पृष्टं प्रत्याख्यानकाले विधिना प्राप्तम्।१। पालितं पुनःपुनरुपयोगप्रतिजागरणेन रक्षितम्।२। शोभितं गुर्वादिप्रदत्तशेषभोजनासेवनेन।३। तीरितं पूर्णेऽपि कालावधौ किञ्चित्कालावस्थानेन।४। कीर्तितं भोजनवेलायाममुकं मया प्रत्याख्यातमधुना पूर्णं भोक्ष्य इत्युच्चारणेन। ५। आराधितमेभिः प्रकारैः संपूर्णैर्निष्ठां नीतमिति। ६।

प्रत्याख्यानस्य चानन्तर्येण पारम्पर्येण च फलमिदम्;—

[2]पच्चक्खाणम्मि कए आसवदाराइं हुंति पिहिआइं।
आसवदारपिहाणे तण्हावुच्छेअणं होइ ॥ १ ॥

---

(१) स्पृष्टं पालितं चापि शोभितं तीरितं तथा।
कीर्तितमाराधितं चैवेदृशे प्रयतितव्यम् ॥ १ ॥

(२) प्रत्याख्याने कृते आस्रवद्वाराणि भवन्ति पिहितानि।
आस्रवद्वारपिधाने तृष्णाव्युच्छेदनं भवति ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]तण्हावुच्छेएण य अउलोवसमो भवे मणुस्साणं ।
अउलोवसमेण पुणो पच्चक्खाणं हवइ सुद्धं ॥ २ ॥
तत्तो चरित्तधम्मो कम्मविवेगो अपुव्वकरणं च ।
तत्तो केवलणाणं सासयसोक्खो तओ मोक्खो ॥३॥

न चावश्यकर्तव्यमावश्यकं चैत्यवन्दनाद्येव श्रावकस्य, न षड्विधमिति वक्तुं युक्तम्,

[2]समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा ।
अंतो अहो निसिस्स य तम्हा आवस्सयं नाम ॥ १ ॥

इत्यागमे श्रावकं प्रत्यावश्यकस्योक्तत्वात् । न चात्र चैत्यवन्दनाद्येवावश्यकं वक्तुमुचितम्, 'अंतो अहो निसिस्स य' इति कालद्वयाभिधानात्, चैत्यवन्दनस्य च त्रैकालिकत्वेनोक्तत्वात् । अनुयोगद्वारेष्वपि [3]जस्सं समणो वा समणी वा सावए वा साविया वा तच्चित्ते तम्मणे तल्लेसे तदट्ठोवउत्ते तदप्पियकरणे तब्भावणाभाविए उभओकालं आवस्सयं करेइ, से तं लोउत्तरिअं भावा-

---

(१) तृष्णाव्युच्छेदेन चातुलोपशमो भवेद् मनुष्याणाम् ।
अतुलोपशमेन पुनः प्रत्याख्यानं भवति शुद्धम् ॥ २ ॥
ततश्चारित्रधर्मः कर्मविपाकोऽपूर्वकरणं च ।
ततः केवलज्ञानं शाश्वतसौख्यस्ततो मोक्षः ॥ ३ ॥

(२) श्रमणेन श्रावकेण चावश्यकर्तव्यकं भवति यस्मात् ।
अन्तेऽह्नो निशश्च तस्मादावश्यकं नाम ॥ १ ॥

(३) यत् श्रमणो वा श्रमणी वा श्रावको वा श्राविका वा तच्चित्तस्तन्मनास्तल्लेश्यस्तदर्थोपयुक्तस्तदर्पितकरणस्तद्भावनाभावित उभयकालमावश्यकं कुर्यात्, तल्लोकोत्तरं भावावश्यकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वस्सयं इति वचनात् श्रावकस्याप्यावश्यकमुक्तमेव। ततः कृत-षड्विधावश्यककर्मा स्वाध्यायम्, अणुव्रतविध्यादेः पञ्चनमस्कारस्य वा परिवर्तनं कुर्यात्; अथवा, स्वाध्यायं पञ्चविधं वाचना-प्रश्न-परिवर्तना-ऽनुप्रेक्षा-धर्मकथारूपं कुर्यात्। यस्तु साधूपाश्रयमागन्तुमशक्तो राजादिर्वा महर्द्धिको वा बह्वपायः स स्वगृह एवावश्यकं स्वाध्यायं च करोति। उत्तममित्युत्तमनिर्जराहेतुम्, यदाह;—

[1]बारसविहम्मि वि तवे सब्भिंतरबाहिरे कुसलदिट्ठे।
नवि अत्थि नवि अ होही सज्झायसमं तवोकम्मं ॥ १ ॥

तथा,

[2]सज्झाएण पसत्थं झाणं जाणइ अ सव्वपरमत्थं।
सज्झाए वट्टंतो खणे खणे जाइ वेरग्गं ॥ १ ॥

इत्यादि ॥ १३० ॥

न्याय्ये काले ततो देवगुरुस्मृतिपवित्रितः।
निद्रामल्पामुपासीत प्रायेणाब्रह्मवर्जकः ॥ १३१ ॥

न्याय्यो न्यायादनपेतः कालः, स च रात्रेः प्रथमयामोऽर्धरात्रं वा शरीरसात्म्येन, तत इति स्वाध्यायकरणानन्तरं, निद्रामल्पामुपासीतेति क्रिया। कथम्भूतः सन्? देवगुरुस्मृतिपवित्रितः—

---

(१) द्वादशविधेऽपि तपसि साभ्यन्तरबाह्ये कुशलदिष्टे।
नाप्यस्ति नापि च भविष्यति स्वाध्यायसमं तपःकर्म ॥ १ ॥

(२) स्वाध्यायेन प्रशस्तं ध्यानं जानाति च सर्वपरमार्थम्।
स्वाध्याये वर्त्तमानः क्षणे क्षणे याति वैराग्यम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवा अर्हद्भट्टारकाः, गुरवो धर्माचार्याः, तेषां स्मृतिर्मनस्यारोपणं तया पवित्रितो निर्मलीभूतात्मा। उपलक्षणं चैतच्चतुःशरणगमन-दुष्कृतगर्हा-सुकृतानुमोदना-पञ्चनमस्कारस्मरणप्रभृतीनाम्। न ह्येतत्स्मरणमन्तरेण पवित्रता भवति। तत्र देवस्मृतिः—"[1]नमो वीयरायाणं सव्वसूणं तिलोक्कपूइआणं जहट्ठिअवत्थुवाईणं" इत्यादि। गुरुस्मृतिश्च—"धन्यास्ते ग्राम-नगर-जनपदादयो येषु मदीया धर्माचार्या विहरन्ति।" निद्रामल्पामिति। निद्रामिति विशेष्यम्, अल्पामिति विशेषणम्। विशेषणस्य चात्र विधिः, "सविशेषणे हि विधि-निषेधौ विशेषणमुपसंक्रामतः" इति न्यायात्। निद्रामिति च विशेष्यमिति न तत्र विधिः, दर्शनावरणीयकर्मोदयेन निद्रायाः स्वतः सिद्धत्वात्, 'अप्राप्ते हि शास्त्रमर्थवत्' इत्युक्तप्रायम्। अब्रह्म मैथुनं तद् वर्जयति अब्रह्मवर्जकः, प्रायेणेति बाहुल्येन, गृहस्थत्वादस्य ॥ १३१ ॥

पुनश्च—

निद्राच्छेदे योषिदङ्गसतत्त्वं परिचिन्तयेत्।
स्थूलभद्रादिसाधूनां तन्निवृत्तिं परामृशन् ॥१३२॥

परिणतायां रात्रौ निद्रायाश्छेदे सति योषिदङ्गानां स्त्रीशरीराणां सतत्त्वं स्वरूपं परितश्चिन्तयेत्। किं कुर्वन्? स्थूल-

(१) नमो वीतरागेभ्यः सर्व्वज्ञेभ्यस्त्रैलोक्यपूजितेभ्यो यथास्थितवस्तुवादिभ्यः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भद्रादीनां साधूनां तन्निवृत्तिं योषिदङ्गनिवृत्तिं परामृशन् अनुस्मरन्।

स्थूलभद्रचरितं संप्रदायगम्यम्। स चायम्;—

अस्ति सौधप्रभाजालधूपधूमैर्निरन्तरैः।
जितगङ्गार्कजासङ्गं पाटलीपुत्रपत्तनम्॥ १॥
तत्र त्रिखण्डपृथिवीपतिः पतिरिव श्रियः।
समुत्खातद्विषत्कन्दो नन्दो नामाभवद् नृपः॥ २॥
विसंकटः श्रियां वासोऽसंकटः शकटो धियाम्।
शकटाल इति तस्य बभूवामात्यपुङ्गवः॥ ३॥
तस्याभूज्ज्येष्ठतनयो विनयादिगुणास्पदम्।
अस्थूलधीः स्थूलभद्रो भद्राकारनिशाकरः॥ ४॥
भक्तिनिष्ठः कनिष्ठोऽस्य श्रीयकोऽजनि नन्दनः।
नन्दराड्हृदयामन्दानन्दगोशीर्षचन्दनः॥ ५॥
बभूव तत्र कोशेति वेश्या रूपश्रियोर्वशी।
वशीकृतजगच्चेताश्चेतोभूजीवनौषधिः॥ ६॥
भुञ्जानो विविधान् भोगान् स्थूलभद्रो दिवानिशम्।
उवासावसथे तस्या द्वादशाब्दानि तन्मनाः॥ ७॥
श्रीयकस्त्वङ्गरक्षोऽभूद् भूरिविश्रम्भभाजनम्।
द्वितीयमिव हृदयं नन्दस्य पृथिवीपतेः॥ ८॥
तत्र चासीद् वररुचिर्नाम द्विजवराग्रणीः।
कवीनां वादिनां वैयाकरणानां शिरोमणिः॥ ९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वयंकृतैर्नवनवैरष्टोत्तरशतेन सः ।
वृत्तैः प्रवृत्तोऽनुदिनं नृपावलगने सुधीः ॥ १० ॥
मिथ्यादृगिति तं मन्त्री प्रशशंस न जातुचित् ।
तुष्टोऽप्यस्मै तुष्टिदानं न ददौ नृपतिस्ततः ॥ ११ ॥
ज्ञात्वा वररुचिस्तत्र दानाप्रापणकारणम् ।
आराधयितुमारेभे गृहिणीं तस्य मन्त्रिणः ॥ १२ ॥
संतुष्टया तयाऽन्येद्युः कार्यं पृष्टोऽब्रवीदिदम् ।
राज्ञः पुरस्ताद् मत्काव्यं तव भर्ता प्रशंसतु ॥ १३ ॥
तया तदुपरोधेन तद्विज्ञप्तोऽवदत् पतिः ।
मिथ्यादृष्टेरमुष्याहं प्रशंसामि कथं वचः ? ॥ १४ ॥
तयोक्तः साग्रहं मन्त्री तत् तथा प्रत्यपद्यत ।
अन्धस्त्रीबालमूर्खाणामाग्रहो बलवान् खलु ॥ १५ ॥
राज्ञः पुरस्तात् पठतः काव्यं वररुचेस्ततः ।
अहो ! सुभाषितमिति वर्णयामास मन्त्रिराट् ॥ १६ ॥
दीनारशतमष्टाग्रं ततोऽस्मै नृपतिर्ददौ ।
राजमान्यस्य वाचापि जीव्यते ह्यनुकूलया ॥ १७ ॥
दीनाराष्टोत्तरशते दीयमाने दिने दिने ।
किमेतद् दीयत इति भूपं मन्त्री व्यजिज्ञपत् ? ॥ १८ ॥
अथोचे नृपतिर्मन्त्रिन् ! दद्मोऽस्मै त्वत्प्रशंसया ।
वयं यदि स्वयं दद्मो दद्मः किं न पुरा ततः ? ॥ १९ ॥
मन्त्र्यप्यूचे मया देव ! प्रशंसा नास्य निर्ममे ।
काव्यानि परकीयानि प्रशशंस तदा त्वहम् ॥ २० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरो नः परकाव्यानि स्वकीकृत्य पठत्ययम् ।
किमेतत् सत्यभावेनेत्यभाषत नृपस्ततः ॥ २१ ॥
एतत्पठितकाव्यानि पठन्ति बालिका अपि ।
दर्शयिष्यामि वः प्रातरित्यूचे सचिवोऽपि च ॥ २२ ॥
यचा यचदत्ता भूता भूतदत्ता तथैणिका ।
वेणा रेणेति सप्तासन् प्राज्ञाः पुत्र्योऽस्य मन्त्रिणः ॥ २३ ॥
जग्राह ज्यायसी तासां सकृदुक्तं तथेतराः ।
द्वित्र्यादिवारक्रमतो गृह्णन्ति स्म यथाक्रमम् ॥ २४ ॥
राज्ञः समीपं सचिवो द्वितीयेऽह्नि निनाय ताः ।
तिरस्कारिण्यन्तरिताः समुपावेशयच्च सः ॥ २५ ॥
अष्टोत्तरशतं श्लोकान् स्वयं निर्माय नैत्यिकान् ।
ऊचे वररुचिस्ता अप्यनुज्येष्ठमनूचिरे ॥ २६ ॥
ततो वररुचे रुष्टो राजा दानं न्यवारयत् ।
उपायाः सचिवानां हि निग्रहानुग्रहक्षमाः ॥ २७ ॥
ततो वररुचिर्गत्वा यन्त्रं गङ्गाजले न्यधात् ।
तन्मध्ये वस्त्रबद्धं च दीनारशतमष्टयुक् ॥ २८ ॥
प्रातर्गङ्गामसौ स्तुत्वा यन्त्रमाक्रमदंह्रिणा ।
दीनारास्ते च तत्पाणावुत्पत्य न्यपतंस्ततः ॥ २९ ॥
[1]स एवं विदधे नित्यं जनस्तेन विसिष्मिये ।
तच्च श्रुत्वा जनश्रुत्या राजाऽशंसच्च मन्त्रिणे ॥ ३० ॥

---

(१) च एवं च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदं यद्यस्ति सत्यं तत् प्रातर्वीक्षामहे स्वयम् ।
इत्युक्तो मन्त्रिणा राजा तत्तथा प्रत्यपद्यत ॥ ३१ ॥
दत्त्वा शिक्षां चरः सायं प्रेषितस्तत्र मन्त्रिणा ।
शरस्तम्बनिलीनोऽस्थात् पक्षीवानुपलक्षितः ॥ ३२ ॥
तदा वररुचिर्गत्वा छन्नं मन्दाकिनीजले ।
दीनाराष्टोत्तरशतग्रन्थिं न्यस्य ययौ गृहे ॥ ३३ ॥
तज्जीवितमिवादाय दीनारग्रन्थिमेष तु ।
चरः समर्पयामास प्रच्छन्नं वरमन्त्रिणि ॥ ३४ ॥
अथ गुप्तात्तदीनारग्रन्थिर्मन्त्री निशात्यये ।
ययौ राज्ञा समं गङ्गामागाद् वररुचिस्तदा ॥ ३५ ॥
द्रष्टुकामं नृपं दृष्ट्वोत्कृष्टमानी सविस्तरम् ।
स्तोतुं प्रववृते गङ्गां मूढो वररुचिस्ततः ॥ ३६ ॥
स्तुत्यन्तेऽचालयद् यन्त्रं यदा वररुचिः पदा ।
दीनारग्रन्थिरुत्पत्य नापतत् पाणिकोटरे ॥ ३७ ॥
द्रव्यं सोऽन्वेषयामास पाणिना तज्जले ततः ।
[1]तस्यावपश्यंस्तूष्णीको धूर्तो दृष्टो हि मौनभाक् ॥ ३८ ॥
इत्यूचे च महामात्यः किं ते दत्ते न जाह्नवी ।
न्यासीकृतमपि द्रव्यमन्वेषयसि यद् मुहुः ? ॥ ३९ ॥
उपलक्ष्य गृहाणेदं निजद्रव्यमिति ब्रुवन् ।
सोऽर्पयामास दीनारग्रन्थिं वररुचेः करे ॥ ४० ॥

---

(१) घ ङ -ववश्यं तू- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दीनारग्रन्थिना तेनोत्सर्पिंहृद्ग्रन्थिनेव सः ।
दशामासादयामास मरणादपि दुस्सहाम् ॥ ४१ ॥
विप्रतारयितुं लोकं सायमत्र क्षिपत्यसौ ।
द्रव्यं प्रातः पुनर्गृह्णातीत्यूचे सचिवो नृपम् ॥ ४२ ॥
साधु ज्ञातमिदं छद्मेत्यालपन् मन्त्रिपुङ्गवम् ।
विस्मयस्मेरनयनः स्ववेश्मागाद् महीपतिः ॥ ४३ ॥
अमर्षणो वररुचिः प्रतिकारं विचिन्तयन् ।
गृहस्वरूपं सचिवस्यापृच्छच्चेटिकादिकम् ॥ ४४ ॥
तस्याथ कथयामास काचित् सचिवचेट्यदः ।
भूपतिः श्रीयकोद्वाहे भोच्यते मन्त्रिवेश्मनि ॥ ४५ ॥
सज्जाते चात्र शस्त्रादि दातुं नन्दाय मन्त्रिणा ।
शस्त्रप्रियाणां राज्ञां हि शस्त्रमाद्यमुपायनम् ॥ ४६ ॥
समासाद्य च्छलज्ञस्तच्छलं वररुचिस्ततः ।
चणकादि प्रदायेति डिम्भरूपाण्यपाठयत् ॥ ४७ ॥
न वेत्ति राजा यदसौ शकटालः करिष्यति ।
व्यापाद्य नन्दं तद्राज्ये श्रीयकं स्थापयिष्यति ॥ ४८ ॥
स्थाने स्थाने च पठतो डिम्भानेवं दिने दिने ।
जनश्रुत्या तदश्रौषीदिति चाचिन्तयद् नृपः ॥ ४९ ॥
बालका यच्च भाषन्ते भाषन्ते यच्च योषितः ।
औत्पातिकी च या भाषा सा भवत्यन्यथा नहि ॥ ५० ॥
तत्प्रत्ययार्थं राज्ञाथ प्रेषितो मन्त्रिवेश्मनि ।
पुरुषः सर्वमागत्य यथादृष्टं व्यजिज्ञपत् ॥ ५१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततश्च सेवावसरे मन्त्रिणः समुपेयुषः ।
प्रणामं कुर्वतो राजा कोपात् तस्थौ पराङ्मुखः ॥ ५२ ॥
तद्भावज्ञोऽथ वेश्मैत्यामात्यः श्रीयकमब्रवीत् ।
राज्ञोऽस्मि ज्ञापितः केनाप्यभक्तो विद्विषन्निव ॥ ५३ ॥
असावकस्मादस्माकं कुलक्षय उपस्थितः ।
रक्ष्यति, वत्स ! कुरुषे यद्यादेशमिमं मम ॥ ५४ ॥
नमयामि यदा राज्ञे शिरश्छिन्द्यास्तदासिना ।
अभक्तः स्वामिनो वध्यः पितापीति वदेस्ततः ॥ ५५ ॥
जरसापि यियासौ मय्येवं याते परासुताम् ।
त्वं मत्कुलगृहस्तम्भो नन्दिष्यसि चिरं ततः ॥ ५६ ॥
श्रीयकोऽपि रुदन्नेवमवदद् गद्गदस्वरम् ।
तात ! घोरमिदं कर्म श्वपचोऽपि करोति किम् ? ॥ ५७ ॥
अमात्योऽप्यब्रवीदेवमेवं कुर्वन् विचारणाम् ।
मनोरथान् पूरयसि वैरिणामेव केवलम् ॥ ५८ ॥
राजा यम इवोद्दण्डः सकुटुम्बं न हन्ति माम् ।
यावत्, तावन्ममैकस्य क्षयाद् रक्ष कुटुम्बकम् ॥ ५९ ॥
मुखे विषं तालपुटं न्यस्य नंस्यामि भूपतिम् ।
शिरः परासोर्मे छिन्द्याः पितृहत्या न ते ततः ॥ ६० ॥
पित्रैवं बोधितस्तत् स प्रतिपेदे चकार च ।
शुभोदर्काय धीमन्तः कुर्वन्त्यापातदारुणम् ॥ ६१ ॥
भवता किमिदं वत्स ! विदधे कर्म दुष्करम् ।
ससंभ्रममिति प्रोक्तो नृपेण श्रीयकोऽवदत् ॥ ६२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदैव स्वामिना ज्ञातो द्रोह्ययं निहतस्तदा ।
भर्तृचित्तानुसारेण भृत्यानां हि प्रवर्तनम् ॥ ६३ ॥
भृत्यानां युज्यते दोषे स्वयं ज्ञाते विचारणा ।
स्वामिज्ञाते प्रतीकारो युज्यते न विचारणा ॥ ६४ ॥
कृतौर्ध्वदेहिकं नन्दस्ततः श्रीयकमब्रवीत् ।
सर्वव्यापारसहिता मुद्रेयं गृह्यतामिति ॥ ६५ ॥
अथ विज्ञपयामास प्रणम्य श्रीयको नृपम् ।
स्थूलभद्राभिधानोऽस्ति पितृतुल्यो ममाग्रजः ॥ ६६ ॥
पितृप्रसादाद् निर्बाधं कोशायास्तु निकेतने ।
भोगानुपभुञ्जानस्य तस्याब्दा द्वादशागमन् ॥ ६७ ॥
आहूयाथ स्थूलभद्रस्तमर्थं भूभुजोदितः ।
पर्यालोच्यामुमादेशं करिष्यामीत्यभाषत ॥ ६८ ॥
अद्यैवालोचयेत्युक्तः स्थूलभद्रो महीभुजा ।
अशोकवनिकां गत्वा विममर्शेति चेतसा ॥ ६९ ॥
शयनं भोजनं स्नानं यच्चान्यत् सुखसाधनम् ।
कालेऽपि नानुभूयन्ते रोरैरिव नियोगिभिः ॥ ७० ॥
नियोगिनां स्वान्यराष्ट्रचिन्ताव्यग्रे च चेतसि ।
प्रेयसीनां नावकाशः (१)पूर्णकुम्भेऽम्भसामिव ॥ ७१ ॥
त्यक्त्वा सर्वमपि स्वार्थं राज्ञोऽर्थं कुर्वतामपि ।
उपद्रवन्ति पिशुना उद्दानामिव द्विकाः ॥ ७२ ॥

---

(१) च पूर्णे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा स्वदेहद्रविणव्ययेनापि प्रयत्यते ।
राजार्थे, तद्वदात्मार्थे यत्यते किं न धीमता ? ॥ ७३ ॥
विमृश्यैवं व्यधात् केशोत्पाटनं पञ्चमुष्टि सः ।
रत्नकम्बलदशाभी रजोहरणमप्यथ ॥ ७४ ॥
ततश्च स महासत्त्वो गत्वा सदसि पार्थिवम् ।
आलोचितमिदं धर्मलाभः स्तादित्यवोचत ॥ ७५ ॥
ततः स राजसदनाद् गुहाया इव केसरी ।
निःससार महासारः संसारकरिरोषणः ॥ ७६ ॥
किमेष कपटं कृत्वा यायाद् वेश्यागृहं पुनः ।
इत्यप्रत्ययतः क्ष्मापो गवाक्षेण निरैक्षत ॥ ७७ ॥
प्रदेशे शवदुर्गन्धेऽप्यविकूणितनासिकम् ।
यान्तं दृष्ट्वा स्थूलभद्रं नरेन्द्रोऽधूनयच्छिरः ॥ ७८ ॥
भगवान् वीतरागोऽसावस्मिन् धिग् मे कुचिन्तितम् ।
इत्यात्मानं निनिन्दोच्चैर्नन्दस्तमभिनन्दयन् ॥ ७९ ॥
स्थूलभद्रोऽपि गत्वा श्रीसंभूतिविजयान्तिके ।
दीक्षां सामायिकोच्चारपूर्विकां प्रत्यपद्यत ॥ ८० ॥
गृहीत्वा श्रीयकं दोर्ष्णि ततो नन्दः सगौरवम् ।
मुद्राधिकारे निःशेषव्यापारसहिते न्यधात् ॥ ८१ ॥
चकार श्रीयको राज्यचिन्तामवहितः सदा ।
साक्षादिव शकटालः प्रकृष्टनयपाटवात् ॥ ८२ ॥
स नित्यमपि कोशाया विनीतः सदने ययौ ।
स्नेहाद् भ्रातुस्तत्प्रियादि कुलीनैर्बहु मन्यते ॥ ८३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थूलभद्रवियोगार्ता श्रीयकं प्रेक्ष्य साऽरुदत् ।
दृष्टे दृष्टे हि दुःखार्ता न दुखं धर्तुमीशते ॥ ८४ ॥
ततस्तां श्रीयकोऽवोचदार्ये ! किं कुर्महे वयम् ।
असौ वररुचिः पापोऽघातयज्जनकं हि नः ॥ ८५ ॥
अकाण्डोत्थितवज्राग्निप्रदीपनसहोदरम् ।
स्थूलभद्रवियोगं च भवत्या अकरोदयम् ॥ ८६ ॥
त्वज्जाम्यामुपकोशायां यावद् रक्तोऽस्त्यसौ खलः ।
तावत् प्रतिक्रियां काञ्चिद् विचिन्तय मनस्विनि ! ॥ ८७ ॥
तदादिशोपकोशां यत् प्रतार्य कथमप्यसौ ।
विधीयतां वररुचिर्मद्यपानरुचिस्त्वया ॥ ८८ ॥
प्रेयोवियोजनाद् वैराद् दाक्षिण्याद् देवरस्य च ।
तत् प्रतिज्ञाय सा सद्योऽप्युपकोशां समादिशत् ॥ ८९ ॥
कोशायाश्च निदेशेनोपकोशा तं तथा व्यधात् ।
यथा पपौ सुरामेष स्त्रीवशैः क्रियते न किम् ? ॥ ९० ॥
सुरापानं वररुचिः स्वैरं भट्टोऽद्य कारितः ।
उपकोशेति कोशायै शशंसाथ निशात्यये ॥ ९१ ॥
अथ कोशामुखात् सर्वं शुश्राव श्रीयकोऽपि तत् ।
मेने च पितृवैरस्य विहितं प्रतियातनम् ॥ ९२ ॥
शकटालमहामात्यात्ययात् प्रभृति सोऽप्यभूत् ।
भट्टो वररुचिर्भूपसेवावसरतत्परः ॥ ९३ ॥
स प्रत्यहं राजकुले सेवाकाले समापतन् ।
राज्ञा च राजलोकैश्च सगौरवमदृश्यत ॥ ९४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्यदा नन्दराड् मन्त्रिगुणस्मरणविह्वलः ।
सदसि श्रीयकामात्यं जगादैवं सगद्गदम् ॥ ९५ ॥
भक्तिमान् शक्तिमान् नित्यं शकटालो महामतिः ।
अभवद् मे महामात्यः शक्रस्येव बृहस्पतिः ॥ ९६ ॥
एवमेव विपन्नोऽसौ दैवादद्य करोमि किम् ? ।
मन्ये शून्यमिवास्थानमहं तेन विनात्मनः ॥ ९७ ॥
उवाच श्रीयकोऽप्येवं किं देवेह विदध्महे ।
इदं वररुचिः सर्वं पापं व्यधित मद्यपः ॥ ९८ ॥
सत्यमेष सुरां भट्टः पिबतीति नृपोदिते ।
श्वोऽमुं दर्शयितास्मीति श्रीयकः प्रत्यवोचत ॥ ९९ ॥
श्रीयकस्तु द्वितीयेऽह्नि सर्वेषामीयुषां सदः ।
स्वपुंसा शिक्षितेनाग्रं पद्ममेकैकमार्पयत् ॥ १०० ॥
तत्कालं मदनफलरसभावनयाऽञ्चितम् ।
दुरात्मनो वररुचेरर्पयामास पङ्कजम् ॥ १ ॥
कुतस्त्यमद्भुतामोदमिदमित्यभिवर्णिनः ।
घ्रातुं राजादयो निन्युर्नासाग्रे स्वं स्वमम्बुजम् ॥ २ ॥
सोऽपि भट्टोऽनयद् घ्रातुं घ्राणाग्रे पङ्कजं निजम् ।
चन्द्रहाससुरां सद्यो रात्रिपीतां ततोऽवमत् ॥ ३ ॥
धिगमुं सीधुपं ब्रह्मबन्धुं बन्धवधोचितम् ।
सर्वैरित्याक्रुश्यमानो निर्ययौ सदसोऽथ सः ॥ ४ ॥
ब्राह्मणा याचितास्तेन प्रायश्चित्तमचीकथन् ।
तापितत्रपुणः पानं सुरापाणाघघातकम् ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूषया तापितमथ पपौ वररुचिस्त्रपु ।
प्राणैश्च मुमुचे सद्यस्तत्प्रदाहभयादिव ॥ ६ ॥
स्थूलभद्रोऽपि संभूतविजयाचार्यसन्निधौ ।
प्रव्रज्यां पालयामास पारदृश्वा श्रुताम्बुधेः ॥ ७ ॥
वर्षाकालेऽन्यदाऽऽयाते संभूतविजयं गुरुम् ।
प्रणम्य मूर्ध्ना मुनय इत्यगृह्णन्नभिग्रहान् ॥ ८ ॥
अहं सिंहगुहाद्वारे कृतोत्सर्ग उपोषितः ।
अवस्थास्ये चतुर्मासीमिकः प्रत्यश्रृणोदिदम् ॥ ९ ॥
दृग्विषाहिबिलद्वारे चतुर्मासीमुपोषितः ।
स्थास्यामि कायोत्सर्गेण द्वितीयोऽभ्यगृहीदिति ॥ १० ॥
उत्सर्गी कूपमण्डूकासने मासचतुष्टयम् ।
स्थास्याम्युपोषित इति तृतीयः प्रत्यपद्यत ॥ ११ ॥
योग्यान् मत्वा गुरुः साधून् यावत् तानन्वमन्यत ।
स्थूलभद्रः पुरोभूय नत्वैवं तावदब्रवीत् ॥ १२ ॥
कोशाभिधाया वेश्याया गृहे या चित्रशालिका ।
विचित्रकामशास्त्रोक्तकरणालेख्यशालिनी ॥ १३ ॥
तत्राकृततपःकर्मविशेषः षड्रसाशनः ।
स्थास्यामि चतुरो मासानिति मेऽभिग्रहः प्रभो ! ॥ १४ ॥
ज्ञात्वोपयोगाद् योग्यं तं गुरुस्तत्रान्वमन्यत ।
साधवश्च ययुः सर्वे स्वं स्वं स्थानं प्रतिश्रुतम् ॥ १५ ॥
स्थूलभद्रोऽपि संप्राप कोशावेश्यानिकेतनम् ।
अभ्युत्तस्थौ ततः कोशाप्याहिताञ्जलिरग्रतः ॥ १६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुकुमारः प्रकृत्यासौ रम्भास्तम्भ इवोरुणा ।
व्रतभारेण विधुरोऽत्रागादिति विचिन्त्य सा ॥ १७ ॥
उवाच स्वागतं स्वामिन् ! समादिश करोमि किम् ? ।
वपुर्धनं परिजनः सर्वमेतत् तवैव हि ॥ १८ ॥
चतुर्मासीं वसत्यै मे चित्रशालेयमर्प्यताम् ।
इत्यूचे स्थूलभद्रोऽपि सा तूचे गृह्यतामिति ॥ १९ ॥
तया च तस्यां प्रगुणीकृतायां भगवानपि ।
कामस्थानेऽविशद् धर्म इव स्वबलवत्तया ॥ २० ॥
अथ सा षड्रसाहारभोजनानन्तरं मुनेः ।
विशेषकृतशृङ्गारा क्षोभाय समुपाययौ ॥ २१ ॥
सोपविष्टा पुरस्तस्योत्कृष्टा काचिदिवाप्सराः ।
चतुरं रचयामास हावभावादिकं मुहुः ॥ २२ ॥
करणानुभवक्रीडोद्दामानि सुरतानि च ।
तानि तानि प्राक्तनानि स्मारयामास साऽसकृत् ॥ २३ ॥
यद् यत् क्षोभाय विदधे तया तत्र महामुनौ ।
तत् तद् मुधाऽभवद् यद्वद् वज्रे नखविलेखनम् ॥ २४ ॥
प्रतिवासरमप्येवं तत्क्षोभाय चकार सा ।
जगाम स तु न क्षोभं मनागपि महामनाः ॥ २५ ॥
तयोपसर्गकारिण्या प्रत्युतास्य महामुनेः ।
आदीप्यत ध्यानवह्निर्मेघवह्निरिवाम्भसा ॥ २६ ॥
त्वयि पूर्वमिवाज्ञानाद् रन्तुकामां धिगीश ! माम् ।
आत्मानमिति निन्दन्ती साऽपतत् तस्य पादयोः ॥ २७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुनेस्तस्येन्द्रियजयप्रकर्षेण चमत्कृता ।
प्रपेदे श्रावकत्वं सा [1]गृहीत्वैवमभिग्रहम् ॥ २८ ॥
तुष्टः कदापि कस्मैचिद् ददाति यदि मां नृपः ।
विना पुमांसमेकं तमन्यत्र नियमो मम ॥ २९ ॥
गते तु वर्षासमये ते त्रयोऽपि हि साधवः ।
निर्व्यूढाभिग्रहा एयुर्गुरुपादान्तिकं क्रमात् ॥ ३० ॥
आयान् सिंहगुहासाधुरहो ! दुष्करकारक ! ।
तव स्वागतमित्यूचे किञ्चिदुत्थाय सूरिणा ॥ ३१ ॥
सूरिणा भाषितौ तद्वदायान्तावितरावपि ।
समे प्रतिज्ञानिर्वाहे समा हि स्वामिसत्क्रिया ॥ ३२ ॥
अथायान्तं स्थूलभद्रमुत्थाय गुरुरब्रवीत् ।
दुष्करदुष्करकार ! महात्मन् ! स्वागतं तव ॥ ३३ ॥
सासूयाः साधवस्तेऽथाचिन्तयन्नित्यहो ! गुरोः ।
इदमामन्त्रणं मन्त्रिपुत्रताहेतुकं ननु ॥ ३४ ॥
यद्यसौ षड्रसाहारः कृतदुष्करदुष्करः ।
इदं वर्षान्तरे तर्हि प्रतिज्ञास्यामहे वयम् ॥ ३५ ॥
एवं मनसि संस्थाप्य सामर्षास्ते महर्षयः ।
कुर्वाणाः संयमं मासानष्टावगमयन् क्रमात् ॥ ३६ ॥
उत्तमर्ण इव प्राप्ते काले हृष्टः पुरो गुरोः ।
साधुः सिंहगुहावासी चकारेति प्रतिश्रवम् ॥ ३७ ॥

---

(१) ग ड थ -गृहीत्वैव- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोशावेश्यागृहे नित्यं षड्रसाहारभोजनः ।
भगवन् ! समवस्थास्ये चतुर्मासीमिमामहम् ॥ ३८ ॥
स्थूलभद्रेण मात्सर्यादेतदङ्गीकरोत्ययम् ।
विचार्येत्युपयोगेन ज्ञात्वा च गुरुरादिशत् ॥ ३९ ॥
वत्स ! माभिग्रहं कार्षीरतिदुष्करदुष्करम् ।
स्थूलभद्रः क्षमः कर्तुमद्रिराज इव स्थिरः ॥ ४० ॥
न हि मे दुष्करोऽप्येष कथं दुष्करदुष्करः ? ।
तदवश्यं करिष्यामीत्युवाच स मुनिर्गुरुम् ॥ ४१ ॥
गुरुरूचेऽमुना भावी भ्रंशः प्राक्तपसोऽपि ते ।
आरोपितोऽतिभारो हि गात्रभङ्गाय जायते ॥ ४२ ॥
गुरोर्वचोऽवमन्याथ वीरंमन्यो मुनिः स तु ।
उन्मीनकेतनं प्राप कोशायास्तु निकेतनम् ॥ ४३ ॥
स्थूलभद्रस्पर्धयेहायाति मन्ये तपस्व्यसौ ।
भवे पतन् रक्षणीय इत्युत्थाय ननाम सा ॥ ४४ ॥
वसत्यै याचितां तेन मुनिना चित्रशालिकाम् ।
कोशा समर्पयामास स मुनिस्तत्र चाविशत् ॥ ४५ ॥
तं भुक्तषड्रसाहारं मध्याह्नेऽथ परीक्षितुम् ।
कोशापि तत्र लावण्यकोशभूता समाययौ ॥ ४६ ॥
चुक्षोभ स मुनिर्मङ्क्षु पङ्कजाक्षीमुदीक्ष्य ताम् ।
स्त्री तादृग् भोजनं तादृग् विकाराय न किं भवेत् ? ॥४७॥
स्मरार्त्तो याचमानं तं कोशाप्येवमवोचत ।
वयं हि भगवन् ! वेश्या वश्याः स्मो धनदानतः ॥ ४८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स मुनिर्व्याजहाराथ प्रसीद मृगलोचने ! ।
अस्मासु भवति द्रव्यं किं तैलं वालुकास्विव ? ॥ ४९ ॥
नेपालभूपोऽपूर्वस्मै साधवे रत्नकम्बलम् ।
दत्ते तमानयेत्यूचे सा निर्वेदयितुं मुनिम् ॥ ५० ॥
ततश्चचाल नेपालं प्रत्यकालेऽपि बालवत् ।
पङ्किलायामिलायां स निजव्रत इव स्खलन् ॥ ५१ ॥
तत्र गत्वा महीपालाद् रत्नकम्बलमाप्य च ।
स मुनिर्वलितो वर्त्मन्यासंस्तत्र च दस्यवः ॥ ५२ ॥
आयाति लक्षमित्याख्यद् दस्यूनां शकुनस्ततः ।
किमायातीत्यपृच्छच्च दस्युराड् द्रुस्थितं नरम् ॥ ५३ ॥
आगच्छन् भिक्षुरेकोऽस्ति न कश्चित् तादृशोऽपरः ।
इत्यशंसद् द्रुमारूढश्चौरसेनापतेः स तु ॥ ५४ ॥
साधुस्तत्राथ संप्राप्तस्तैर्विधृत्य निरूपितः ।
कमप्यर्थमपश्यद्भिर्मुमुचे च मलिम्लुचैः ॥ ५५ ॥
एतल्लक्षं प्रयातीति व्याहरच्छकुनः पुनः ।
मुनिं चौरपतिः प्रोचे सत्यं ब्रूहि किमस्ति ते ? ॥ ५६ ॥
वेश्याकृतेऽस्य वंशस्यान्तः क्षिप्तो रत्नकम्बलः ।
अस्तीत्युक्ते मुनिश्चौरराजेन मुमुचेऽथ सः ॥ ५७ ॥
स समागत्य कोशायै प्रददौ रत्नकम्बलम् ।
चिक्षेप सा गृहस्रोतःपङ्के निःशङ्कमेव तम् ॥ ५८ ॥
अजल्पद् मुनिरप्येवं न्यक्षेप्यशुचिकर्दमे ।
महामूल्यो ह्यसौ रत्नकम्बलः कम्बुकण्ठि ! किम् ? ॥५९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ कोशाप्युवाचैवं कम्बलं मूढ ! शोचसि ।
गुणरत्नमयं श्वभ्रे पतन्तं स्वं न शोचसि ॥ ६० ॥
तत् श्रुत्वा जातसंवेगो मुनिस्तामित्यवोचत ।
बोधितोऽस्मि त्वया साधु संसारात् साधु रक्षितः ॥ ६१ ॥
अथान्यतीचारभवान्युन्मूलयितुमात्मनः ।
यास्यामि गुरुपादान्ते धर्मलाभस्तवानघे ! ॥ ६२ ॥
कोशापि तमुवाचैवं मिथ्या मे दुष्कृतं त्वयि ।
ब्रह्मव्रतस्थयाप्येवं मया यदसि खेदितः ॥ ६३ ॥
आशातनेयं युष्माकं बोधहेतोर्मया कृता ।
क्षन्तव्या सा गुरुवचः श्रयध्वं यात सत्वरम् ॥ ६४ ॥
इच्छामीति भणित्वा च गुर्वन्तिकमुपेत्य सः ।
गृहीत्वालोचनां तीक्ष्णमाचचार पुनस्तपः ॥ ६५ ॥
राज्ञा प्रदत्ता कोशापि तुष्टेन रथिनेऽन्यदा ।
राजायत्तेति शिश्राय विना रागेण सा तु तम् ॥ ६६ ॥
स्थूलभद्रं विना नान्यः पुमान् कोऽपीत्यहर्निशम् ।
सा तस्य रथिनोऽभ्यर्णे वर्णयामास वर्णिनी ॥ ६७ ॥
रथी गत्वा गृहोद्याने पर्यङ्के च निषद्य सः ।
तन्मनोरञ्जनायेति स्वविज्ञानमदर्शयत् ॥ ६८ ॥
माकन्दलुम्बीं बाणेन विव्याध तमपीषुणा ।
पुङ्खेऽन्येन तमप्यन्येनेत्याहस्तं शरात्यभूत् ॥ ६९ ॥
वृन्तं छित्वा क्षुरप्रेण बाणश्रेणिमुखस्थिताम् ।
लुम्बीं स्वपाणिनाऽऽकृष्यासीनस्तस्यै स आर्पयत् ॥ ७० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदानीं मम विज्ञानं पश्येत्यालप्य सापि हि ।
व्यधत्त सार्षपं राशिं तस्योपरि ननर्त च ॥ ७१ ॥
सूचीं क्षिप्वा तत्र राशौ पुष्पपत्रैः पिधाय ताम् ।
सा ननर्त च नो सूच्या विद्धा राशिश्च न क्षतः ॥ ७२ ॥
ततः स ऊचे तुष्टोऽस्मि दुष्करेणामुना तव ।
याचस्व यद् ममायत्तं ददामि तदहं ध्रुवम् ॥ ७३ ॥
सोवाच किं मयाऽकारि दुष्करं येन रञ्जितः ।
इदमप्यधिकं चास्मात् किमभ्यासेन दुष्करम् ? ॥ ७४ ॥
किञ्चाम्रलुम्बीच्छेदोऽयं नृत्यं चेदं न दुष्करम् ।
अशिक्षितं स्थूलभद्रो यच्चक्रे तत्तु दुष्करम् ॥ ७५ ॥
द्वादशाब्दानि बुभुजे भोगान् यत्र समं मया ।
तत्रैव चित्रशालायां तस्थौ सोऽखण्डितव्रतः ॥ ७६ ॥
दुग्धं नकुलसंचारादिव स्त्रीणां प्रचारतः ।
योगिनां दूष्यते चेतः स्थूलभद्रमुनिं विना ॥ ७७ ॥
दिनमेकमपि स्थातुं कोऽलं स्त्रीसंनिधौ तथा ? ।
चतुर्मासीं यथा तस्थौ स्थूलभद्रोऽक्षतव्रतः ॥ ७८ ॥
आहारः षड्रसश्चित्रशालावासोऽङ्गनान्तिके ।
अप्येकं व्रतलोपायान्यस्य लोहतनोरपि ॥ ७९ ॥
विलीयन्ते धातुमया पार्श्वे वह्नेरिव स्त्रियाः ।
स तु वज्रमयो मन्ये स्थूलभद्रो[1] महामुनिः ॥ ८० ॥

---

(१) ङ थ-भद्रम- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थूलभद्रं महासत्त्वं कृतदुष्करदुष्करम् ।
व्यावर्ण्य युक्ता मुद्रेव मुखे वर्णयितुं परम् ॥ ८१ ॥
रथिकोऽप्यथ पप्रच्छ य एवं वर्ण्यते त्वया ।
को नाम स्थूलभद्रोऽयं महासत्त्वशिरोमणिः ? ॥ ८२ ॥
साप्यूचे शकटालस्य नन्दभूपालमन्त्रिणः ।
तनयः स्थूलभद्रोऽयं तवाग्रे वर्णयामि यम् ॥ ८३ ॥
तच्छ्रुत्वा सोऽपि संभ्रान्त इत्युवाच कृताञ्जलिः ।
एषोऽस्मि किङ्करस्तस्य स्थूलभद्रमहामुनेः ॥ ८४ ॥
संविग्नं साथ तं ज्ञात्वा विदधे धर्मदेशनाम् ।
प्रत्यबुध्यत सद्बुद्धिर्मोहनिद्रामपास्य सः ॥ ८५ ॥
प्रतिबुद्धं च तं बुद्ध्वा साऽऽख्यद् निजमभिग्रहम् ।
तत् श्रुत्वा विस्मयोत्फुल्ललोचनः सोऽब्रवीदिदम् ॥ ८६ ॥
बोधितोऽहं त्वया भद्रे ! स्थूलभद्रगुणोक्तिभिः ।
यास्यामि तस्य पन्थानं भवत्यैवाद्य दर्शितम् ॥ ८७ ॥
कल्याणमस्तु ते भद्रे ! पालय स्वमभिग्रहम् ।
उक्त्वैवं सद्गुरोः पार्श्वे गत्वा दीक्षां स आददे ॥ ८८ ॥
भगवान् स्थूलभद्रोऽपि तीव्रं व्रतमपालयत् ।
द्वादशाब्दप्रमाणश्च दुष्कालः समभूत्तदा ॥ ८९ ॥
तीरं नीरनिधेर्गत्वा साधुसंघोऽखिलोऽप्यथ ।
गमयामास दुष्कालं करालं कालरात्रिवत् ॥ ९० ॥
अगुण्यमानं तु तदा साधूनां विस्मृतं श्रुतम् ।
अनभ्यसनतो नश्यत्यधीतं धीमतामपि ॥ ९१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संघोऽथ पाटलीपुत्रे समवायं विनिर्ममे ।
यदङ्गाध्ययनोद्देशाद्यासीद् यस्य तदाददे ॥ ८२ ॥
ततश्चैकादशाङ्गानि श्रीसंघोऽमेलयत्तदा ।
दृष्टिवादनिमित्तं च तस्थौ किञ्चिद् विचिन्तयन् ॥ ८३ ॥
संघोऽस्मरद् भद्रबाहोर्दृष्टिवादभृतस्ततः ।
तदानयनहेतोश्च प्रजिघाय मुनिद्वयम् ॥ ८४ ॥
गत्वा नत्वा मुनी तौ तमित्यूचाते कृताञ्जली ।
समादिशति वः संघस्तत्रागमनहेतवे ॥ ८५ ॥
सोऽप्युवाच महाप्राणध्यानमारब्धमस्ति यत् ।
भविष्यति ततो हेतोर्न तत्रागमनं मम ॥ ८६ ॥
तद्वचस्तौ मुनी गत्वा संघस्याशंसतामथ ।
संघोऽप्यपरमाहूयादिदेशेति मुनिद्वयम् ॥ ८७ ॥
गत्वा वाच्यः स आचार्यो यः श्रीसंघस्य शासनम् ।
न करोति भवेत् तस्य दण्डः क इति शंस नः ॥ ८८ ॥
संघबाह्यः स कर्त्तव्य इति वक्ति यदा स तु ।
तर्हि तद्दण्डयोग्योऽसीत्याचार्यो वाच्य उच्चकैः ॥ ८९ ॥
ताभ्यां गत्वा तथैवोक्त आचार्योऽप्येवमूचिवान् ।
मैवं करोतु भगवान् संघः किन्तु करोत्वदः ॥ २०० ॥
मयि प्रसादं कुर्वाणः श्रीसंघः प्रहिणोत्विह ।
शिष्यान् मेधाविनस्तेभ्यः सप्त दास्यामि वाचनाः ॥ १ ॥
तत्रैकां वाचनां दास्ये भिक्षाचर्यात आगतः ।
अन्यां च कालवेलायां बहिर्भूम्यागतोऽपराम् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्यां विकालवेलायां तिस्र आवश्यके पुनः ।
सेत्स्यत्येवं संघकार्यं मत्कार्यस्याविबाधया ॥ ३ ॥
ताभ्यामेत्य तथाख्याते श्रीसंघोऽपि प्रसादभाक् ।
प्राहिणोत् स्थूलभद्रादिसाधुपञ्चशतीं ततः ॥ ४ ॥
तान् सूरिर्वाचयामास तेऽप्यल्पा वाचना इति ।
उद्विज्येयुर्निजं स्थानं स्थूलभद्रस्त्ववास्थित ॥ ५ ॥
नोद्विज्यसे किमित्युक्तः सूरिणा सोऽब्रवीदिदम् ।
नोद्विज्ये भगवन् ! किन्तु ममाल्पा एव वाचनाः ॥ ६ ॥
सूरिरूचे मम ध्यानं पूर्णप्रायमिदं ततः ।
तदन्ते वाचनास्तुभ्यं प्रदास्यामि त्वदिच्छया ॥ ७ ॥
पूर्णे ध्याने ततः सूरिरिच्छया तमवाचयत् ।
द्विवस्तूनानि पूर्वाणि दश यावत् पपाठ सः ॥ ८ ॥
विहारक्रमयोगेन पाटलीपुत्रपत्तनम् ।
श्रीभद्रबाहुरागत्य बाह्योद्यानमशिश्रियत् ॥ ९ ॥
विहारक्रमयोगेन व्रतिन्योऽत्रान्तरे तु ताः ।
भगिन्यः स्थूलभद्रस्य वन्दनाय समाययुः ॥ १० ॥
वन्दित्वा गुरुमूचुस्ताः स्थूलभद्रः क्व नु प्रभो ! ।
इहापवरकेऽस्तीति तासां सूरिः शशंस च ॥ ११ ॥
ततस्तमभिचेलुस्ताः समायान्तीर्विलोक्य सः ।
आश्चर्यदर्शनकृते सिंहरूपं विनिर्ममे ॥ १२ ॥
दृष्ट्वा सिंहं तु भीतास्ताः सूरिमेत्य व्यजिज्ञपन् ।
ज्येष्ठार्यं जग्रसे सिंहस्तत्र सोऽद्यापि तिष्ठति ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञात्वोपयोगादाचार्योऽप्यादिदेशेति गच्छत ।
वन्दध्वं तत्र वः सोऽस्ति ज्येष्ठार्यो न तु केसरी ॥ १४ ॥
ततोऽयुस्ताः पुनस्तत्र स्वरूपस्थं निरूप्य च ।
ववन्दिरे स्थूलभद्रं ज्येष्ठा चाख्यद् निजां कथाम् ॥ १५ ॥
श्रीयकः सममस्माभिर्दीक्षां जग्राह किन्त्वसौ ।
क्षुधावान् सर्वदा कर्तुं नैकभक्तमपि क्षमः ॥ १६ ॥
मयोक्तः पर्युषणायां प्रत्याख्याह्यद्य पौरुषीम् ।
स प्रत्याख्यातवानुक्तो मया पूर्णेऽवधौ पुनः ॥ १७ ॥
प्रतीक्षस्व क्षणं प्रत्याख्याहि पूर्वार्धमप्ययि ! ।
अद्य यावत् त्वया चैत्यपरिपाटी विधीयते ॥ १८ ॥
तथैव प्रतिपेदेऽसौ समयेऽभिहितः पुनः ।
तिष्ठेदानीमस्त्वपार्धमिति चक्रे तथैव सः ॥ १९ ॥
प्रत्यासन्नाऽधुना रात्रिः सुखं सुप्तस्य यास्यति ।
तत्प्रत्याख्याह्यभक्तार्थमित्युक्तः सोऽकरोत् तथा ॥ २० ॥
ततो निशीथे संप्राप्ते स्मरन् देवगुरूनसौ ।
क्षुत्पीडया प्रसरन्त्या विपद्य त्रिदिवं ययौ ॥ २१ ॥
ऋषिघातो मयाऽकारीत्युत्ताम्यन्ती ततस्त्वहम् ।
पुरः श्रमणसंघस्य प्रायश्चित्ताय, ढौकिता ॥ २२ ॥
संघोऽप्यूचे व्यधायीदं भवत्या शुद्धभावया ।
प्रायश्चित्तं ततो नेह कर्तव्यं किञ्चिदस्ति ते ॥ २३ ॥
ततोऽहमित्यवोचं च साक्षादाख्याति चेज्जिनः ।
ततो हृदयसंवित्तिर्जायते मम, नान्यथा ॥ २४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्रार्थे सकलः संघः कायोत्सर्गं ददावथ ।
एत्य शासनदेव्यूचे ब्रूत कार्यं करोमि किम् ? ॥ २५ ॥
संघोऽप्येवमभाषिष्ट जिनपार्श्वमिमां नय ।
सोचे निर्विघ्नगत्यर्थं कायोत्सर्गेण तिष्ठत ॥ २६ ॥
संघे तत्प्रतिपेदाने मां साऽनैषीज्जिनान्तिके ।
ततः सीमन्धरस्वामी वन्दितो भगवान् मया ॥ २७ ॥
भरतादागताऽऽर्येयं निर्दोषेत्यवदज्जिनः ।
कृपया मन्निमित्तं च व्याचक्रे चूलिकाद्वयम् ॥ २८ ॥
ततोऽहं छिन्नसन्देहा देव्यानीता यथाश्रयम् ।
श्रीसंघस्यार्पितवती चूलिकाद्वितयं च तत् ॥ २९ ॥
इत्याख्याय स्थूलभद्रानुज्ञाता निजमाश्रयम् ।
ता ययुः स्थूलभद्रोऽपि वाचनार्थमगाद् गुरुम् ॥ ३० ॥
न ददौ वाचनां तस्याऽयोग्योऽसीत्यादिशन् गुरुः ।
दीक्षादिनात् प्रभृत्येषोऽप्यपराधान् व्यचिन्तयत् ॥ ३१ ॥
चिन्तयित्वा च न ह्यागः स्मरामीति जगाद च ।
कृत्वा न मन्यसे शान्तं पापमित्यवदद् गुरुः ॥ ३२ ॥
स्थूलभद्रस्ततः स्मृत्वा पपात गुरुपादयोः ।
न करिष्यामि भूयोऽदः क्षम्यतामिति चाब्रवीत् ॥ ३३ ॥
न करिष्यसि भूयस्त्वमकार्षीर्यदिदं पुनः ।
न दास्ये वाचनां तेनेत्याचार्यास्तमनूचिरे ॥ ३४ ॥
स्थूलभद्रस्ततः सर्वसंघेनामानयद् गुरून् ।
महतां कुपितानां हि महान्तोऽलं प्रसादने ॥ ३५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूरिः संवं बभाषेऽथ विचक्रेऽसौ यथाधुना ।
तथाऽन्ये विकरिष्यन्ते मन्दसत्त्वा अतः परम् ॥ ३६ ॥
अवशिष्टानि पूर्वाणि सन्तु मत्पार्श्व एव तत् ।
अस्यास्तु दोषदण्डोऽयमन्यशिक्षाकृतेऽपि हि ॥ ३७ ॥
स संघेनाग्रहादुक्तो विवेदेत्युपयोगतः ।
न मत्तः शेषपूर्वाणामुच्छेदो भाव्यतस्तु सः ॥ ३८ ॥
अन्यस्य शेषपूर्वाणि प्रदेयानि त्वया नहि ।
इत्यभिग्राह्य भगवान् स्थूलभद्रमवाचयत् ॥ ३९ ॥
सर्वपूर्वधरोऽथासीत् स्थूलभद्रो[१] महामुनिः ।
प्राप्य चाचार्यकं भद्रभविनः प्रत्यबोधयत् ॥ ४० ॥

स्त्रीभ्यो निवृत्तिमधिगम्य समाधिलीनः
श्रीस्थूलभद्रमुनिराप दिवं क्रमेण ।
एवंविधप्रवरसाधुजनस्य सर्व-
संसारसौख्यविरतिं विमृशेद् मनीषी ॥२४१॥१३२॥

॥ इति श्रीस्थूलभद्रकथानकम् ॥

योषिदङ्गसतत्त्वं कलापकेनाह—

यकृच्छकृन्मलश्लेष्ममज्जास्थिपरिपूरिताः ।
स्नायुस्यूता बहीरम्याः स्त्रियश्चर्मप्रसेविकाः ॥१३३॥

यकृत् कालखण्डम्, शकृद् विष्ठा, मला दन्ताद्युपलेपाः, श्लेष्मा कफः, मज्जा षष्ठो धातुः, अस्थीनि पञ्चमो धातुः, एभिः

---

(१) ङ थ -भद्रम- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिपूरिताः स्त्रियः स्त्रीशरीराणि, चर्मप्रसेविका भस्त्राः, अतएव बहिरेव रम्याः। भस्त्रा हि मध्ये पूतिद्रव्यपूरिता अपि बाह्ये रम्या भवन्ति, स्त्रियोऽप्येवम्; भस्त्राश्च स्यूता भवन्ति, अतएव स्नायुस्यूताः स्नायुभिः स्नसादिभिः स्यूता इव स्यूताः॥ १३३॥

तथा—

बहिरन्तर्विपर्यासः स्त्रीशरीरस्य चेद् भवेत्।
तस्यैव कामुकः कुर्याद् गृध्रगोमायुगोपनम्॥१३४॥

बहिश्चान्तश्च, तयोर्विपर्यासो विनिमयः बहिर्भागोऽन्तर्भवेत्, अन्तर्भागो वा बहिः, स्त्रीशरीरस्य स्त्रीदेहस्य चेद् यदि भवेत्, तदा तस्यैव स्त्रीशरीरस्य कामुकः कामी गृध्रगोमायुगोपनं गृध्रगोमायुभ्यो रक्षणं कुर्यात्। गृध्रगोमायुग्रहणं दिवानिशं रक्षणीयताप्रतिपादनार्थम्; गृध्रा हि दिवा प्रभविष्णवः, गोमायवश्च रात्रौ। तत् स्त्रीशरीरस्य विपर्यासे नक्तंदिनं कामुको गृध्रगोमायुरक्षणव्याकुल एव स्यात्, दूरे तत्परिभोगः॥ १३४॥

तथा—

स्त्रीशस्त्रेणापि चेत् कामो जगदेतज्जिगीषति।
तुच्छपिच्छमयं शस्त्रं किं नादत्ते स मूढधीः?॥१३५॥

स्त्रैव शस्त्रं स्त्रीशस्त्रं तेन जगद्विजयार्थमुपात्तेन, अपीत्यनादरे, चेद् यदि, कामो मन्मथः, एतज्जगत् त्रैलोक्यात्मकम्, जिगीषति जेतुमिच्छति, तदा स मूढधीः कामः तुच्छं काकादीनां यत् पिच्छं तन्मयं शस्त्रं किं नादत्ते कुतो हेतोर्न गृह्णाति?।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयमर्थः—यद्यसारेण रसासृग्मांसमेदोऽस्थिमज्जशुक्रपूरितेन बहु-प्रयासलभ्येन स्त्रीरूपेण शस्त्रेण जिगीषत्ययम्, तदा तुच्छं पिच्छ-मेव सुलभमपूति च किं नादत्ते ? इदं हि विस्मृतमस्य मूढधियः, यल्लौकिकाः पठन्ति ;—

अर्के चेद् मधु विन्देत किमर्थं पर्वतं व्रजेत् ? ।
दृष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ? ॥१॥१३५॥

तथा, इदमपि निद्राच्छेदे चिन्तयेत् ;—

सङ्कल्पयोनिनानेन हहा ! विश्वं विडम्बितम् ।
तदुत्खनामि सङ्कल्पं मूलमस्येति चिन्तयेत् ॥१३६॥

सङ्कल्पः कल्पनामात्रं योनिः कारणं यस्य न तु वास्तवं किञ्चित् कारणमित्यर्थस्तेन, अनेन सकलजगत्संवेदनसिद्धेन, हहा इति खेदे, विश्वं जगद् ब्रह्म-हरि-हर-संक्रन्दनप्रभृति कङ्कीटपर्यवसानं तैस्तैः स्त्रीदर्शनालिङ्गनस्मरणादिभिः प्रकारै-र्विडम्बितं विगोपितम् । श्रूयते हि पुराणे—हरगौरीविवाहोत्सवे पुरोहितीभूतः पितामहो, गौरीप्रणयप्रार्थनासु हरः, गोपीचाटु-कर्मणा श्रीपतिः, गौतमभार्यायां रममाणः सहस्रलोचनः, बृहस्पति-भार्यायां तारायां चन्द्रः, अश्वायामप्यादित्यो विडम्बनां प्रापितः । तदनेनासारेणासारहेतूद्भवेन च यद् विश्वं विडम्ब्यते तदसाम्प्रतम् । तत् तस्मादिदानीमस्यैव जगद्विडम्बनकर्तुः सङ्कल्पलक्षणं मूल-मुत्खनामि उन्मूलयामि । इति स्त्रीशरीरस्याशुचित्वमसारत्वं सङ्कल्पयोन्युपकरणत्वं च विचिन्तयेदिति प्रकृतयोजना ॥ १३६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तथा, इदमपि निद्राच्छेदे चिन्तयेत्—

यो यः स्याद्बाधको दोषस्तस्य तस्य प्रतिक्रियाम्।
चिन्तयेद् दोषमुक्तेषु प्रमोदं यतिषु व्रजन् ॥१३७॥

यो यो राग-द्वेष-क्रोध-मान--माया-लोभ-मोह-मन्मथा ऽसूया-मत्सरादिदोषो बाधकश्चित्तप्रशान्तिवाहिकायास्तस्य तस्य दोषस्य प्रतिक्रियां प्रतीकारं चिन्तयेत्; तथाहि—रागस्य वैराग्यम्, द्वेषस्य मैत्री, क्रोधस्य क्षमा, मानस्य मार्दवम्, मायाया आर्जवम्, लोभस्य सन्तोषः, मोहस्य विवेकः, मन्मथस्य स्त्रीशरीराशौचभावना, असूयाया अनसूयत्वम्, मत्सरस्य परसंपदुत्कर्षेऽपि चित्तानाबाधा च प्रतिक्रिया मता। इदं चाशक्यमिति नाशङ्कनीयम्, दृश्यन्ते हि मुनयस्तत्तद्दोषपरिहारेण गुणमयमात्मानं बिभ्रतः। अत एवाह—दोषमुक्तेषु यतिषु प्रमोदं व्रजन्। सुकरं हि दोषमुक्त-मुनिदर्शनेन प्रमोदादात्मन्यपि दोषमोचनम् ॥ १३७ ॥

तथा—

दुःस्थां भवस्थितिं स्थेम्ना सर्वजीवेषु चिन्तयन्।
निसर्गसुखसर्गं तेष्वपवर्गं विमार्गयेत् ॥१३८॥

दुस्थां दुःखहेतुम्, भवस्थितिं संसारावस्थानम्, चिन्तयन् विमृशन्, सर्वजीवेषु तिर्यग्-नारक-नरा-ऽमरेषु; तथाहि—तिरश्चां वध-बन्ध-ताडन-पारवश्य-क्षुत्-पिपासा-ऽतिभारारोपणा-ऽङ्गच्छेदा-दिभिः, नारकाणां च स्वाभाविक-परस्परोदीरित-परमाधार्मिक-कृतक्षेत्रानुभावजवेदनामनुभवतां क्रकचदारण--कुम्भीपाक-कूट-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शाल्मलीसमाश्लेष-वैतरणीतरणादिभिः, नराणां च दारिद्र्यव्याधि-पारवश्यवधबन्धादिभिः, सुराणां चेर्ष्या-विषाद-विपक्षसंपद्दर्शन-मरणदुःखानुचिन्तनादिभिर्दुःस्थैव भवस्थितिः, तां स्थेम्ना स्थैर्येण चिन्तयंस्तेषु सर्वजीवेष्वपवर्गं मोक्षम्, किंविशिष्टम्? निसर्गसुखसर्गं निसर्गेण सुखसंसर्गो यत्र तम्, विमार्गयेदाशंसेत्—कथं नु नाम सर्वे संसारिणः सकलदुःखविमोक्षेण मोक्षेण संयुज्येरन्निति ॥१३८॥

इदमपि निद्राच्छेदे चिन्तयेत्—

संसर्गेऽप्युपसर्गाणां दृढव्रतपरायणाः ।
धन्यास्ते कामदेवाद्याः श्लाघ्यास्तीर्थकृतामपि ॥१३९॥

संसर्गेऽपि संबन्धेऽपि, उपसर्गाणां सुरादिकृतानाम्, दृढव्रत-परायणाः प्रतिपन्नव्रतपालनपराः, कामदेवाद्याः कामदेवप्रभृतयः, धन्या धर्मधनं लब्धारः, त इति भगवदुपासकत्वेन प्रसिद्धाः। धन्यत्वे विशेषहेतुमाह--श्लाघ्याः प्रशस्यास्तीर्थकृतां श्रीमन्महा-वीरस्य, पूजायां बहुवचनम् ।

कामदेवकथानकं च संप्रदायगम्यम् । स चायम्,--

अनुगङ्गं पतद्हंसश्रेणीभिरिव चारुभिः ।
चैत्यध्वजै राजमाना चम्पेत्यस्ति महापुरी ॥ १ ॥
भोगिभोगायतभुजस्तम्भः कुलगृहं श्रियः ।
जितशत्रुरिति नाम्ना तस्यामासीद् महीपतिः ॥ २ ॥
अभूद् गृहपतिस्तस्यां कामदेवाभिधः सुधीः ।
आश्रयोऽनेकलोकानां महातरुरिवाध्वनि ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्ष्मीरिव स्थिरीभूता रूपलावण्यशालिनी ।
अभूद् भद्राकृतिर्भद्रा नाम तस्य सधर्मिणी ॥ ४ ॥
निधौ षट् स्वर्णकोट्यः षड् वृद्धौ षड् व्यवहारगाः ।
व्रजाः षट् चास्य दशगोसहस्रमितयोऽभवन् ॥ ५ ॥
तदा च विहरन्नुर्वीं तत्रोर्वीमुखमण्डने ।
पुण्यभद्राभिधोद्याने श्रीवीरः समवासरत् ॥ ६ ॥
कामदेवोऽथ पादाभ्यां भगवन्तमुपागमत् ।
शुश्राव च श्रोत्रसुधां स्वामिनो धर्मदेशनाम् ॥ ७ ॥
कामदेवस्ततो देवनरासुरगुरोः पुरः ।
प्रपेदे द्वादशविधं गृहिधर्मं विशुद्धधीः ॥ ८ ॥
प्रत्याख्यात् स विना भद्रां स्त्रीर्व्रजान् षड्व्रजीं विना ।
निधौ वृद्धौ व्यवहारे षट् षट् कोटीर्विना वसु ॥ ९ ॥
हलपञ्चशतीं मुक्त्वाऽत्याक्षीत् क्षेत्राण्यनांसि तु ।
दिग्यात्रिकाणि वोढॄणि पञ्च पञ्च शतान्यृते ॥ १० ॥
दिग्यात्रिकाणि चत्वारि चत्वारि प्रवहन्ति च ।
विहाय वहनान्येष प्रत्याख्यद् वहनान्यपि ॥ ११ ॥
विनैकां गन्धकाषायीं स तत्याजाङ्गमार्जनम् ।
दन्तधावनमप्यार्द्रामपास्य मधुयष्टिकाम् ॥ १२ ॥
ऋते च क्षीरामलकात् फलान्यन्यानि सोऽमुचत् ।
अभ्यङ्गं च विना तैले सहस्रशतपाकिमे ॥ १३ ॥
विना सुगन्धिगन्धाढ्यमुद्वर्तनकमत्यजत् ।
विनाष्टावौष्ट्रिकानम्भस्कुम्भान् मज्जनकर्म च ॥ १४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋते च क्षौमयुगलाद् वस्त्रं सर्वमवर्जयत् ।
चन्दनागुरुघुसृणान्यपास्यान्यद् विलेपनम् ॥ १५ ॥
जातीस्रजं च पद्मं च विना कुसुममत्यजत् ।
कर्णिकां नाममुद्रां च विहायाभरणान्यपि ॥ १६ ॥
तुरुष्कागुरुधूपेभ्य ऋते धूपविधिं जहौ ।
घृतपूरात् खण्डखाद्यादन्यद् भक्ष्यमवर्जयत् ॥ १७ ॥
काष्ठपेयां विना पेयामोदनं कलमं विना ।
माससुद्गकलायेभ्य ऋते सूपं च सोऽमुचत् ॥ १८ ॥
तत्याज च घृतं सर्वमृते शारदगोघृतात् ।
शाकं स्वस्तिकमण्डूक्याः पल्लङ्काच्चापरं जहौ ॥ १९ ॥
अन्यत् स्नेहाम्लदाल्यम्लात् तीमनं वारि खाम्भसः ।
जहौ सुगन्धिताम्बूलाद् मुखवासमथापरम् ॥ २० ॥
ततः प्रभुं स वन्दित्वा ययौ निजनिकेतनम् ।
तद्भार्याप्येत्य जग्राह स्वाम्यग्रे श्रावकव्रतम् ॥ २१ ॥
कुटुम्बभारमारोप्य ज्येष्ठपुत्रे ततः स्वयम् ।
तस्थौ पौषधशालायामप्रमादी व्रतेषु सः ॥ २२ ॥
तस्युषस्तस्य तत्राथ निशीथे चोभहेतवे ।
पिशाचरूपभृद् मिथ्यादृष्टिः कोऽप्याययौ सुरः ॥ २३ ॥
शिरोरुहाः शिरस्यस्य कर्कशाः कपिशत्विषः ।
चकासामासुरापक्वाः केदार इव शालयः ॥ २४ ॥
भाण्डभित्तनिभं भालं बभ्रुपुच्छोपमे भ्रुवौ ।
कर्णौ सूर्पाकृती युग्मचुल्लीतुल्या च नासिका ॥ २५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उष्ट्रोष्ठलम्बिनावोष्ठौ दशना: फालसन्निभा: ।
जिह्वा सर्पोपमा श्मश्रु वाजिवालधिसोदरम् ॥ २६ ॥
तप्तमूषानिभे नेत्रे हनू सिंहहनूपमौ ।
हलास्यतुल्यं चिबुकं ग्रीवोष्ट्रग्रीवया समा ॥ २७ ॥
उर: पुरकपाटोरु भुजौ भुजगभीषणौ ।
पाणी शिलाभावङ्गुल्य: शिलापुत्रकसन्निभा: ॥ २८ ॥
पातालतुल्यमुदरं नाभि: कूपसहोदरा ।
शिश्नं चाजगरप्रायं वृषणौ कुतपोपमौ ॥ २९ ॥
जङ्घे तालद्रुमाकारे पादौ शैलशिलोपमौ ।
कोलाहलरवोऽकाण्डाशनिध्वनिभयानक: ॥ ३० ॥
स मूर्ध्नाखुस्रजं बिभ्रत् कण्ठे च सरटस्रजम् ।
नकुलान् कर्णिकास्थाने ऽङ्गदस्थाने च पन्नगान् ॥ ३१ ॥
क्रुद्धान्तकसमुत्क्षिप्ततर्जनाङ्गुलिदारुणम् ।
उदस्यन्नपकोशासिं कामदेवं जगाद स: ॥ ३२ ॥
अप्रार्थितप्रार्थक ! रे ! किमारब्धमिदं त्वया ।
किं स्वर्गमपवर्गं वा वराक ! त्वमपीच्छसि ? ॥ ३३ ॥
मुञ्चारब्धमिदं नो चेदनेन निशितासिना ।
तरोरिव फलं स्कन्धात् पातयिष्यामि ते शिर: ॥ ३४ ॥
तर्जयत्यपि तत्रैवं समाधेर्न चचाल स: ।
शरभ: शैरिभारावै: किं क्षुभ्यति कदाचन ? ॥ ३५ ॥
कामदेव: शुभध्यानाद् न चचाल यदा तदा ।
व्याजहार तथैवायं द्विस्त्रिस्त्रिदशपांसन: ॥ ३६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्राप्यक्षुभ्यतः सोऽस्य क्षोभायेभं वपुर्व्यधात् ।
स्वशक्त्यन्तमनालोक्य विरमन्ति खला न हि ॥ ३७ ॥
सोऽधत्त विग्रहं तुङ्गं सजलाम्भोदसोदरम् ।
सर्वतोऽप्येत्य मिथ्यात्वं राशीभूतमिवैकतः ॥ ३८ ॥
स दीर्घदारुणाकारं विषाणद्वन्द्वमुन्नतम् ।
धारयामास कीनाशभुजदण्डविडम्बकम् ॥ ३९ ॥
किञ्चिदाकुञ्चितां शुण्डां कालपाशमिवोद्वहन् ।
कामदेवं जगादेवं देवः कूटैकदैवतम् ॥ ४० ॥
मायाविन् ! मुच्यतां माया सुखं तिष्ठ मदाज्ञया ।
पाखण्डगुरुणा केन त्वमस्येवं विमोहितः ? ॥ ४१ ॥
न चेद् मुञ्चस्यमुं धर्मं शुण्डादण्डेन तद् (१)द्रुतम् ।
कृष्यामि त्वामितः स्थानाद् नेष्यामि च नभोऽङ्गणे ॥४२॥
व्योम्नः पतन्तं दन्ताभ्यां प्रेषयिष्यामि चान्तरा ।
अवनम्य ततस्ताभ्यां दारयिष्यामि दारुवत् ॥ ४३ ॥
पादैः कर्दममर्दं च त्वां मर्दिष्यामि निर्दयम् ।
एकपिण्डीकरिष्यामि तिलपिष्टिमिव क्षणात् ॥ ४४ ॥
उन्मत्तस्येव तस्यैवं घोरं व्याहरतोऽपि हि ।
नोत्तरं कामदेवोऽदाद् ध्यानसंलीनमानसः ॥ ४५ ॥
असंक्षुभितमोक्षित्वा कामदेवं दृढाशयम् ।
द्विस्त्रिश्चतुरभाषिष्ट तथैव स दुराशयः ॥ ४६ ॥

(१) ड घ ध्रुवम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततोऽप्यभीतं तं प्रेक्ष्य शुण्डादण्डेन सोऽग्रहीत् ।
व्योमन्युच्छालयामास प्रतीयेष च पूर्ववत् ॥ ४७ ॥
दलयामास दन्ताभ्यां पादन्यासैर्ममर्द च ।
धर्मकर्मविरुद्धानां किमकृत्यं दुरात्मनाम् ? ॥ ४८ ॥
अधिसेहे च तत् सर्वं कामदेवो महामनाः ।
मनागपि च न स्थैर्यं जहौ गिरिरिव स्थिरः ॥ ४९ ॥
तस्मिन्नचलिते ध्यानादीदृशेनापि कर्मणा ।
सदर्पः सर्परूपं स विदधे विबुधाधमः ॥ ५० ॥
देवः पूर्ववदेवोचे स तं भापयितुं ततः ।
कामदेवस्तु नाभैषीद् ध्यानसंवर्मितः सुधीः ॥ ५१ ॥
भूयो भूयस्तथोक्त्वा तं निर्भीकं प्रेक्ष्य दुःसुरः ।
आतोद्यमिव वध्रेण स्वभोगेनाभ्यवेष्टयत् ॥ ५२ ॥
निःशूकमिव दशनैर्दंदशूको ददंश तम् ।
स तु ध्यानसुधामग्नो न तद्बाधामजीगणत् ॥ ५३ ॥
दिव्यरूपं ततः कृत्वा, द्युतिद्योतितदिङ्मुखम् ।
सुरः पौषधशालायां विवेशैवमुवाच च ॥ ५४ ॥
धन्योऽसि कामदेव ! त्वं देवराजेन संसदि ।
प्रशंसाऽकारि भवतोऽसहिष्णुस्तामिहागमम् ॥ ५५ ॥
प्रभवः प्राभवेणापि वर्णयन्ति ह्यवस्त्वपि ।
अतः परीक्षितोऽसि त्वं नानारूपभृता मया ॥ ५६ ॥
त्वां यथाऽवर्णयच्छक्रस्तथैवासि न संशयः ।
क्षम्यतामपराधो मे परीक्षणभवस्त्वया ॥ ५७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रययावभिधायैवं स देवो देवसद्मनि ।
कामदेवोऽपि शुद्धात्मा प्रतिमां तामपारयत् ॥ ५८ ॥
उपसर्गसहिष्णुं तमश्लाघिष्ट स्वयं प्रभुः ।
सभायां भगवान् वीरो गुरवो गुणवत्सलाः ॥ ५९ ॥
कामदेवो द्वितीयस्मिन्नह्नि पारितपोषधः ।
त्रिजगत्स्वामिनः पादवन्दनार्थमथागमत् ॥ ६० ॥
जगद्गुरुरभाषिष्ट गौतमप्रभृतीनिति ।
गृहिधर्मेऽप्यसावेवमुपसर्गान् विसोढवान् ॥ ६१ ॥
सर्वसङ्गपरित्यागाद् यतिधर्मपरायणैः ।
तद्विशेषेण सोढव्या उपसर्गा भवादृशैः ॥ ६२ ॥
कर्मनिर्मूलनोपायान् श्रावकप्रतिमास्ततः ।
एकादशापि शिश्राय कामदेवः क्रमेण ताः ॥ ६३ ॥
सोऽथ संलेखनां कृत्वा प्रपेदेऽनशनव्रतम् ।
परं समाधिमापन्नः कालधर्ममुपाययौ ॥ ६४ ॥
सोऽरुणाभे विमानेऽभूद् चतुष्पल्यस्थितिः सुरः ।
च्युत्वा ततो विदेहेषूत्पद्य सिद्धिं व्रजिष्यति ॥ ६५ ॥

यथोपसर्गेऽपि निसर्गधैर्यात्
स कामदेवो व्रततत्परः सन् ।
श्लाघ्योऽभवत् तीर्थकृतां तथाऽन्ये-
ऽप्येवंविधा धन्यतमाः पुमांसः ॥ ६६॥१३९ ॥

॥ इति कामदेवकथानकं संपूर्णम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदमपि निद्राच्छेदे चिन्तयेत्—

जिनो देवः कृपा धर्मो गुरवो यत्र साधवः ।
श्रावकत्वाय कस्तस्मै न श्लाघेताविमूढधीः ? ॥१४०॥

श्रावका उक्तनिर्वचनास्तेषां भावः श्रावकत्वं तस्मै श्रावकत्वाय को न श्लाघेत ?—सर्वः श्लाघेतैव, मुक्त्वा मोहमूढान् । अत एवाह—अविमूढधीः ; मूढबुद्धीनां ह्यतत्त्वदर्शिनां तैमिरिकाणामिव चन्द्रद्वितय-शङ्खपीतिमदर्शिनां मा भूत् श्रावकत्वाय श्लाघा, अमूढबुद्धयस्तु तत्त्वदर्शित्वात् श्लाघन्त एव । तस्मै इति, तत्संबन्धिनं यच्छब्दमाह—यत्र श्रावकत्वे जिनो रागादिदोषजेता देवः पूज्यो न तु रागादिमान्, कृपा दुःखितदुःखप्रहाणेच्छा, धर्मोऽनुष्ठेयरूपो न तु हिंसात्मको यागादिः, साधवः पञ्चमहाव्रतरताः, गुरवो धर्मोपदेष्टारो न तु परिग्रहारम्भसक्ताः ॥ १४० ॥

तथा, निद्राच्छेदे तांस्तान् मनोरथान् सप्तभिः श्लोकैराह—

जिनधर्मविनिर्मुक्तो मा भूवं चक्रवर्त्यपि ।
स्यां चेटोऽपि दरिद्रोऽपि जिनधर्माधिवासितः ॥१४१॥

जिनधर्मेण ज्ञान-दर्शन-चारित्ररूपेण विनिर्मुक्तो रहितश्चक्रवर्त्यपि सार्वभौमोऽपि मा भूवं मा जनिषि, तस्य नरकमूलत्वात्; किन्तु स्यां भवेयं चेटोऽपि दासोऽपि दरिद्रोऽपि दुःस्थितोऽपि, कथंभूतः ? जिनधर्मेणोक्तस्वरूपेणाधिवासितः ॥ १४१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

त्यक्तसङ्गो जीर्णवासा मलक्लिन्नकलेवरः ।
भजन् माधुकरीं वृत्तिं मुनिचर्यां कदा श्रये ? ॥१४२॥

त्यक्ता गृहगृहिणीप्रभृतयः सङ्गा येन स त्यक्तसङ्गः, जीर्णं जरद् वासो यस्य स जीर्णवासाः, मलेन क्लिन्नं कलेवरं यस्य स मलक्लिन्नकलेवरः, मधुकरस्येयं माधुकरी माधुकरीव माधुकरी वृत्तिर्भिक्षा तां भजन् सेवमानः, यदाहुः ;—

[1]जहा दुमस्स पुप्फेसु भमरो आविअइ रसं ।
न य पुप्फं किलामेइ सो य पीणेइ अप्पयं ॥ १ ॥
एमेए समणा मुत्ता जे लोए संति साहुणो ।
विहंगमा व पुप्फेसु दाणभत्तेसणे रया ॥ २ ॥
वयं च वित्तिं लब्भामो न य कोवुवहम्मइ ।
अहागडेसु रीयंते पुप्फेसु भमरा जहा ॥ ३ ॥

मुनीनां चर्या मूलगुणोत्तरगुणरूपा तां कदा कर्हिं श्रये श्रयिष्यामि, कदाकर्ह्योर्नवा ॥ ५ । ३ । ८ ॥ इति वर्त्स्यति वर्तमाना ॥ १४२ ॥

---

(१) यथा द्रुमस्य पुष्पेषु भ्रमर आपिबति रसम् ।
न च पुष्पं क्लमयति स च प्रीणात्यात्मानम् ॥ १ ॥
एवमेते श्रमणा मुक्ता ये लोके सन्ति साधवः ।
विहङ्गमा इव पुष्पेषु दानभक्तैषणे रताः ॥ २ ॥
वयं च वृत्तिं लप्स्यामो न च कोऽप्युपहन्यते ।
यथाकृतेषु रीयन्ते पुष्पेषु भ्रमरा यथा ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

त्यजन् दुःशीलसंसर्गं गुरुपादरजः स्पृशन् ।
कदाहं योगमभ्यस्यन् प्रभवेयं भवच्छिदे ॥ १४३ ॥

दुःशीला लौकिका लोकोत्तराश्च । तत्र लौकिका दुःशीला विट-भट-भण्ड गणिकादयः, लोकोत्तरास्तु पार्श्वस्थावसन्नकुशील-संसक्तयथाच्छन्दास्तैः संसर्गं संवासादिरूपं, त्यजन् परिहरन् । न च तन्मात्रेण भवतीत्याह—गुरुपादरजः स्पृशन् । अनेन सत्-संसर्गमाह ।, न चैतावताप्यलमित्याह—योगमभ्यस्यन् योगो रत्नत्रयं ध्यानं वा तमभ्यस्यन् पुनः पुनः परिशीलयन् कदाहं प्रभवेयं प्रभविष्यामि । कस्मै ? भवच्छिदे संसारोच्छेदाय ॥१४३॥

तथा—

महानिशायां प्रकृते कायोत्सर्गे पुराद् बहिः ।
स्तम्भवत् स्कन्धकषणं [1]वृषाः कुर्युः कदा मयि ॥१४४॥

महानिशायां निशीथे, कायोत्सर्गे प्रकृते प्रारब्धे पुराद् बहिर्नगराद् बाह्यप्रदेशे स्तम्भ इव स्तम्भवद् मयि स्कन्धकषणं स्कन्धकण्डूयनं कदा वृषा उत्सृष्टपशवः कुर्युः करिष्यन्ति । इदं च प्रतिमाप्रतिपन्नश्रावकविषयम्, तस्यैव पुराद् बहिष्कृतकायोत्सर्गस्य शिलास्तम्भभ्रान्त्या वृषभैः स्कन्धकषणसंभवः ; प्रेप्सितयत्यवस्थापेक्षं वा, यतीनां जिनकल्पिकादीनां सर्वदा कायोत्सर्गसंभवात् ॥१४४॥

---

(१) छ कदा कुर्युर्वृषा म ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

वने पद्मासनासीनं क्रोडस्थितमृगार्भकम् ।
कदाऽऽघ्रास्यन्ति वक्त्रे मां जरन्तो मृगयूथपाः ॥१४५॥

वनेऽरण्ये पद्मासनं वक्ष्यमाणं तेनासीनमुपविष्टम्, अहिंस्रत्वेन क्रोडे उत्सङ्गे स्थिता मृगार्भका मृगडिम्भा यस्य तं क्रोडस्थित-मृगार्भकम्, एवंविधं मामपरिकर्मशरीरं कदा वक्त्रे आघ्रास्यन्ति, के, मृगयूथपा मृगयूथाधिपतयः, किंविशिष्टाः, जरन्तो वृद्धाः। जरन्तो हि यथा कथञ्चित् न विश्वसन्ति, परमसमाधिनिश्चलता-संदर्शनात् तेऽपि विश्वस्ताः सन्तो जातिस्वभावाद् वक्त्रे आजि-घ्रन्ति ॥ १४५ ॥

तथा—

शत्रौ मित्रे तृणे स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि ।
मोक्षे भवे भविष्यामि निर्विशेषमतिः कदा ॥१४६॥

शत्रौ रिपौ, मित्रे सुहृदि, तृणे शष्पादौ, स्त्रैणे स्त्रीसमूहे, स्वर्णे काञ्चने, अश्मन्युपले, मणौ रत्ने, मृदि मृत्तिकायाम्, मोक्षे कर्मवियोगलक्षणे, भवे कर्मसंबन्धलक्षणे, निर्विशेषमतिस्तुल्यमतिः कदा भविष्यामि। शत्रुमित्रादिषु निर्विशेषमतित्वमप्यन्यस्यापि भवेत्, असौ तु परमवैराग्योपगतो मोक्ष-भवयोरपि निर्विशेषत्व-मर्थयते, यदाह ;—

मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः । इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एते च मनोरथाः क्रमेणोत्तरोत्तरप्रकर्षवन्तः, तथाहि—प्रथमे श्लोके जिनधर्मानुरागमनोरथः, द्वितीये तु यतिधर्मपरिग्रहमनोरथः, तृतीये तु यतिचर्याकाष्ठाधिरोहणमनोरथः, चतुर्थे तु कायोत्सर्गादिमनोरथः, पञ्चमे तु गिरि-गुहाद्यवस्थितमुनिचर्यामनोरथः, षष्ठे तु परमसामायिकपरिपाकमनोरथः ॥१४६॥

इदानीमुपसंहरति—

अधिरोढुं गुणश्रेणिं निःश्रेणीं मुक्तिवेश्मनः ।
परानन्दलताकन्दान् कुर्यादिति मनोरथान् ॥१४७॥

अधिरोढुमारोढुं गुणश्रेणिमुत्तरोत्तरगुणस्थानरूपाम्, किंविशिष्टाम्? निःश्रेणीमिव निःश्रेणीम्, कस्य? मुक्तिलक्षणस्य वेश्मनो मन्दिरस्य, कुर्याद् विदध्यात्, इति श्लोकषट्केनोक्तान् मनोरथान्, किंविशिष्टान्? परानन्दलताकन्दान् परश्चासावानन्दश्च स एव लता तस्याः कन्दान् कन्दभूतान्। यथा हि कन्दाल्लता प्रभवति तथैतेभ्योऽपि मनोरथेभ्यः परो य आनन्दः परमसामायिकरूपः स प्रभवति। सप्तभिः कुलकम् ॥१४७॥

अथोपसंहरति—

इत्याहोरात्रिकीं चर्यामप्रमत्तः समाचरन् ।
यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुध्यति ॥१४८॥

इति पूर्वोक्तक्रमेण, अहोरात्रे भवामाहोरात्रिकीं चर्यां समाचाररूपामप्रमत्तः प्रमादरहितः समाचरन् सम्यक् कुर्वन्, उक्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जिनागमेऽभिहितं यद् वृत्तं प्रतिमादिलक्षणं तत्र तिष्ठतीत्युक्त-वृत्तस्थः, कथम् ? यथावत् सम्यग्विधिना, गृहस्थोऽपि यतित्व-मप्राप्नुवन्नपि विशुध्यति क्षीणपापो भवति।

अथ पुनः काः प्रतिमाः, यासु स्थितो गृहस्थोऽपि विशुध्यति ? उच्यते—शङ्कादिदोषरहितं प्रशमादिलिङ्गं स्थैर्यादिभूषणं मोक्ष-मार्गप्रासादपीठभूतं सम्यग्दर्शनं भय-लोभ-लज्जादिभिरप्यनति-चरन् मासमात्रं सम्यक्त्वमनुपालयति, इत्येषा प्रथमा प्रतिमा।१।

द्वौ मासौ यावदखण्डितान्यविराधितानि च पूर्वप्रतिमा-नुष्ठानसहितानि द्वादशापि व्रतानि पालयतीति द्वितीया।२।

त्रीन् मासानुभयकालमप्रमत्तः पूर्वोक्तप्रतिमानुष्ठानसहितः सामायिकमनुपालयतीति तृतीया।३।

चतुरो मासांश्चतुष्पर्व्यां पूर्वप्रतिमानुष्ठानसहितोऽखण्डितं पौषधं पालयतीति चतुर्थी।४।

पञ्च मासांश्चतुष्पर्व्यां गृहे तद्द्वारे चतुष्पथे वा परीषहोप-सर्गादिनिष्कम्पकायोत्सर्गः पूर्वोक्तप्रतिमानुष्ठानं पालयन् सकलां रात्रिमास्त इति पञ्चमी।५।

एवं वक्ष्यमाणास्वपि प्रतिमासु पूर्वपूर्वप्रतिमानुष्ठाननिष्ठिता अवसेयाः, नवरं षण्मासान् ब्रह्मचारी भवतीति षष्ठी।६।

सप्त मासान् सचित्ताहारान् परिहरतीति सप्तमी।७।

अष्टौ मासान् स्वयमारम्भं न करोतीत्यष्टमी।८।

नव मासान् प्रेष्यैरप्यारम्भं न कारयतीति नवमी।९।

दश मासानात्मार्थनिष्पन्नमाहारं न भुङ्क्ते इति दशमी।१०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकादश मासान् त्यक्तसङ्गो रजोहरणादिमुनिवेषधारी कृत-केशोत्पाटः स्वायत्तेषु गोकुलादिषु वसन् प्रतिमाप्रतिपन्नाय श्रमणोपासकाय 'भिक्षां दत्त' इति वदन् धर्मलाभशब्दोच्चारण-रहितं सुसाधुवत् समाचरतीत्येकादशी । उक्तं हि ;—

[1]'दंसणपडिमा नेश्रा सम्मत्तजुश्रस्स जा इहं बुंदी ।
कुग्गहकलंकरहिश्रा मिच्छत्तखश्रोवसमभावा ॥ १ ॥
बीश्रा पडिमा णेया सुद्धाणुव्वयधारणं ।
सामाइश्रपडिमाश्रो सुद्धं सामाइयं पिश्र ॥ २ ॥
श्रट्ठमीमाइपव्वेसु सम्मं पोसहपालणं ।
सेसाणुट्ठाणजुत्तस्स चउत्थी पडिमा इमा ॥ ३ ॥
निक्कंपो काउसग्गं तु पुव्वुत्तगुणसंजुश्रो ।
करेइ पव्वराईसु पंचमिं पडिवन्नश्रो ॥ ४ ॥
छट्ठीए बंभयारी सो फासुश्राहार सत्तमी ।
वज्जे सावज्जमारंभं श्रट्ठमिं पडिवन्नश्रो ॥ ५ ॥

---

(१) दर्शनप्रतिमा ज्ञेया सम्यक्त्वयुतस्य येह तनुः ।
कुग्रहकलङ्करहिता मिथ्यात्वक्षयोपशमभावात् ॥ १ ॥
द्वितीया प्रतिमा ज्ञेया शुद्धाणुव्रतपालनम् ।
सामायिकप्रतिमातः शुद्धं सामायिकमपि च ॥ २ ॥
अष्टम्यादिपर्वसु सम्यक् पौषधपालनम् ।
शेषानुष्ठानयुक्तस्य चतुर्थी प्रतिमेयम् ॥ ३ ॥
निष्कम्पः कायोत्सर्गं तु पूर्वोक्तगुणसंयुतः ।
करोति पर्वरात्रीषु पञ्चमीं प्रतिपन्नकः ॥ ४ ॥
षष्ठ्यां ब्रह्मचारी स प्रासुकाहारः सप्तम्याम् ।
वर्जयेद् सावद्यमारम्भमष्टमीं प्रतिपन्नकः ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]अवरेणावि आरंभं नवमी नो करावए ।
दसमीए पुणोद्दिट्ठं फासुअं पि न भुंजए ॥ ६ ॥
एक्कारसीइ निस्संगो धरे लिंगं पडिग्गहं ।
कयलोओ सुसाहु व्व पुव्वुत्तगुणसायरो ॥७॥ इति ॥१४८॥

इदानीं पञ्चभिः श्लोकैर्विधिशेषमाह—

सोऽथावश्यकयोगानां भङ्गे मृत्योरथागमे ।
कृत्वा संलेखनामादौ प्रतिपद्य च संयमम् ॥१४९॥
जन्मदीक्षाज्ञानमोक्षस्थानेषु श्रीमदर्हताम् ।
तदभावे गृहेऽरण्ये स्थण्डिले जन्तुवर्जिते ॥१५०॥
त्यक्त्वा चतुर्विधाहारं नमस्कारपरायणः ।
आराधनां विधायोच्चैश्चतुःशरणमाश्रितः ॥१५१॥
इहलोके परलोके जीविते मरणे तथा ।
त्यक्त्वाशंसां निदानं च समाधिसुधयोक्षितः ॥१५२॥
परीषहोपसर्गेभ्यो निर्भीको जिनभक्तिभाक् ।
प्रतिपद्येत मरणमानन्दः श्रावको यथा ॥१५३॥

व्याख्या—स श्रावकः, अथानन्तरम्, आवश्यका अवश्य-

(१) अपरेणाप्यारम्भं नवम्यां नो कारयेत् ।
दशम्यां पुनरुद्दिष्टं प्रासुकमपि न भुञ्जीत ॥ ६ ॥
एकादश्यां निस्सङ्गो धरेल्लिङ्गं प्रतिग्रहम् ।
कृतलोचः सुसाधुरिव पूर्वोक्तगुणसादरः ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणीया ये योगाः संयमव्यापारास्तेषां भङ्गे कर्तुमशक्ताविल्येकं कारणम्; अथ द्वितीयं-मृत्योरागमे मृत्युसमये संप्राप्ते, संलिख्यते तनूक्रियते शरीरं कषायाश्चानयेति संलेखना, तत्र शरीरसंलेखना क्रमेण क्रमेण भोजनत्यागः, कषायसंलेखना तु क्रोधादिकषाय-परिहारः। तत्र प्रथमायाः कारणमिदम्,—

[1]देहम्मि असंलिहिए सहसा धाऊहिं खिज्जमाणेहिं।
जायइ अट्टज्झाणं सरीरिणो चरमकालम्मि॥ १॥

द्वितीयायाः पुन[2]रिदम्;—

[3]न ते एयं पसंसामि किसं साहु सरीरयं।
कीस ते अंगुली भग्गा भावं संलिह मा तुर!॥ १॥

इत्यादिना प्रबन्धेनोक्तम्। संयमं च यथौचित्येन प्रतिपद्यते। तत्रेयं सामाचारी;—श्रावकः किल सकलस्य श्रावकधर्म-स्योद्यापनार्थमिवान्ते संयमं प्रतिपद्यते तस्य साधुधर्मशेषभूतैव संलेखना, यदाह;—[4]संलेहणा उ अंते न निओआ जेण पव्वअइ कोई। ततो यः संयमं प्रतिपद्यते स संयमानन्तरं काले संलेखनां कृत्वा मरणं प्रतिपद्यते; यस्तु न संयमं प्रतिपद्यते तं प्रति सकलो ग्रन्थः 'आनन्दश्रावको यथा' इतिपर्यन्तः संबध्यते॥१४९॥

---

(१) देहेऽसंलिखिते सहसा धातुभिः खिद्यमानैः।
जायत आर्तध्यानं शरीरिणश्चरमकाले॥ १॥

(२) ग ङ थ -नः।

(३) न ते एतत् प्रशंसामि कृशं साधो! शरीरकम्।
कस्मात् तेऽङ्गुलिर्भग्ना भावं संलिख मा त्वरस्व॥ १॥

(४) संलेखना त्वन्ते न नियोगाद् येन प्रव्रजति कोऽपि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीमदर्हद्भट्टारकाणां जन्म-दीक्षा-ज्ञान मोक्षस्थानेषु ; तत्र जन्म-स्थानानि,—

[1]इक्खागुभूमि उज्झा सावत्थि विणीय कोसलपुरं च ।
कोसंबी वाणारसि चंदाणण तह य कायंदी ॥ १ ॥
भद्दिलपुरं सीहपुरं चंपा कंपिल्ल उज्झ रयणपुरं ।
तिन्नेव गयपुरम्मी मिहिला तह चेअ रायगिहं ॥ २ ॥
मिहिला सोरिअनयरं वाणारसि तहय चेअ कुंडपुरं ।
उसभाईण जिणाणं जम्मणभूमी जहासंखं ॥ ३ ॥

दीक्षास्थानानि,—

[2]उसभो अ विणीआए बारवईए अरिट्ठवरनेमी ।
अवसेसा तित्थयरा निक्खंता जम्मभूमीसु ॥ १ ॥
उसभो सिद्धत्थवणम्मि वासुपुज्जो विहारगिहगम्मि ।
धम्मो अ वप्पगाए नीलगुहाए मुणीनामो ॥ २ ॥

---

(१) इक्ष्वाकुभूमिरयोध्या श्रावस्ती विनीता कोशलपुरं च ।
कौशाम्बी वाणारसी चन्द्रानना तथा च काकन्दी ॥ १ ॥
भद्दिलपुरं सिंहपुरं चम्पा कम्पिलाऽयोध्या रत्नपुरम् ।
त्रयाणामपि गजपुरं मिथिला तथाचैव राजगृहम् ॥ २ ॥
मिथिला शौर्यनगरं वाणारसी तथैव कुण्डपुरम् ।
ऋषभादीनां जिनानां जन्मभूम्यो यथासंख्यम् ॥ ३ ॥

(२) ऋषभो विनीतायां द्वारवत्यामरिष्टवरनेमिः ।
अवशेषास्तीर्थकरा निष्क्रान्ता जन्मभूमीषु ॥ १ ॥
ऋषभः सिद्धार्थवने वासुपूज्यो विहारगृहके ।
धर्मश्च वप्रगायां नीलगुहायां मुनिनामा ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]आसमपयम्मि पासो वीरजिणिंदो अ नायसंडम्मि ।
अवसेसा निक्खंता सहसंबवणम्मि उज्जाणे ॥ ३ ॥

ज्ञानस्थानानि ;—

[2]उसभस्स पुरिमताले वीरस्सोज्जुवालिआनईतीरे ।
सेसाण केवलाइं जेसुज्जाणेसु पव्वइआ ॥ १ ॥

मोक्षस्थानानि ;—

[3]अट्ठावयचंपोज्जिलपावासंमेअसेलसिहरेसु ।
उसभ-वसुपुज्ज-नेमी वीरो सेसा य सिद्धिगया ॥ १ ॥

तदभावे जन्म-दीक्षा-ज्ञान-मोक्षस्थानप्राप्त्यभावे गृहे यतिवसत्यादौ, अरण्ये शत्रुञ्जयादिषु सिद्धिक्षेत्रेषु, तेष्वपि भुवं निरीक्ष्य प्रमृज्य च जन्तुविवर्जिते स्थण्डिले, इदं च जन्मादिस्थानेष्वपि द्रष्टव्यम् ॥१५०॥ त्यक्त्वा परित्यज्य चतुर्विधाहारमशन-पान-खाद्य-स्वाद्यरूपम्, नमस्कार: पञ्चपरमेष्ठिस्तव:, तत्परायणस्तदनुस्मरण-पर:, आराधना ज्ञानाद्याराधना तामतिचारपरिहारेण विधाय चतुर्णामर्हत्-सिद्ध-साधु-धर्माणां शरणं तेषु स्वात्मसमर्पणं चतु:-

---

(१) आश्रमपदे पार्श्वो वीरजिनेन्द्रश्च ज्ञातषण्डे ।
अवशेषा निष्क्रान्ता सहस्राम्रवण उद्याने ॥ ३ ॥

(२) ऋषभस्य पुरिमताले वीरस्यर्जुवालिकानदीतीरे ।
शेषाणां केवलानि येषूद्यानेषु प्रव्रजिता: ॥ १ ॥

(३) अष्टापद-चम्पोज्जयन्तपापासंमेतशैलशिखरेषु ।
ऋषभ-वासुपूज्य नेमयो वीर: शेषाश्च सिद्धिगता: ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शरणं तदाश्रितः, यदाहुः—'अरहंते सरणं पव्वज्जामि, सिद्धे सरणं पव्वज्जामि, साहू सरणं पव्वज्जामि, केवलिपन्नत्तं धम्मं सरणं पव्वज्जामि त्ति ॥१५१॥ आहारपरिहारप्रतिपत्तिश्च पञ्चविधातिचारपरिहारेण कार्या ; तदेवाह—इहलोके इहलोकविषये धनपूजा-कीर्त्यादिष्वाशंसा, परलोके परलोकविषये स्वर्गादावाशंसा, जीवितं प्राणधारणम्, तत्र पूजादिविशेषदर्शनात्, प्रभूतपरिवारावलोकनात्, सर्वलोकश्लाघाश्रवणाच्चैवं मन्यते जीवितमेव श्रेयः, प्रत्याख्यातचतुर्विधाहारस्यापि यत एवंविधा मदुद्देशेनेयं विभूतिर्वर्तत इत्याशंसा, मरणं प्राणत्यागः, तत्र यदा न कश्चित् तं प्रतिपन्नानशनं प्रति सपर्यया आद्रियते, न च कश्चित् श्लाघते, तदा तस्यैवंविधश्चित्तपरिणामो जायते, यदि शीघ्रं म्रिये इत्याशंसा, तां त्यक्त्वा, निदानं च 'अस्मात् तपसो दुरनुचराज्जन्मान्तरे चक्रवर्ती, वासुदेवः, महामण्डलेश्वरः, सुभगः, रूपवान् स्याम्' इत्यादिप्रार्थनां त्यक्त्वा, पुनः किंविशिष्टः ? समाधिसुधयोक्षितः समाधिः परमस्वास्थ्यं स एव सुधाऽमृतं तयोक्षितः सिक्तः ॥१५२॥ परीषहेभ्यो निर्भयो जितपरीषह इत्यर्थः, तत्र मार्गाच्यवन-निर्जरार्थं परिषह्यन्त इति परीषहाः, ते च द्वाविंशतिः, तद्यथा ;—क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याऽऽक्रोशवधयाञ्चाऽलाभरोगतृणस्पर्शमलसत्कारप्रज्ञाज्ञानदर्शनलक्षणाः, तेषां जयश्चैवम् ;—

(१) अर्हतः शरणं प्रपद्ये, सिद्धान् शरणं प्रपद्ये, साधून् शरणं प्रपद्ये, केवलिप्रज्ञप्तं धर्मं शरणं प्रपद्य इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षुदार्तः शक्तिमान् साधुरेषणां नातिलङ्घयेत् ।
अदीनो विह्वलो विद्वान् यात्रामात्रोद्यतश्चरेत् ॥ १ ॥
पिपासितः पथिस्थोऽपि तत्त्वविद् दैन्यवर्जितः ।
न शीतमुदकं वाञ्छेद्देषयेत् प्रासुकोदकम् ॥ २ ॥
बाध्यमानोऽपि शीतेन त्वग्-वस्त्र-त्राणवर्जितः ।
वासोऽकल्प्यं नाददीत ज्वलनं ज्वलयेद् न च ॥ ३ ॥
उष्णेन तप्तो नैवोष्णं निन्देच्छायां च न स्मरेत् ।
वीजनं मज्जनं गात्राभिषेकादि च वर्जयेत् ॥ ४ ॥
दष्टोऽपि दंशैर्मशकैः सर्वाहारप्रियत्ववित् ।
त्रासं द्वेषं निरासं न कुर्यात्, कुर्यादुपेक्षणम् ॥ ५ ॥
नास्ति वासोऽशुभं चैतद् तन्नेच्छेत् साध्वसाधु वा ।
नाग्न्येन विप्लुतो जानँल्लाभालाभविचित्रताम् ॥ ६ ॥
न कदाप्यरतिं कुर्याद् धर्मारामरतिर्यतिः ।
गच्छंस्तिष्ठंस्तथासीनः स्वास्थ्यमेव समाश्रयेत् ॥ ७ ॥
दुर्ध्यानसङ्गपङ्का हि मोक्षद्वारार्गलाः स्त्रियः ।
चिन्तिता धर्मनाशाय चिन्तयेदिति नैव ताः ॥ ८ ॥
ग्रामाद्यनियतस्थायी स्थानाबन्धविवर्जितः ।
चर्यामिकोऽपि कुर्वीत विविधाभिग्रहैर्युतः ॥ ९ ॥
श्मशानादौ निषद्यायां स्त्र्यादिकण्टकवर्जिते ।
इष्टानिष्टानुपसर्गान् निरीहो निर्भयः सहेत् ॥ १० ॥
शुभाशुभायां शय्यायां विषहेत सुखासुखे ।
राग-द्वेषौ न कुर्वीत प्रातस्त्याज्येति चिन्तयेत् ॥ ११ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आक्रुष्टोऽपि हि नाक्रोशेत् क्षमाश्रमणतां विदन् ।
प्रत्युताक्रोष्टरि यतिश्चिन्तयेदुपकारिताम् ॥ १२ ॥
सहेत हन्यमानोऽपि प्रतिहन्याद् मुनिर्न तु ।
जीवानाशात् क्रुधो दौष्ट्यात् क्षमया च गुणार्जनात् ॥१३॥
नायाचितं यतीनां यत् परदत्तोपजीविनाम् ।
याञ्चा दुःखं प्रतीच्छेत् तद् नेच्छेत् पुनरगारिताम् ॥ १४ ॥
परात् परार्थं स्वार्थं वा लभेतान्नादि नापि वा ।
माद्येद् न लाभाद् नालाभाद् निन्देत् स्वमथवा परम् ॥१५॥
उद्विजेत न रोगिभ्यो न च काङ्क्षेच्चिकित्सितम् ।
अदीनस्तु सहेद् देहाज्जानानो भेदमात्मनः ॥ १६ ॥
अभूताल्पाणुचेलत्वे संस्तृतेषु तृणादिषु ।
सहेत दुःखं तत्स्पर्शंभवमिच्छेद् न तान् मृदून् ॥ १७ ॥
ग्रीष्मातपपरिक्लिन्नात् सर्वाङ्गीणाद् मलाद् मुनिः ।
नोद्विजेत न सिस्नासेद् नोद्वर्तयेत्, सहेत तु ॥ १८ ॥
उत्थाने पूजने दाने न भवेदभिलाषुकः ।
असत्कारे न दीनः स्यात् सत्कारे स्यान्न हर्षवान् ॥ १९ ॥
प्रज्ञां प्रज्ञावतां पश्यन्नात्मन्यप्राज्ञतां विदन् ।
न विषीदेद् नवा माद्येत् प्रज्ञोत्कर्षमुपागतः ॥ २० ॥
ज्ञानचारित्रयुक्तोऽस्मि छद्मस्थोऽहं तथापि हि ।
इत्यज्ञानं विषहेत ज्ञानस्य क्रमलाभवित् ॥ २१ ॥
जिनास्तदुक्तं जीवो वा धर्माधर्मौ भवान्तरम् ।
परोक्षत्वाद् मृषा नैव चिन्तयेत् प्राप्तदर्शनः ॥ २२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शारीरमानसानेवं स्वपरप्रेरितान् मुनिः ।
परीषहान् सहेताभीर्वाक्कायमनसां वशी ॥ २३ ॥
ज्ञानावरणीये वेद्ये मोहनीयान्तराययोः ।
कर्मस्वृदयमाप्तेषु संभवन्ति परीषहाः ॥ २४ ॥
वेद्यात् स्यात् क्षुत् तृषा शीतमुष्णं दंशादयस्तथा ।
चर्या शय्या वधो रोगस्तृणस्पर्शमलावपि ॥ २५ ॥
प्रज्ञाज्ञाने तु विज्ञेयौ ज्ञानावरणसंभवौ ।
अन्तरायादलाभोऽमी छद्मस्थस्य चतुर्दश ॥ २६ ॥
क्षुत् पिपासा शीतमुष्णं दंशाश्चर्या वधो मलः ।
शय्या रोगस्तृणस्पर्शो जिने वेद्यस्य संभवात् ॥ २७ ॥

तथा, उपसर्गेभ्यो निर्भीकः, तत्रोप सामीप्येन उपसर्जना-दुपसृज्यत एभिरिति वा, उपसृज्यन्त इति वोपसर्गाः, ते च ;—

दिव्यमानुषतैरश्चात्मसंवेदनभेदतः ।
चतुष्प्रकाराः प्रत्येकमपि ते स्युश्चतुर्विधाः ॥ १ ॥
हास्याद् द्वेषाद् विमर्शाच्च तन्मिश्रत्वाच्च देवताः ।
हास्याद् द्वेषाद् विमर्शाद् दुःशीलसङ्गाच्च मानुषाः ॥ २ ॥
तैरश्चास्तु भयक्रोधाहारापत्यादिरक्षणात् ।
घट्टनस्तम्भनश्लेषप्रपातादात्मवेदनाः ॥ ३ ॥
यद्वा वात-पित्त-कफ-संनिपातोद्भवा अमी ।
परीषहोपसर्गाणामेषां सोढा भवेदभीः ॥ ४ ॥

जिनेष्वाराधनाकारिषु भक्तिभाक् बहुमानभाक्, 'जिनैरपि हि संसारपारावारपारीणैः पर्यन्ताराधनानुष्ठिता' इति बहुमानात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा च ;—

'निव्वाणमंतकिरिआ सा चोद्दसमेण पढमनाहस्स ।

सेसाण मासिएणं वीरजिणिंदस्स छट्ठेण ॥ १ ॥

एवंभूतः सन् मरणं समाधिमरणं प्रतिपद्येत, आनन्दश्रावको यथेति संप्रदायगम्यम् । स चायम् ;—

अस्त्यपास्तापरपुरं परमाभिर्विभूतिभिः ।

नाम्ना वाणिजकग्राम इति ख्यातं महापुरम् ॥ १ ॥

तत्र प्रजानां विधिवत् पितेव परिपालकः ।

जितशत्रुरिति ख्यातो बभूव पृथिवीपतिः ॥ २ ॥

आसीद् गृहपतिस्तस्मिन् नयनानन्दिदर्शनः ।

आनन्दो नाम मेदिन्यामायात इव चन्द्रमाः ॥ ३ ॥

सधर्मचारिणी तस्य रूपलावण्यहारिणी ।

बभूव शिवनन्देति शशाङ्कस्येव रोहिणी ॥ ४ ॥

निधौ वृद्धौ व्यवहारे चतस्रोऽस्य पृथक् पृथक् ।

हिरण्यकोटयोऽभूवंश्चत्वारश्च व्रजा गवाम् ॥ ५ ॥

तत्पुरादुत्तरप्राच्यां कोल्लाकाख्योपपत्तने ।

आनन्दस्यातिबहवो बन्धुसंबन्धिनोऽभवन् ॥ ६ ॥

तदा च पृथिवीं विहरन् जिनः सिद्धार्थनन्दनः ।

तत्पुरोपवने दूतिपलाशे समवासरत् ॥ ७ ॥

---

(१) निर्वाणमन्तक्रिया सा चतुर्दशेन प्रथमनाथस्य ।

शेषाणां मासिकेन वीरजिनेन्द्रस्य षष्ठेन ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जितशत्रुर्महीनाथस्त्रिजगन्नाथमागतम् ।
श्रुत्वा ससंभ्रमोऽगच्छद् वन्दितुं सपरिच्छदः ॥ ८ ॥
आनन्दोऽपि ययौ पद्भ्यां पादमूले जगत्पतेः ।
कर्णपीयूषगण्डूषकल्पां शुश्राव देशनाम् ॥ ९ ॥
अथानन्दः प्रणम्यांह्री त्रिजगत्स्वामिनः पुरः ।
जग्राह द्वादशविधं गृहिधर्मं महामनाः ॥ १० ॥
शिवनन्दामन्तरेण स्त्रीः स तत्याज हेम तु ।
चतस्रश्चतस्रः स्वर्णकोटीर्निध्यादिगा विना ॥ ११ ॥
प्रत्याचख्यौ व्रजानेष ऋते च चतुरो व्रजान् ।
क्षेत्रत्यागं च विदधे हलपञ्चशतीं विना ॥ १२ ॥
शकटान् वर्जयामास पञ्च पञ्च शतान्यृते ।
दिग्यात्राव्यापृतानां च वहतां चानसाममौ ॥ १३ ॥
दिग्यात्रिकाणि चत्वारि स सांवहनिकानि च ।
विहाय वहनान्यन्यवहनानि व्यवर्जयत् ॥ १४ ॥
अपरं गन्धकाषाय्याः स तत्याजाङ्गपुंसनम् ।
दन्तधावनमार्द्रीया मधुयष्टेरृते जहौ ॥ १५ ॥
वर्जयामास च क्षीरामलकादपरं फलम् ।
अभ्यङ्गं च विना तैले सहस्रशतपाकिमे ॥ १६ ॥
अन्यत् सुरभिगन्धाढ्यादुद्वर्तनकमत्यजत् ।
अष्टभ्य औष्ट्रिकपयस्कुम्भेभ्योऽन्यच्च मज्जनम् ॥ १७ ॥
अपरं क्षौमयुगलाद् वासः सर्वमवर्जयत् ।
श्रीखण्डागुरुघुसृणान्यपास्यान्यद् विलेपनम् ॥ १८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋते च मालतीमाल्यात् पद्माच्च कुसुमं जहौ ।
कर्णिकानाममुद्राभ्यामन्यच्चाशेषभूषणम् ॥ १९ ॥
तुरुष्कागुरुधूपेभ्य ऋते धूपविधिं जहौ ।
घृतपूरात् खण्डखाद्यादपरं भक्ष्यमत्यजत् ॥ २० ॥
काष्ठपेयां विना पेयां कलमादन्यदोदनम् ।
माषमुद्गकलायेभ्य ऋते सूपमपाकरोत् ॥ २१ ॥
घृतं च वर्जयामास विना शारदगोघृतात् ।
शाकं स्वस्तिकमण्डूकीं पालक्यां च विना जहौ ॥ २२ ॥
ऋते स्नेहाम्लदाल्यम्लात् तीमनं चाम्बु खाम्बुनः ।
पञ्चसुगन्धिताम्बूलाद् मुखवासं च सोऽमुचत् ॥ २३ ॥
आनन्दः शिवनन्दाया उपेत्याथ ससंमदः ।
अशेषं कथयामास गृहिधर्मं प्रतिश्रुतम् ॥ २४ ॥
शिवाय शिवनन्दापि यानमारुह्य तत्क्षणम् ।
भगवत्पादमूलेऽगाद् गृहिधर्मार्थिनी ततः ॥ २५ ॥
तत्र प्रणम्य चरणौ जगत्त्रयगुरोः पुरः ।
प्रपेदे शिवनन्दापि गृहिधर्मं समाहिता ॥ २६ ॥
अभिरुह्य ततो यानं विमानमिव भासुरम् ।
भगवद्वाक्सुधापानमुदिता सा गृहं ययौ ॥ २७ ॥
अथ प्रणम्य सर्वज्ञमिति पप्रच्छ गौतमः ।
महात्मायं किमानन्दो यतिधर्मं ग्रहीष्यति ? ॥ २८ ॥
त्रिकालदर्शी भगवान् कथयामासिवानिति ।
श्रावकव्रतमानन्दः सुचिरं पालयिष्यति ॥ २९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः सौधर्मकल्पेऽसौ विमाने चारुणप्रभे ।
भविष्यत्यमरवरश्चतुष्पल्योपमस्थितिः ॥ ३० ॥
सततं जागरूकस्य द्वादशव्रतपालने ।
आनन्दस्य ततोऽतीयुर्हायनानि चतुर्दश ॥ ३१ ॥
निशान्ते चिन्तयामास सोऽन्येद्युरिति शुद्धधीः ।
आश्रयः श्रीमतामस्मि भूयसामिह पत्तने ॥ ३२ ॥
विक्षिप्तश्चिन्तया तेषां मा स्म स्खलमहं क्वचित् ।
अङ्गीकृतेऽस्मिन् सर्वज्ञप्रज्ञप्ते धर्मकर्मणि ॥ ३३ ॥
ततो मनसिकृत्यैवं प्रातरुत्थाय कृत्यवित् ।
कोल्लाके पोषधशालां सुविशालामचीकरत् ॥ ३४ ॥
निमन्त्र्य मित्रसंबन्धिबान्धवादीनसावथ ।
भोजयित्वाऽखिलं ज्येष्ठे भारं पुत्रेऽध्यरोपयत् ॥ ३५ ॥
ततश्च पुत्रमित्रादीन् सर्वानप्यनुमान्य सः ।
ययौ पौषधशालायां धर्मकर्मविधित्सया ॥ ३६ ॥
तस्थौ तत्र महात्मासौ कर्मेव कृशयन् वपुः ।
धर्मं भगवदादिष्टमात्मानमिव पालयन् ॥ ३७ ॥
निःश्रेणिकल्पां स्वर्गापवर्गसौधाधिरोहणे ।
श्रावकप्रतिमापङ्क्तिमारुरोह क्रमेण सः ॥ ३८ ॥
तपसा तेन तीव्रेण शुष्कासृक्पिशिताङ्गकः ।
चर्मवेष्टितयष्ट्याभो महासत्त्वो बभूव सः ॥ ३९ ॥
धर्मजागर्यया जाग्रन्निशीथसमयेऽन्यदा ।
अभग्नस्तपसानन्दश्चेतस्येवमचिन्तयत् ॥ ४० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यावदुत्थातुमीशोऽस्मि शब्दायितुमपीश्वरः ।
धर्माचार्यश्च भगवान् यावद् विहरते मम ॥ ४१ ॥
संलेखनामुभयथापि कृत्वा मारणान्तिकीम् ।
तावच्चतुर्विधाहारप्रत्याख्यानं करोम्यहम् ॥ ४२ ॥
चिन्तयित्वैवमानन्दस्तथैव विदधेऽपि च ।
विसंवदति चिन्तायाश्चेष्टितं न महात्मनाम् ॥ ४३ ॥
निराकाङ्क्षस्य कालेऽपि समत्वाध्यवसायिनः ।
तस्य जज्ञेऽवधिज्ञानं तदावरणशुद्धितः ॥ ४४ ॥
तत्राजगाम भगवान् श्रीवीरो विहरंस्तदा ।
दूतिपलाशे समवासरच्चक्रे च देशनाम् ॥ ४५ ॥
गौतमश्च तदा भिक्षाचर्यया प्राविशत् पुरे ।
आत्तान्नपानः कोल्लाके ययावानन्दभूषिते ॥ ४६ ॥
मिलितं तत्र भूयांसं लोकं संजातविस्मयम् ।
ईक्षाञ्चक्रे गणधरोऽन्योन्यमित्यभिभाषिणम् ॥ ४७ ॥
शिष्यो जगद्गुरोर्वीरस्यानन्दो नाम पुण्यधीः ।
प्रपन्नानशनोऽस्तीह निरीहः सर्वथापि हि ॥ ४८ ॥
गौतमस्तु तदाकर्ण्य पश्याम्यमुमुपासकम् ।
इति बुद्ध्या जगामाथ तत्पौषधनिकेतनम् ॥ ४९ ॥
अकस्माद् रत्नवृष्ट्याभं तमचिन्तितमागतम् ।
दृष्ट्वा सानन्दमानन्दोऽवन्दतैवमुवाच च ॥ ५० ॥
भगवन् ! तपसाऽनेन क्लिष्टमुत्थातुमक्षमः ।
इहैवानभियोगेन यथा पादौ स्पृशामि ते ॥ ५१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपेत्य पुरतस्तस्य तस्थुषोऽस्य महामुनिः ।
अवन्दत त्रिधानन्दश्चरणौ शिरसा स्पृशन् ॥ ५२ ॥
किं भवत्यवधिज्ञानं भगवन्! गृहमेधिनः ? ।
इत्यानन्देन पृष्टः सन्नामित्यूचे महामुनिः ॥ ५३ ॥
आनन्दोऽथावदत् स्वामिन्! तर्हि मे गृहमेधिनः ।
अवधिज्ञानमुत्पेदे गुरुपादप्रसादतः ॥ ५४ ॥
आपं च योजनशतीं पूर्वाब्धौ दक्षिणोदधौ ।
पश्चिमाब्धौ च वीक्षेऽहमुदीच्यां त्वा हिमाचलात् ॥ ५५ ॥
ऊर्ध्वं सौधर्मकल्पादा पश्यामि भगवन्नहम् ।
अधो रत्नप्रभायास्तु पृथ्व्या आ लोलुपाद् वनात् ॥ ५६ ॥
मुनिरूचेऽवधिज्ञानं जायते गृहमेधिनः ।
न त्वियन्मात्रविषयं स्थानस्यालोचयास्य तत् ॥ ५७ ॥
आनन्दोऽप्यब्रवीदेतदस्ति मे तत्, सतामपि ।
भावानामभिधाने किं भवेदालोचना क्वचित् ? ॥ ५८ ॥
भवेदालोचना नो चेद् ननु तद् यूयमेव हि ।
आलोचनामाददीध्वं स्थानस्यामुष्य संप्रति ॥ ५९ ॥
आनन्देनेत्यभिहिते साशङ्को गौतमस्ततः ।
ययौ श्रीवीरपादान्ते भक्तपानाद्यदर्शयत् ॥ ६० ॥
आनन्दस्यावधिज्ञानमानविप्रतिपत्तिजम् ।
वादं चावेदयाञ्चक्रे गौतमस्तं जगद्गुरोः ॥ ६१ ॥
आलोचनीयं तदिह किमानन्देन किं मया ? ।
गौतमेनेति विज्ञप्ते भवतीत्यादिशत् प्रभुः ॥ ६२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथैव प्रतिपेदे तद् विदधे च तथैव सः ।
क्षमयामास चानन्दं क्षमिणं क्षमिणां वरः ॥ ६३ ॥
वर्षाणि विंशतिमिति प्रतिपाल्य धर्म-
मानन्द आसददथानशनेन मृत्युम् ।
जज्ञे सुरोऽरुणविमा[1]नवरे विदेहे-
षूत्पद्य यास्यति पदं परमं ततश्च ॥६४॥१५३॥

॥ इति आनन्दश्राद्धकथानकम् ॥

अथ प्रकृतस्य श्रावकस्योत्तरां गतिं श्लोकद्वयेनाह—

प्राप्तः स कल्पेष्विन्द्रत्वमन्यद्वा स्थानमुत्तमम् ।
मोदतेऽनुत्तरप्राज्यपुण्यसंभारभाक् ततः ॥१५४॥
च्युत्वोत्पद्य मनुष्येषु भुक्त्वा भोगान् सुदुर्लभान् ।
विरक्तो मुक्तिमाप्नोति शुद्धात्मान्तर्भवाष्टकम् ॥१५५॥

व्याख्या—स श्रावको यथोक्तश्रावकधर्मपरिपालनात् कल्पेषु सौधर्मादिषु, सम्यग्दृष्टीनामन्यत्रोत्पादाभावात्, इन्द्रत्वं शक्रत्वम्, अन्यद् वा सामानिक-त्रायस्त्रिंश-पारिषद्य-लोकपालादिसंबन्धि स्थानं पदं प्राप्तः, उत्तममित्याभियोग्यादिस्थानव्यवच्छेदार्थम्, तत्रोत्पन्नश्च मोदते प्राप्तरत्नविमानमहोद्यानमज्जनवापीविचित्ररत्न-वस्त्राभरणः सुरसुन्दरीचामरव्यजनव्याजवार्यमाणमौलि-मन्दार-

---

(१) ड थ-नश्वरो।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माल्यमधुकरोऽहमहमिकासेवासमायातत्रिदशकोटीचाटुकारजय-जयध्वनिप्रतिध्वनितनभोङ्गणो मनोमात्रपरिश्रमसंमिलितसकल-वैषयिकसुखलालितो नानासिद्धायतनयात्रासमुत्पन्नहर्षप्रकर्षः सन् प्रमोदभाग् भवति । अथ हेतुमाह — अनुत्तरा अनन्यसाधारणाः प्राज्या बहवो ये पुण्यसंभारास्तान् भजते तद्भाक् ॥ १५४ ॥ ततः कल्पेभ्यश्च्युत्वा मनुष्यायुर्निबन्धेन च्यवनमनुभूय मनुष्येषु विशिष्ट-देशजातिकुलबलैश्वर्यरूपवत्सूत्पद्यौदारिकशरीरत्वेन जन्म लब्ध्वा, भुक्त्वाऽनुभूय भोगान् शब्द-रूप-रस-गन्ध-स्पर्शलक्षणानकृतपुण्यैरति-शयेन दुर्लभान्, यत् 'किञ्चिद् निमित्तमवाप्य सांसारिकेभ्यः सुखेभ्यो विरक्तो वैराग्यस्यैव परमप्रकर्षयोगेन सर्वविरतिं प्रतिपद्य तत्रैव जन्मनि क्षपकश्रेण्याक्रमणक्रमेण केवलज्ञानमुत्पाद्य निःशेष-कर्मनिर्मूलनेन शुद्धात्मा मुक्तिमाप्नोति । अथ न तत्रैव जन्मनि मुक्तिस्तदा कियत्सु जन्मान्तरेषु मुक्तिः स्यादित्याह — 'अन्तर्भवा-ष्टकम्' इति भवाष्टकाभ्यन्तर इत्यर्थः ॥ १५५ ॥

प्रकाशत्रयोक्तमर्थमुपसंहरति —

इति संक्षेपतः सम्यग्रत्नत्रयमुदीरितम् ।
सर्वोऽपि यदनासाद्य नासादयति निर्वृतिम् ॥१५६॥

इति प्रकाशत्रयेण रत्नत्रयं ज्ञानदर्शनचारित्रात्मकं योगत्वेन प्रत्याख्यातमुदीरितं कथितम् । कथम् ? सम्यग् जिनागमाविरोधेन । विस्तरस्यासर्वविदा वक्तुमशक्यत्वादाह — संक्षेपतः । रत्नत्रयं विना-

---

(१) डथ किञ्चन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽन्यतोऽपि कारणाद् निर्वाणप्राप्तिं शङ्कमानं प्रत्याह—सर्वोऽपि, आस्तां कश्चिदेकः, यद् रत्नत्रयमनासाद्य काकतालीयेनापि न्यायेन नाप्नोति निर्वृतिं मोक्षम्। न ह्यज्ञाततत्त्वोऽश्रद्दधानो नवं कर्म निबध्नन् पूर्वोपात्तानि कर्माणि शुक्लध्यानबलेनाक्षपयन् संसार-बन्धनाद् मुक्तिमाप्नोतीति सर्वं समञ्जसम् ॥ १५६ ॥

॥ इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्य-श्रीहेमचन्द्रविरचितेऽध्यात्मोपनिषन्नाम्नि संजातपट्टबन्धे श्रीयोगशास्त्रे स्वोपज्ञं तृतीयप्रकाशविवरणम् ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ अर्हम् ॥

अथ चतुर्थः प्रकाशः ।

—ः*ः—

धर्मधर्मिणोर्भेदनयमधिकृत्यात्मनो रत्नत्रयं मुक्तिकारणत्वेनोक्तम् । इदानीमभेदनयाश्रयेणात्मनो रत्नत्रयेणैकत्वमाह—

आत्मैव दर्शनज्ञानचारित्राण्यथवा यतेः ।
यत्तदात्मक एवैष शरीरमधितिष्ठति ॥ १ ॥

अथवेति भेदनयापेक्षया प्रकारान्तरस्याभेदनयस्य प्रकाशनार्थम् । आत्मैव न ततो भिन्नानि दर्शनज्ञानचारित्राणि । यतेरिति संबन्धिपदम् । अत्रोपपत्तिमाह—यद् यस्मात् तदात्मक एव दर्शन-ज्ञान-चारित्रात्मक एव तदभेदमापन्न एवैष आत्मा शरीरमधितिष्ठति । आत्मभिन्नानां हि दर्शनादीनां नात्मनि मुक्तिहेतुत्वं स्यात्, देवदत्तसंबन्धिनामिव यज्ञदत्ते ॥ १ ॥

अभेदमेव समर्थयितुमाह—

आत्मानमात्मना वेत्ति मोहत्यागाद्य आत्मनि ।
तदेव तस्य चारित्रं तज्ज्ञानं तच्च दर्शनम् ॥ २ ॥

आत्मानं कर्मतापन्नमात्मन्याधारभूते आत्मना स्वयमेव यो वेत्ति जानीते । एतच्च ज्ञानं न मूढानां भवतीत्याह—मोह-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यागात्। तदेवात्मज्ञानमेव तस्यात्मनश्चारित्रम्, अनास्रवरूपत्वात्; तज्ज्ञानं तदेव ज्ञानम्, बोधरूपत्वात्; तच्च दर्शनं तदेव दर्शनम्, श्रद्धानरूपत्वात् ॥ २ ॥

आत्मज्ञानमेव स्तौति—

आत्माज्ञानभवं दुःखमात्मज्ञानेन हन्यते ।
तपसाप्यात्मविज्ञानहीनैश्छेत्तुं न शक्यते ॥ ३ ॥

इह सर्वं दुःखमनात्मविदां भवति, तदात्माज्ञानभवं प्रतिपक्षभूतेनात्मज्ञानेन शाम्यति क्षयमुपयाति तम इव प्रकाशेन। ननु कर्मक्षयहेतुः प्रधानं तप उक्तम्, यदाहुः,—[1]पुव्विं दुच्चिन्नाणं दुप्पडिक्कंताणं कडाणं कम्माणं वेअइत्ता मोक्खो नत्थि अवेयइत्ता तवसा वा झोसइत्ता इत्याह,—तपसापि आस्तामन्येनानुष्ठानेन तदात्माज्ञानभवं दुःखमात्मविज्ञानहीनैर्न च्छेत्तुं शक्यते, ज्ञानमन्तरेण तपसोऽल्पफलत्वात्, यदाह ;—

[2]जं अन्नाणी कम्मं खवेइ बहुआहिं वासकोडीहिं।
तं णाणी तिहिं गुत्तो खवेइ ऊसासमित्तेण ॥ १ ॥

तत् स्थितमेतत्—बाह्यविषयव्यामोहमपहाय रत्नत्रयसर्वस्वभूते आत्मज्ञाने प्रयतितव्यम्, यदाहुर्बाह्या अपि—आत्मा रे श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति। आत्मज्ञानं च

---

(१) पूर्वं दुश्चरितानां दुष्प्रतिक्रान्तानां कृतानां कर्मणां वेदयित्वा मोक्षो नास्त्यवेदयित्वा तपसा वा क्षपयित्वा।

(२) यदज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटिभिः।
तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नात्मनः कर्मभूतस्य पृथक् किञ्चित्, अपि त्वात्मनश्चिद्रूपस्य स्वसंवेदनमेव मृग्यते, नातोऽन्यदात्मज्ञानं नाम, एवं दर्शनचारित्रे अपि नात्मनो भिन्ने। एवं च चिद्रूपोऽयं ज्ञानाद्याख्याभिरभिधीयते। ननु विषयान्तरव्युदासेन किमित्यात्मज्ञानमेव मृग्यते, विषयान्तरज्ञानमेव ह्यज्ञानरूपं दुःखं छिन्द्यात्। नैवम्, सर्वविषयेभ्य आत्मन एव प्रधानत्वात्, तस्यैव कर्मनिबन्धनशरीरपरिग्रहे दुःखितत्वात्, कर्मक्षये च सिद्धस्वरूपत्वात् ॥ ३ ॥

एतदेवाह---

अयमात्मैव चिद्रूपः शरीरी कर्मयोगतः ।
ध्यानाग्निदग्धकर्मा तु सिद्धात्मा स्यान्निरञ्जनः ॥ ४ ॥

अयमिति सकलप्रमाणप्रतिष्ठितश्चिद्रूपश्चेतनस्वभावः, उपयोगलक्षणत्वाज्जीवस्य ; तथा, स एव शरीरी भवति, कर्मयोगात्, न त्वन्ये विषयाः ; तेन न विषयान्तरज्ञानं मृग्यते। आत्मैव च शुक्लध्यानाग्निदग्धकर्माऽशरीरः सन् मुक्तस्वरूपो भवति निरञ्जनो निर्मलः। अतोऽपि कारणादात्मज्ञानं मृग्यते ॥ ४ ॥

तथा—

अयमात्मैव संसारः कषायेन्द्रियनिर्जितः ।
तमेव तद्विजेतारं मोक्षमाहुर्मनीषिणः ॥ ५ ॥

'अयमात्मैव' इति पूर्ववत्। संसारो नारक-तिर्यग्-नरा-ऽमररूपतया। किंविशिष्टः सन्? कषायेन्द्रियनिर्जितः कषाये-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रिन्द्रियैश्च पराभूतः। तमेव चात्मानं तद्विजेतारं कषायेन्द्रियजेतारं मोक्षमाहुः। न हि स्वरूपलाभादन्यो मोक्षः। याऽप्यानन्दरूपता सापि स्वरूपलाभरूपैव। तस्मादात्मज्ञानमुपासनीयम्, दर्शन-चारित्रादेरत एव सिद्धेरिति ॥ ५ ॥

'कषायेन्द्रियनिर्जितः' इत्युक्तम्, तत्र कषायान् विवृणोति—

स्युः कषायाः क्रोधमानमायालोभाः शरीरिणाम्।
चतुर्विधास्ते प्रत्येकं भेदैः संज्वलनादिभिः ॥ ६ ॥

क्रोधमानमायालोभाः कषायशब्दवाच्या भवन्ति कष्यन्ते हिंस्यन्ते प्राणिनोऽस्मिन्ननेनेति वा, कषः संसारः कर्म वा तस्यायाः लाभाः प्राप्तय इति कृत्वा, अथवा, कषं संसारमयन्त एभिरिति कृत्वा। ते च शरीरिणां संसारिणां न तु मुक्तानाम्। ते च क्रोधादयः प्रत्येकं चतुर्विधाश्चतुष्प्रकाराः संज्वलनादिभिर्भेदैः। तत्र क्रोधः संज्वलनः, प्रत्याख्यानावरणः, अप्रत्याख्यानावरणः, अनन्तानुबन्धी च। एवं मानः, माया, लोभश्चेति ॥ ६ ॥

संज्वलनादीनां लक्षणमाह—

पक्षं संज्वलनः प्रत्याख्यानो मासचतुष्टयम्।
अप्रत्याख्यानको वर्षं जन्मानन्तानुबन्धकः ॥ ७ ॥

पक्षं मासार्धमभिव्याप्य संज्वलनः क्रोधो मानो माया लोभश्च भवति। संज्वलन इति तृणाग्निवदीषज्ज्वलनात्मकः, परीषहादिसंपाते सपदि ज्वलनात्मको वा। प्रत्याख्यानो भीमो भीमसेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति न्यायेन प्रत्याख्यानावरणः प्रत्याख्यानं सर्वविरतिमावृणोतीति कृत्वा । स मासचतुष्टयमभिव्याप्य भवति । अप्रत्याख्यानोऽप्रत्याख्यानावरणः, नञोऽल्पार्थत्वादल्पमपि प्रत्याख्यानमावृणोतीति कृत्वा । स वर्षं संवत्सरमभिव्याप्य भवति । अनन्तं भवमनुबध्नातीत्यनन्तानुबन्धकः, मिथ्यात्वसहचरितत्वादस्यानन्तभवानुबन्धित्वम् । स जन्म जीवितकालमभिव्याप्य भवति । प्रसन्नचन्द्रादेः क्षणमात्रस्थितीनामपि कषायाणामनन्तानुबन्धित्वम्, अन्यथा नरकयोग्यकर्मोपार्जनाभावात् ॥ ७ ॥

इति कालनियमकृतं संज्वलनादिलक्षणेऽपरितुष्यँल्लक्षणान्तरमाह—

वीतरागयतिश्राद्धसम्यग्दृष्टित्वघातकाः ।
ते देवत्वमनुष्यत्वतिर्यक्त्वनरकप्रदाः ॥ ८ ॥

त्वशब्दः प्रत्येकमपि संबध्यते, तेन वीतरागत्वस्य, यतित्वस्य, श्रावकत्वस्य, सम्यग्दृष्टित्वस्य च क्रमेण घातकाः, तथाहि—संज्वलनोदये यतित्वं भवति न पुनर्वीतरागत्वम्; प्रत्याख्यानावरणोदये श्रावकत्वं भवति न पुनर्यतित्वम्; अप्रत्याख्यानावरणोदये सम्यग्दृष्टित्वं भवति न पुनः श्रावकत्वम्; अनन्तानुबन्ध्युदये सम्यग्दृष्टित्वं न भवति । एवं वीतरागत्वघातकत्वं संज्वलनस्य, यतित्वघातकत्वं प्रत्याख्यानावरणस्य, श्रावकत्वघातकत्वमप्रत्याख्यानावरणस्य, सम्यग्दृष्टित्वघातकत्वमनन्तानुबन्धिनः स्थितं लक्षणं भवति । उत्तरार्धेनामीषां फलदायकत्वमाह—ते संज्वल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नादयो देवत्वादिफलदायकाः; तथाहि—संज्वलनाः क्रोधादयो देवगतिम्, प्रत्याख्यानावरणा मनुष्यगतिम्, अप्रत्याख्यानावरणास्तिर्यग्गतिम्, अनन्तानुबन्धिनो नरकगतिं प्रयच्छन्तीति। एतेषां च संज्वलनादिभेदानां चतुर्णां कषायाणां स्पष्टदृष्टान्तकथनेन स्वरूपमुच्यते—जलराजि-रेणुराजि-पृथिवीराजि-पर्वतराजिसदृशाः क्रोधाः संज्वलनादिभेदाः, तिनिशलता-काष्ठा-ऽस्थि-शैलस्तम्भसदृशाश्चत्वारो मानाः, अवलेखन-गोमूत्रिका-मेषशृङ्ग-वंशिमूलसमाश्चतस्रो मायाः, हरिद्रा-खञ्जन-कर्दम-कृमिरागसदृशाश्चत्वारो लोभाः, यदाह —

'जलरेणुपुढविपव्वयराईसरिसो चउव्विहो कोहो।
तिनिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो ॥ १ ॥
मायावलेहगोमुत्तिमिंढसिंगघणवंसिमूलसमा।
लोहो हलिद्दखंजणकद्दमकिमिरागसारिच्छो ॥२॥इति॥८॥

अथ कषायाणां जेतव्यत्वमुपदर्शयितुं दोषानाह—

तत्रोपतापकः क्रोधः क्रोधो वैरस्य कारणम्।
दुर्गतेर्वर्तनी क्रोधः क्रोधः शमसुखार्गला ॥ ९ ॥

तत्रेति तेषु कषायेषु क्रोधः प्रथमकषाय उपतापयति शरीर-

---

(१) जलरेणुपृथ्वीपर्वतराजिसदृशश्चतुर्विधः क्रोधः।
तिनिशलताकाष्ठास्थिकशैलस्तम्भोपमो मानः ॥ १ ॥
मायावलेखगोमूत्रिकामेढकशृङ्गघनवंशिमूलसमा।
लोभो हारिद्राखञ्जनकर्दमकृमिरागसदृशः ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनसो ह्युपतापकः, तथा, वैरस्य परस्परोपघातात्मनो विरोधस्य सुभूम-परशुरामयोरिव कारणम्, तथा, दुर्गतेर्नरकलक्षणायास्तयो-रिव वर्तनी मार्गः क्रोधः ; तथा, शमसुखस्य प्रशमानन्दस्यात्मनि प्रविशतोऽर्गलेवार्गला, तदुपरोधकारित्वात् । पुनः पुनः क्रोधग्रहणं तस्यातिदौष्ट्यज्ञापनार्थम् ॥ ९ ॥

स्व-परोपतापकारित्वेऽपि क्रोधस्य कृशानुदृष्टान्तेन स्वोप-तापकत्वं समर्थयते,—

उत्पद्यमानः प्रथमं दहत्येव स्वमाश्रयम् ।
क्रोधः कृशानुवत्पश्चादन्यं दहति वा नवा ॥ १० ॥

तथाविधकारणसंपाते उत्पद्यमानः क्रोधः कृशानुवत् स्वं स्वकीयमाश्रयं, यत्र स उत्पद्यते तं, नियमेन दहति, पश्चात् कृशानुवदेवान्यं दाह्यान्तरं दहति वा नवा, परस्य क्षमाशील-त्वादिना सार्द्रद्रुमादिवत् दग्धुमशक्यत्वात् ।

अत्रान्तरश्लोकाः,—

अर्जितं पूर्वकोट्या यद् वर्षैरष्टभिरूनया ।
तपस्तत् तत्क्षणादेव दहति क्रोधपावकः ॥ १ ॥
शमरूपं पयः प्राज्यपुण्यसंभारसंचितम् ।
अमर्षविषसंपर्कादसेव्यं तत्क्षणाद् भवेद् ॥ २ ॥
चारित्रचित्ररचनां विचित्रगुणधारिणीम् ।
समुत्सर्पन् क्रोधधूमो श्यामलीकुरुतेतराम् ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यो वैराग्यशमीपत्रपुटैः समरसोऽर्जितः ।
शाकपत्रपुटाभेन क्रोधेनोत्सृज्यते स किम् ? ॥ ४ ॥
प्रवर्धमानः क्रोधोऽयं किमकार्यं करोति न ? ।
जज्ञे हि द्वारका द्वैपायनक्रोधानले समित् ॥ ५ ॥
क्रुध्यतः कार्यसिद्धिर्या न सा क्रोधनिबन्धना ।
जन्मान्तरार्जितोर्जस्विकर्मणः खलु तत्फलम् ॥ ६ ॥
स्वस्य लोकद्वयोच्छित्त्यै नाशाय स्वपरार्थयोः ।
धिगहो ! दधति क्रोधं शरीरेषु शरीरिणः ॥ ७ ॥
क्रोधान्धाः पश्य निघ्नन्ति पितरं मातरं गुरुम् ।
सुहृदं सोदरं दारानात्मानमपि निर्घृणाः ॥८॥१०॥

क्रोधस्य स्वरूपमुक्त्वा तज्जयोपायमुपदिशति—

क्रोधवह्नेस्तदह्नाय शमनाय शुभात्मभिः ।
श्रयणीया क्षमैकैव संयमारामसारणिः ॥ ११ ॥

यस्मात् क्रोध एवंविधस्तस्मात् क्रोधवह्नेरह्नाय झटिति शमनाय शान्तये शुभात्मभिः पुण्यात्मभिः, अह्नायग्रहणं झटिति क्रोधोपशमोपदेशार्थम्, क्रोधो हि प्रथममेवाप्रतिहतः सन् विवर्धमानो दवानल इव पश्चात् निवारयितुमशक्यः, यदाह—

[१]अणथोवं वणथोवं अग्गिथोवं कसायथोवं च ।
न हु भे वीससियव्वं थोवं पि हु तं बहुं होई ॥ १ ॥

---

(१) ऋणस्तोकं वनस्तोकमग्निस्तोकं कषायस्तोकं च ।
न खलु भवता विश्वसितव्यं स्तोकमपि तद् बहु भवति ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रयणीया आश्रयितव्या एकैव क्षमा। न हि क्षमामन्तरेण क्रोधोपशमोपायो जगत्यस्ति, क्रोधफलसंप्रदानं तु वैरहेतुत्वेन प्रत्युत क्रोधवृद्धिहेतुः, न तु तत्प्रशमाय इत्येकग्रहणम्। क्षमां विशिनष्टि—संयमारामसारणिः संयम एव नवनवानां संयमस्थानानां तरूणामारोपहेतुत्वेन तद्वृद्धिहेतुत्वेन चारामो विचित्रतरुसमूहात्मकस्तस्य सारणिः कुल्या संयमारामवृद्धिहेतुतया पुष्पफलप्राप्तिहेतुतया च। क्षमा हि प्रशान्तवाहितारूपा चित्तपरिणतिः सा सारणित्वेन रूपिता, नवनवप्रशमपरम्पराप्रवाहरूपत्वात्।

अत्रान्तरश्लोकाः—

अपकारिजने कोपो निरोद्धुं शक्यते कथम्।
शक्यते सत्त्वमाहात्म्यात् यद्वा भावनयाऽनया ॥ १ ॥
अङ्गीकृत्यात्मनः पापं यो मां बाधितुमिच्छति।
स्वकर्मनिहितायास्मै कः कुप्येद् बालिशोऽपि सन् ॥ २ ॥
प्रकुप्याम्यपकारिभ्य इति चेदाशयस्तव।
तत् किं न कुप्यसि स्वस्य कर्मणे दुःखहेतवे ॥ ३ ॥
उपेक्ष्य लोष्टक्षेप्तारं लोष्टं दशति मण्डलः।
मृगारिः शरमाप्रेक्ष्य शरक्षेप्तारमिच्छति ॥ ४ ॥
यैः परः प्रेरितः क्रूरैर्मह्यं कुप्यति कर्मभिः।
तान्युपेक्ष्य परे क्रुध्यन् किं श्रये भषणश्रियम् ॥ ५ ॥
श्रूयते श्रीमहावीरः क्षान्त्यै म्लेच्छेषु जग्मिवान्।
अयत्नेनागतां क्षान्तिं वोढुं किमिव नेच्छसि ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रैलोक्यप्रलयत्राणक्षमाश्चेदाश्रिताः क्षमाम् ।
कदलीतुल्यसत्त्वस्य क्षमा तव न किं क्षमा ? ॥ ७ ॥
तथा किं नाकृथाः पुण्यं यथा कोऽपि न बाधते ? ।
स्वप्रमादमिदानीं तु शोचन्नङ्गीकुरु क्षमाम् ॥ ८ ॥
क्रोधान्धस्य मुनेश्चण्डचण्डालस्य च नान्तरम् ।
तस्मात् क्रोधं परित्यज्य भजोज्ज्वलधियां पदम् ॥ ९ ॥
महर्षिः क्रोधसंयुक्तो निष्क्रोधः कूरगड्डुकः ।
ऋषिं मुक्त्वा देवताभिर्ववन्दे कूरगड्डुकः ॥ १० ॥
अरुन्तुदैर्वचःशस्त्रैस्तुद्यमानो विचिन्तयेत् ।
चेत् तथ्यमेतत् कः कोपोऽथ मिथ्योन्मत्तभाषितम् ॥ ११ ॥
वधायोपस्थितेऽन्यस्मिन् हसेद् विस्मितमानसः ।
वधे मत्कर्मसंसाध्ये वृथा नृत्यति बालिशः ॥ १२ ॥
निहन्तुमुद्यते ध्यायेदायुषः क्षय एष नः ।
तदसौ निर्भयः पापात् करोति मृतमारणम् ॥ १३ ॥
सर्वपुरुषार्थचौरे कोपे कोपो न चेत् तव ।
धिक् त्वां स्वल्पापराधेऽपि परे कोपपरायणम् ॥ १४ ॥

सर्वेन्द्रियग्लानिकरं विजेतुं
कोपं प्रसर्पन्तमिवोग्रसर्पम् ।
विद्यां सुधीर्जाङ्गुलिकीमिवान-
वद्यां क्षमां संततमाद्रियेत ॥१५॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानकषायस्य स्वरूपमाह—

विनयश्रुतशीलानां त्रिवर्गस्य च घातकः ।
विवेकलोचनं लुम्पन् मानोऽन्धङ्करणो नृणाम् ॥१२॥

विनयश्च गुर्वादिषूपचारलक्षणः, श्रुतं च विद्या, शीलं च सुस्वभावता, तेषां घातकः । जात्यादिमदाध्मातो हि पिशाचकिप्रायो न गुर्वादीनां विनीतो भवति । अविनीतश्च गुरूनशुश्रूषमाणो न विद्यां प्रतिलभते । अतएव सर्वजनावज्ञाकारी स्वस्य दुःस्वभावतां प्रकटयति । न केवलं विनयादीनामेव घातको मानो यावत् त्रिवर्गस्य धर्मार्थकामलक्षणस्य । मदावलिप्तस्य हि नेन्द्रियजयः, तदधीनश्च धर्मः कथं स्यात् ? । अर्थोऽपि राजादिसेवापरायत्तवृत्तिर्मानस्तब्धस्य कथं स्यात् ? । कामस्तु मार्दवमूल एव, तत् कथं मानस्तब्धे स्थाणाविव भवेत् ? । किञ्च, अनन्धोऽन्धः क्रियतेऽनेनेत्यन्धङ्करणो मानः । केषां ? । नृणाम् । किं कुर्वन् ? । लुम्पन् । किं तत् ? । विवेकलोचनं विवेकः कृत्याकृत्यविचारणं स एव लोचनम्, "एकं हि चक्षुरमलं सहजो विवेकः" इति वचनात् । मानवतो हि वृद्धसेवामकुर्वाणस्य विवेकलोचनलोपनमवश्यंभावि, तस्मिंश्च सत्यन्धङ्करणत्वं मानस्य सुवचमेव ॥ १२ ॥

इदानीं मानस्य भेदानुपदर्शयंस्तत्फलमाह—

जातिलाभकुलैश्वर्यबलरूपतपःश्रुतैः ।
कुर्वन् मदं पुनस्तानि हीनानि लभते जनः ॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जातिश्च लाभश्चेत्यादिद्वन्द्वः, तैर्मदं मदलिप्तचित्ततां कुर्वन्, तान्येव जात्यादीनि जन्मान्तरे हीनानि लभते ।

अत्रान्तरश्लोकाः—

जातिभेदान् नैकविधानुत्तमाधममध्यमान् ।
दृष्ट्वा को नाम कुर्वीत जातु जातिमदं सुधीः ॥ १ ॥
उत्तमां जातिमाप्नोति हीनामाप्नोति कर्मतः ।
तत्राशाश्वतिकीं जातिं को नामासाद्य माद्यतु ॥ २ ॥
अन्तरायक्षयादेव लाभो भवति नान्यथा ।
ततश्च वस्तुतत्त्वज्ञो न लाभमदमुद्वहेत् ॥ ३ ॥
परप्रसादशक्त्यादिभवे लाभे महत्यपि ।
न लाभमदमृच्छन्ति महात्मानः कथञ्चन ॥ ४ ॥
अकुलीनानपि प्रेक्ष्य प्रज्ञाश्रीशीलशालिनः ।
न कर्तव्यः कुलमदो महाकुलभवैरपि ॥ ५ ॥
किं कुलेन कुशीलस्य सुशीलस्यापि तेन किम् ।
एवं विदन् कुलमदं विदध्याद् न विचक्षणः ॥ ६ ॥
श्रुत्वा त्रिभुवनैश्वर्यसंपदं वज्रधारिणः ।
पुरग्रामधनादीनामैश्वर्ये कीदृशो मदः ॥ ७ ॥
गुणोज्ज्वलादपि भ्रश्येद् दोषवन्तमपि श्रयेत् ।
कुशीलस्त्रीवदैश्वर्यं न मदाय विवेकिनाम् ॥ ८ ॥
महाबलोऽपि रोगाद्यैरबलः क्रियते क्षणात् ।
इत्यनित्ये बले पुंसां युक्तो बलमदो नहि ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बलवन्तोऽपि जरसि मृत्यौ कर्मफलान्तरे।
अबलाश्चेत्, ततो हन्त! तेषां बलमदो मुधा॥ १०॥
सप्तधातुमये देहे चयापचयवर्मिणि।
जराहजाभिभाव्यस्य को रूपस्य मदं वहेत्॥ ११॥
सनत्कुमारस्य रूपं तत्क्षयं च विचारयन्।
को वा सकर्णः स्वप्नेऽपि कुर्याद् रूपमदं किल॥ १२॥
नाभेयस्य तपोनिष्ठां श्रुत्वा वीरजिनस्य च।
को नाम स्वल्पतपसि स्वकीये मदमाश्रयेत्॥ १३॥
येनैव तपसा त्रुट्येत् तरसा कर्मसंचयः।
तेनैव मददिग्धेन वर्धते कर्मसंचयः॥ १४॥
स्वबुद्ध्या रचितान्यन्यैः शास्त्राण्याघ्राय लीलया।
सर्वज्ञोऽस्मीति मदवान् स्वकीयाङ्गानि खादति॥ १५॥
श्रीमद्गणधरेन्द्राणां श्रुत्वा निर्माणधारणे।
कः श्रयेत् श्रुतमदं सकर्णहृदयो जनः॥ १६॥

केचित्तु ऐश्वर्यतपसोः स्थाने वाल्लभ्यबुद्धिमदौ पठन्ति, उपदिशन्ति च,—

द्रमकैरिव च दुष्कर्मकमुपकारनिमित्तकं परजनस्य।
कृत्वा यद् वाल्लभ्यकमवाप्यते को मदस्तेन॥ १॥
गर्वं परप्रसादात्मकेन वाल्लभ्यकेन यः कुर्यात्।
तद्वाल्लभ्यकविगमे शोकसमुदयः परामृशति॥ २॥

---

(१) य ध -यधर्मणः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा —

ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥ ३ ॥
पूर्वपुरुषसिंहानां विज्ञानातिशयसागरमनन्तम् ।
श्रुत्वा सांप्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ? ॥४॥१३॥

मानस्य स्वरूपं भेदांश्च प्रतिपाद्य, इदानीं समानप्रतिपक्षभूतं मार्दवं मानजयोपायमुपदिशति,—

उत्सर्पयन् दोषशाखा गुणमूलान्यधो नयन् ।
उन्मूलनीयो मानद्रुस्तन्मार्दवसरित्प्लवैः ॥ १४ ॥

मान एव द्रुर्द्रुम उन्नतिविशेषधारित्वेन । मानद्रुमयोः साधर्म्यमाह,—उत्सर्पयन्नूर्ध्वं नयन् दोषा एव प्रसरणशीलत्वेन शाखा दोषशाखास्ताः, गुणा एव मूलानि गुणमूलानि तान्यधो नयन् न्यक्कुर्वन् । कैरुन्मूलनीयः ? मार्दवसरित्प्लवैर्मार्दवमेव सततवाहितया सरित् तस्याः प्लवैः प्रसरैः । मदद्रुमो हि यथा यथा वर्धते तथा तथा गुणमूलानि तिरोदधाति, दोषशाखाश्च विस्तारयति । तदयं कुठारादिभिरुन्मूलयितुमशक्यो मार्दवभावनासरित्प्रवाहेण समूलमुन्मूलनीय इत्यर्थः ।

अत्रान्तरश्लोकाः—

मार्दवं नाम मृदुता तच्चौद्धत्यनिषेधनम् ।
मानस्य पुनरौद्धत्यं स्वरूपमनुपाधिकम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्तः स्पृशेद् यत्र यत्रौद्धत्यं जात्यादिगोचरम् ।
तत्र तस्य प्रतीकारहेतोर्मार्दवमाश्रयेत् ॥ २ ॥
सर्वत्र मार्दवं कुर्यात् पूज्येषु तु विशेषतः ।
येन पापाद् विमुच्येत पूज्यपूजाव्यतिक्रमात् ॥ ३ ॥
मानाद् बाहुबलिर्बद्धो लताभिरिव पाप्मभिः ।
मार्दवात् तत्क्षणं मुक्तः सद्यः संजातकेवलः ॥ ४ ॥
चक्रवर्ती त्यक्तसङ्गो वैरिणामपि वेश्मसु ।
भिक्षायै यात्यहो ! मानच्छेदायाम्हदु मार्दवम् ॥ ५ ॥
चक्रवर्त्यपि तत्कालदीक्षितो रङ्कसाधवे ।
नमस्यति त्यक्तमानश्चिरं च वरिवस्यति ॥ ६ ॥
एवं च मानविषयं परिमृश्य दोषं
ज्ञात्वा च मार्दवनिषेवणजं गुणौघम् ।
मानं विहाय यतिधर्मविशेषरूपं
सद्यः समाश्रयत मार्दवमेकतानाः ! ॥७॥१४॥

इदानीं मायाकषायस्वरूपमाह—

असूनृतस्य जननी परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां माया दुर्गतिकारणम् ॥१५॥

असूनृतस्यानृतस्य जननीव जननी, मायामन्तरेण प्रायेणासूनृतस्याभावात्, 'माया' इति वक्ष्यमाणं संबध्यते, माया वञ्चनात्मकः परिणामः, तथा, परशुः कुठारः शीलं सुस्वभावता तदेव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शाखी तस्य परशुरिव परशुः, च्छेदकत्वात्; तथा जन्मभूमिरुत्पत्तिस्थानम्, कासाम्? अविद्यानां मिथ्याज्ञानानाम्। सा च दुर्गतेः कारणमिति प्रधानफलनिर्देशः ॥ १५ ॥

परवञ्चनार्थं प्रयुक्ताया मायायाः परमार्थतः स्ववञ्चनमेव फलमित्याह—

कौटिल्यपटवः पापा मायया बकवृत्तयः।
भुवनं वञ्चयमाना वञ्चयन्ते स्वमेव हि ॥१६॥

मायया तृतीयकषायेण भुवनं जगद् वञ्चयमानाः प्रतारयन्तः स्वमेवात्मानमेव वञ्चयन्ते। के? पापाः पापकर्मकारिणः। पापकर्मनिह्नवार्थमेव बकवृत्तयः, यथा बको मत्स्यादिवञ्चनार्थं मन्दं मन्दं विचेष्टते तथा तेऽपि जगद्वञ्चनार्थं तथा चेष्टन्ते यथा बकसदृशा भवन्ति। ननु मायया जगद्वञ्चनम्, तस्याश्च निह्नवः, इति कुत इयन्तं भारं ते वोढुं समर्थाः? इत्याह—कौटिल्यपटवः कौटिल्यपाटवरहितो हि न कदाचित् परं वञ्चयति, नवा कदाचिद् निह्नुत इति,कौटिल्यपाटवे तु द्वयं भवति परवञ्चनं वञ्चनाच्छादनं चेति।

अत्रान्तरश्लोकाः—

कूटषाड्गुण्ययोगेन च्छलाद् विश्वस्तघातनात्।
अर्थलोभाच्च राजानो वञ्चयन्तेऽखिलं जनम् ॥ १ ॥
तिलकैर्मुद्रया मन्त्रैः क्षामतादर्शनेन च।
अन्तःशून्या बहिःसारा वञ्चयन्ते द्विजा जनम् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कूटाः कूटतुलामानाशुक्रियाकारियोगतः ।
वञ्चयन्ते जनं मुग्धं मायाभाजो वणिग्जनाः ॥ ३ ॥
जटामौण्ड्यशिखाभस्मवल्कलाग्न्यादिधारणैः ।
मुग्धं श्राद्धं गर्धयन्ते पाखण्डा हृदि नास्तिकाः ॥ ४ ॥
अरक्ताभिर्भावहावलीलागतिविलोकनैः ।
कामिनो रञ्जयन्तीभिर्वेश्याभिर्वञ्च्यते जगत् ॥ ५ ॥
प्रतार्य कूटैः शपथैः कृत्वा कूटकपर्दिकाम् ।
धनवन्तः प्रतार्यन्ते दुरोदरपरायणैः ॥ ६ ॥
दम्पती पितरः पुत्राः सोदर्याः सुहृदो निजाः ।
ईशा भृत्यास्तथान्येऽपि माययाऽन्योन्यवञ्चकाः ॥ ७ ॥
अर्थलुब्धा गतघृणा वन्दकारा मलिम्लुचाः ।
अहर्निशं जागरूकाश्छलयन्ति प्रमादिनम् ॥ ८ ॥
कारवश्चान्त्यजाश्चैव स्वकर्मफलजीविनः ।
माययाऽलीकशपथैः कुर्वते साधुवञ्चनम् ॥ ९ ॥
व्यन्तरादिकुयोनिस्था दृष्ट्वा प्रायः प्रमादिनः ।
क्रूराश्छलैर्बहुविधैर्बाधन्ते मानवान् पशून् ॥ १० ॥
मत्स्यादयो जलचराश्छलात् स्वापत्यभक्षकाः ।
बध्यन्ते धीवरैस्तेऽपि माययाऽऽनायपाणिभिः ॥ ११ ॥
नानोपायैर्मृगयुभिर्वञ्चनप्रवणैर्जडाः ।
निबध्यन्ते विनाश्यन्ते प्राणिनः स्थलचारिणः ॥ १२ ॥
नभश्चरा भूरिभेदा वराका लावकादयः ।
बध्यन्ते माययाऽत्युग्रैः स्वल्पकग्रासगृध्नुभिः ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्देवं सर्वलोकेऽपि परवञ्चकतापराः ।
स्वस्य धर्मं सद्गतिं च नाशयन्तः स्ववञ्चकाः ॥ १४ ॥

तथा,—

तिर्यग्जातिः परं बीजमपवर्गपुरार्गला ।
विश्वासद्रुमदावाग्निर्माया हेया मनीषिभिः ॥ १५ ॥

मल्लिनाथः पूर्वभवे कृत्वा मायां तनीयसीम् ।
मायाशल्यमनुत्खाय स्त्रीत्वं प्राप जगत्पतिः ॥१६॥१६॥

इदानीं मायाजयाय तत्प्रतिपक्षभूतमार्जवमुपदिशन्नाह—

**तदार्जवमहौषध्या जगदानन्दहेतुना ।
जयेज्जगद्द्रोहकरीं मायां विषधरीमिव ॥१७॥**

यतो माया एवंविधा तत् तस्माद् मायां विषधरीमिव जयेत् । मायाविषधर्योः साधर्म्यमाह—जगद्द्रोहकरीं जगतो जङ्गम-लोकस्य द्रोहोऽपकारस्तं करोतीत्येवंशीला जगद्द्रोहकरी ताम् । केन जयेत्? आर्जवमहौषध्या आर्जवमकौटिल्यं तदेव महानुभावा ओषधिर्महौषधिस्तया । उभयोः साधर्म्यमाह—जगदानन्दहेतुना जगतो जंगमलोकस्य यथायथं य आनन्दः कायारोग्यप्रभवः प्रीति-विशेषो वञ्चकत्वपरिहारेण कषायजयाद् मोक्षरूपश्च तस्य हेतुना कारणेन ।

अत्रान्तरश्लोकाः—

आर्जवं सरलः पन्था मुक्तिपुर्याः प्रकीर्तितः ।
आचारविस्तरः शेषो बाह्या अपि यदूचिरे ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम् ।
एतावाञ्ज्ञानविषयः प्रलापः किं करिष्यति ? ॥२॥ इति ।
भवेयुरार्जवजुषो लोकेऽपि प्रीतिकारणम् ।
कुटिलादुद्विजन्ते हि जन्तवः पन्नगादिव ॥ ३ ॥
अजिह्मचित्तवृत्तीनां भववासस्पृशामपि ।
अकृत्रिमं मुक्तिसुखं स्वसंवेद्यं महात्मनाम् ॥ ४ ॥
कौटिल्यशङ्कुना क्लिष्टमनसां वञ्चकात्मनाम् ।
परव्यापादनिष्ठानां स्वप्नेऽपि स्यात् कुतः सुखम् ॥ ५ ॥
समग्रविद्यावैदुष्येऽधिगतासु कलासु च ।
धन्यानामुपजायेत बालकानामिवार्जवम् ॥ ६ ॥
अज्ञानामपि बालानामार्जवं प्रीतिहेतवे ।
किं पुनः सर्वशास्त्रार्थपरिनिष्ठितचेतसाम् ? ॥ ७ ॥
स्वाभाविकी हि ऋजुता कृत्रिमा कुटिलात्मता ।
ततः स्वाभाविकं धर्मं हित्वा कः कृत्रिमं श्रयेत् ॥ ८ ॥
छलपैशुन्यवक्रोक्तिवञ्चनाप्रवणे जने ।
धन्याः केचिद् निर्विकाराः सुवर्णप्रतिमा इव ॥ ९ ॥
श्रुताब्धिपारप्राप्तोऽपि गौतमो गणभृद्वरः ।
अहो! शैक्ष इवाश्रौषीदार्जवाद् भगवद्गिरः ॥ १० ॥
अशेषमपि दुष्कर्म ऋज्वालोचनया क्षिपेत् ।
कुटिलालोचनां कुर्वन्नल्पीयोऽपि विवर्धयेत् ॥ ११ ॥
काये वचसि चित्ते च समन्तात् कुटिलात्मनाम् ।
न मोक्षः, किन्तु मोक्षः स्यात् सर्वत्राकुटिलात्मनाम् ॥१२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति निगदितमुग्रं कर्म कौटिल्यभाजा-
मृजुपरिणतिभाजां चानवद्यं चरित्रम् ।
तदुभयमपि बुद्ध्या संस्पृशन् मुक्तिकामो
निरुपममृजुभावं संश्रयेच्छुद्धबुद्धिः ॥१२॥१७॥

इदानीं लोभकषायस्वरूपमाह—

आकरः सर्वदोषाणां गुणग्रसनराक्षसः ।
कन्दो व्यसनवल्लीनां लोभः सर्वार्थबाधकः ॥१८॥

आकरः खानिः सर्वदोषाणां प्राणातिपातादीनां 'लोहादीनामिव' इति गम्यते ; गुणानां ज्ञानादीनां प्राणिनामिव यद् ग्रसनं कवलनं तत्र राक्षस इव राक्षसः ; तथा, कन्दो मूलाधोऽवयवः, कासां ?, व्यसनवल्लीनां व्यसनानि दुःखानि तान्येव वल्लयस्तासाम्, लोभश्चतुर्थकषायः, तस्य स्वरूपसंग्रहमाह—सर्वार्थबाधकः सर्वेषामर्थ्यन्त इत्यर्था धर्मार्थकाममोक्षलक्षणास्तेषां बाधकः प्रतिकूलः । लोभस्य सर्वदोषाकरत्वम्, गुणघातकत्वम्, व्यसनहेतुत्वं सर्वपुरुषार्थघातकत्वं च प्रसिद्धमेव ॥ १८ ॥

लोभस्य दुर्जयत्वं श्लोकत्रयेणाह—

धनहीनः शतमेकं सहस्रं शतवानपि ।
सहस्राधिपतिर्लक्षं कोटिं लक्षेश्वरोऽपि च ॥१९॥
कोटीश्वरो नरेन्द्रत्वं नरेन्द्रश्चक्रवर्तिताम् ।
चक्रवर्ती च देवत्वं देवोऽपीन्द्रत्वमिच्छति ॥२०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इन्द्रत्वेऽपि हि संप्राप्ते यदिच्छा न निवर्तते ।
मूले लघीयांस्तल्लोभः सराव इव वर्धते ॥ २१ ॥

स्पष्टम् ।

अत्रान्तरश्लोकाः—

हिंसेव सर्वपापानां मिथ्यात्वमिव कर्मणाम् ।
राजयक्ष्मेव रोगाणां लोभः सर्वागसां गुरुः ॥ १ ॥
अहो ! लोभस्य साम्राज्यमेकच्छत्रं महीतले ।
तरवोऽपि निधिं प्राप्य पादैः प्रच्छादयन्ति यत् ॥ २ ॥
अपि द्रविणलोभेन ते द्वित्रिचतुरिन्द्रियाः ।
स्वकीयान्यधितिष्ठन्ति प्राग्निधानानि मूर्च्छया ॥ ३ ॥
भुजङ्गगृहगोधाखुमुख्याः पञ्चेन्द्रिया अपि ।
धनलोभेन लीयन्ते निधानस्थानभूमिषु ॥ ४ ॥
पिशाचमुद्गलप्रेतभूतयक्षादयो धनम् ।
स्वकीयं परकीयं वाऽप्यधितिष्ठन्ति लोभतः ॥ ५ ॥
भूषणोद्यानवाप्यादौ मूर्च्छितास्त्रिदशा अपि ।
च्युत्वा तत्रैव जायन्ते पृथ्वीकायादियोनिषु ॥ ६ ॥
प्राप्योपशान्तमोहत्वं क्रोधादिविजये सति ।
लोभांशमात्रदोषेण पतन्ति यतयोऽपि हि ॥ ७ ॥
एकामिषाभिलाषेण सारमेया इव द्रुतम् ।
सोदर्या अपि युध्यन्ते धनलेशजिघृक्षया ॥ ८ ॥
लोभाद् ग्रामाद्रिसीमानमुद्दिश्य गतसौहृदाः ।
ग्राम्या नियुक्ता राजानो वैरायन्ते परस्परम् ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हासशोकद्वेषहर्षानसतोऽप्यात्मनि स्फुटम् ।
स्वामिनोऽग्रे लोभवन्तो नाटयन्ति नटा इव ॥ १० ॥
आरभ्यते पूरयितुं लोभगर्तो यथा यथा ।
तथा तथा महच्चित्रं मुहुरेष विवर्धते ॥ ११ ॥
अपि नामैष पूर्येत पयोभिः पयसां पतिः ।
न तु त्रैलोक्यराज्येऽपि प्राप्ते लोभः प्रपूर्यते ॥ १२ ॥
अनन्ता भोजनाच्छादविषयद्रव्यसचयाः ।
भुक्तास्तथापि लोभस्य नांशोऽपि परिपूर्यते ॥ १३ ॥
लोभस्त्यक्तो यदि तदा तपोभिरफलैरलम् ।
लोभस्त्यक्तो न चेत् तर्हि तपोभिरफलैरलम् ॥ १४ ॥
मृदित्वा शास्त्रसर्वस्वं मयैतदवधारितम् ।
लोभस्यैकस्य हानाय प्रयतेत महामतिः ॥१५॥१९॥२०॥२१॥

लोभस्वरूपं निरूप्य तज्जयोपायमुपदिशति—

लोभसागरमुद्वेलमतिवेलं महामतिः ।
संतोषसेतुबन्धेन प्रसरन्तं निवारयेत् ॥२२॥

लोभ एवाप्राप्तपारत्वेन सागरस्तम्, उद्वेलमुन्नतवेलं तत्तदुत्कलिकावत्त्वेन विवृद्धोच्छ्रायम्, अतिवेलं भृशम्, एतच्च 'निवारयेत्' इति क्रियाया विशेषणम् । 'प्रसरन्तम्' इति लोभसागरस्य विशेषणम् । महामतिर्मुनिः । निवारणकारणमुपदिशति—संतोषसेतुबन्धेन संतोषो लोभप्रतिपक्षभूतो मनोधर्मः स एव सेतुबन्धो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Dāna Kriyā Kaumudī, Fasc. 1--2 @ /10/ each	1	4
*Dasa Rupa (Text), Fasc. 2--3, @ /10/ each	1	4
Dharmabindu, Fasc. 1, @ /10/ each	0	10
Dictionary of the Kashmiri Language, Part I	15	0
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Ācharasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. I @ /10/ each	3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Gopotha Brahman of Atharva Veda (Text and English), Fasc. 1-2, @ 1/- each	2	0
Haralata	1	14
Institutes of Vishnu (Text), Fasc. 1--2, /10/ each	1	4
Kala Madhava (Text), Fasc. 1--4, @ /10/ each	2	8
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Karmapradiph, Fasc. I	1	4
Kātantra, Fasc 1-6 @ /12/ each	4	8
Katha Sarit Sagara (English), Fasc 1-14 @ 1/- each	14	0
Kavi Kalpa Lata, Fasc. 1	0	10
Kavindravacana Samuceyah	3	8
Kiranavali, Fasc. 1-3 @ /10/ each	1	14
Kūrma Purāṇa, Fasc. 1-9 @ /10/ each	5	10
*Lalita Vistara (Text), Fasc. 2--6 @ /10/ each	3	2
* Ditto (English), Fasc. 1--3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradipōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 ; Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, Fasc. 1--5 @ /4 ; each	3	12
Maitra, or Maitrayianiya Upanishad, Fasc. 1	0	10
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
*Markaudeya Purana (Text), Fasc. 4-7 @ /10/ each	2	8
*Mimāṁsā Darçana, (Text) Fasc. 9, 11-17 @ /10/ each	5	0
Mirror of Composition (English), Fasc. 1--4 @ 1/- each	5	0
Mugdhabodha Vyakarana, Vol. I, Fasc. 1-7 @ /10/ each	4	6
Nirukta (2nd edition), Vol. I, Fasc. 1--2 @ 1/4I	2	8
*Nirukta (old edition), Vol. I, Fasc. 1, 2, 4, 5. 6 ; Vol. II, Fasc. 5, 6 ; Vol. III, Fasc. 1--6 ; Vol. IV, Fasc. 1--8 @ /10/ each	13	2
Nityācirapadhati, Fasc 1--7 @ /10/ each...	4	6
Nityācārapradipa, Vol. I, Fasc. 1--8, Vol. II, Fasc. 1--4 @ /10/ each ...	7	8
Nrisimha Tapani of Atharva-Veda (Text), Fasc. 1--3 @ /10/ each ...	1	14
Nyayabinduṭikā, Fasc. 1 @ /10/ each	0	10
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-4 @ /10/ each	2	8
*Nyayavārtika, (Text), Fasc. 2--7 @ /10/ each	3	12
Nyayasarah	2	0
Padumawati, Fasc. 1- 6 @ 2/ each	12	0
Parāçara Smṛti, Vol. I, Fasc. 2-8; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /10/ each	11	14
Parāçara, Institutes of (English) @ 1/- each	1	0
*Paricista Pravan (Text), Fasc. 5 @ /10/ each	0	10
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Prakrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prakrita Lakshanan	1	8
Prthviraj Vijaya, Fasc. 1	0	10
Rasarnavam, Fasc. 1-3	3	12
Ravisiddhanta Manjari, Fasc. 1	0	10
Saddarsana-Samuccaya, Fasc. 1-3 @ /10/ each	1	14
Sādukti-karna-mrita, Fasc 1 @ /10/ each	0	10
Samaraicca Kaha Fasc. 1-7, @ /10/ each	4	6
*Samvada Sanhita, Vol. I, Fasc. 1- 4, 6--10 ; Vol. 2, Fasc. 2--6 ; Vol. 3, Fasc. 1--7 ; Vol. 4, Fasc. 1--6 ; Vol. 5, Fasc 1--8 @ /10/ each ...	21	14
*Sankara Vijaya (Text) Fasc. 2--3 @ /10/ each	1	4
*Sankhya Aphorisms of Kapila (English), Fasc. 2	1	0
*Sankhya Pravachana Bhashya, Fasc. 2	0	10
Sāṇkhya Sūtra Vṛitti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
Siva Parinahya, Fasc. 1--2	1	4
Six Buddhist Nyaya Tracts.	0	10

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Smriti Prakasha, Fasc. 1	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Srauta Sutra of Latyayana (Text), Fasc. 1--9 @ /10/ each	5	10
Sri Surisarvasvam, Fasc. 1--3 @ /10/ each	1	14
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta Fasc. 1-2 @ 1-4 each	2	8
Syainika Sastra	1	0
*Taitterīya Saṁhitā, (Text) Fasc. 17-45 @ /10/ each	18	2
*Taittiriya Aranyaka of Black Yajpur Veda (Text), Fasc. 5--11 @ /10/ each	4	6
Taittreya Brahmana, (Text), Fasc. 1-24 @ /10/ each	15	0
Taittiriya Pratisakhya (Text), Fasc. 1--3 @ /10/ each	1	14
Tāṇḍya Brāhmaṇa, (Text), Fasc. 13-18 @ /10/ each	3	12
Tantra Vārtika (English) Fasc. 1-14 @ 1/4/ each	17	8
* Tattva Cintāmaṇi, Vol. I, Fasc. 2-9, Vol II, Fasc. 4-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	21	14
Tattva Cintamani Didhiti Prakas, Fasc. 1-6, @ /10/ each	3	12
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc. 1-8 ; Vol. II, Fasc. 1--3, Vol. III, Fasc. 1 @ /10/ each	7	8
*Tattvarthadhigama Sutram, Fasc. 2--3 @ /10/ each	1	4
Tirthacintamoni, Fasc, 1-4, @ /10/ each	2	8
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
Upamita-bhava-prapañca-kathā, Fasc. 1-14 @ /10/ each	8	12
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vajjalaggam, Fasc. 1	0	10
Vallāla Carita, Fasc 1 @ /10/	0	10
Varaha Purana (Text), Fasc. 2--14 @ /10/ each	8	2
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
Vāyu Purāṇa, (Text, Vol. I, Fasc. 1--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	8	2
*Vedanta Sutras (Text), Fasc 7-13 @ /10/ each	4	6
Vidhāna Pārijata, Fasc. 1-8 Vol. II Fasc. 2 @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-5 @ 1/4/	5	0
Ditto Vol. III, Fasc. 1	0	10
Vishahitam, Fasc. 1	0	10
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vrhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Vrhannaradiya Purana (Text), Fasc. 3-6 @ /10/ each	2	8
Yogasāstra Fasc. 1-5	5	0
Yoga Sutra of Patanjali (Text and English), Fasc. 1-5 @ 1/ each	5	0

Tibetan Series.

Amarkosha, Fasc 1--2	4	0
Amartika Kamdhenuh	1	0
Baudhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu (A Bilinguel Index)	1	0
Nyayabindu of Dharmakirti, Fasc. 1--2	2	0
Pag-Sam S'hi Tiñ, Fasc. 1--4 @ 1/- each	4	0
Prajna Pradipah	1	0
Rtogs *brjod* dpag *h*khri S'iṅ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1--13 ; Vol. II. Fasc. 1--12 @ 1/- each	25	0
Sher-Phyin, Vol. I, Fasc 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each	14	0
Timed-Kun-Din	1	0

Notice of Sanskrit Manuscripts. Fasc. 1-35 @ 1/ each	35	0
Ditto ditto (Palm-leaf and selected paper MSS.) @ 3/- each ...	6	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra	5	0
Report on the Search of Sanskrit MSS., 1895-1900, 1901-1905, and 1906-1911 @ /8/ each	1	8

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

8-4-18.

Books are supplied by V. P. P